माध्यन्दिन-संहितायाः पदपाठः

(त्रिविधावान्तरपाठैः समन्वितः)

पण्डित युधिष्ठिरो मीमांसकः

ओ३म्

माध्यन्दिन-संहितायाः पदपाठः

त्रिविधावान्तरपाठैः संयुतः

पदपाठानां तुलनात्मकाध्ययनेन विविधैः परिशिष्टैश्चालंकृतः

सम्पादक :

युधिष्ठिरो मीमांसकः

प्रकाशक :

रामलाल कपूर ट्रस्ट

सोनीपत (हरियाणा)

समर्पणम्

राजस्थान-संस्कृतशिक्षाविभाग-संचालकानां
संस्कृतविदुषां परमसहायकानां
निकारणमित्रमणीनां
विद्वद्वर्याणां
स्व॰ श्री माधवकृष्णशर्मणां
पुण्य-स्मृतौ
समर्पयति ग्रन्थमिमं युधिष्ठिरो मीमांसकः।

प्रकाशक : **रामलाल कपूर ट्रस्ट**
ग्राम रेवली, डाक॰ ई॰सी॰ मुरथल,
सोनीपत-१३१०३९ (हरियाणा)

: पञ्चमवारम्- ६०० प्रतियाँ
विक्रमी संवत् २०७३, अक्टूबर सन् २०१६

मूल्य : ३००.०० रुपये

प्राप्ति-स्थान : १. **रामलाल कपूर ट्रस्ट**
ग्राम रेवली, डाक॰ ई॰सी॰ मुरथल,
सोनीपत-१३१०३९ (हरियाणा)
E-mail- rlktrust@yahoo.in
Web- www.rlktrust.com
दूरभाष : ७०८२१११४५६
२. **विजयकुमार गोविन्दराम हासानन्द**
नई सड़क, दिल्ली-११०००६।

मुद्रक : **राधा प्रेस, 38/2/16, साइट 4, साहिबाबाद (उ.प्र.)**

सम्पादकीयम्

अस्माकं भारतीयानां कृते वेदा एव परमं प्रमाणमित्यत्र नास्ति सन्देहावसरः। वैदिकाः संहिताग्रन्था यथा भारतीयैर्ब्राह्मणैः कण्ठस्थीकृत्याद्य-यावत् सुरक्षिताः, तादृशमुदाहरणं क्वचिदपि देशान्तरे नोपलभ्यते।

वैदिकमन्त्राणामर्थ-परिज्ञानाय प्राचीनैराचार्यैः पदग्रन्थानां प्रवचनं कृतम्। पदप्रवचने च प्रगृह्यत्वावग्रहत्वादिप्रदर्शनेनार्थपरिज्ञाने महत्साहाय्यं लभ्यते। पदपाठमेव प्रकृतिं कृत्वा संहितारक्षणाय प्रवृत्ताः क्रम-जटा-घनाद्या अष्टौ विकृतयः। एवं पदपाठो मन्त्रार्थपरिज्ञानं संहितापाठरक्षणं चोभयमपि प्रयोजनं साधयन् महान्तमुपकारं विदधाति।

चतुर्विधः पाठः—अस्य ग्रन्थस्य सम्पादनकर्मणः प्राग् आसीन्मदीयो विचारो यथा संहितायां नैकोऽपि पाठभेदस्तथैव पदग्रन्थोऽपि पाठभेद-विरहित एव। परं यदा मया विविधानां कोशानां पारस्परिकी तुलना सूक्ष्मे-क्षिकया व्यधायि, तदैतत् सत्यं प्रथमतः प्रकटीभूतं यन्माध्यन्दिनपदपाठे सन्ति केचन व्यवस्थिताः पाठभेदाः। तान् आलोच्य वर्गीकृत्य च विज्ञातं यत् सम्पादनकर्मण्युपयुज्यमानाः कोशाः पदपाठस्य चतुर्विधान् व्यवस्थितपाठान् व्यञ्जयन्ति। तत्रैकः पाठः प्रधानभूतः, अपरे त्रयोऽवान्तरपाठरूपाः। एतेषां चतुर्विधपाठानां विषये **'माध्यन्दिनपदपाठस्य चतुर्विधः पाठः'** इत्यस्मिन् प्रकरणेऽस्माभिर्विस्तरेण विवेचना कृता, सा तत्रैव द्रष्टव्या। अस्मिन् ग्रन्थे वैदिकैः प्रायेण पठ्यमानः पाठः प्राधान्येन यथासम्प्रदायं स्थूलाक्षरैर्मुद्रितः। अपरयोः द्वयोः पाठयोर्यावानंशो भिन्न आसीत्, तावान् एव सूक्ष्माक्षरेषु यथास्थानं संगृहीतः। मुख्यरूपेण मुद्रापितात् पाठाद् अतिस्वल्पेषु पदेषु स्वर-विषयको यो व्यवस्थितो भेदः काशिकपाठ उपलभ्यते, स अधस्तात् टिप्पण्यां यथास्थानमुट्टङ्कितः। एवमयमस्मत्प्रयासः माध्यन्दिनपदपाठस्य चतुर्विधानेव पाठान् संगृह्णाति।

माध्यन्दिनानां संहितायां पदग्रन्थे च यकारवकारयोर्लेखन उच्चारणे चान्यवेदेभ्यो यद् वैशिष्ट्यं तत्र लेखनविषये **'माध्यन्दिनसंहितायां पदपाठे च**

यकारवकारयोर्विशिष्टा लेखनपद्धतिः' इत्यस्मिन् प्रकरणे (पृष्ठ ३४-४१), उच्चारणविषये च तुरीये परिशिष्टे (पृष्ठ ६४१-६४४) विचारः कृतः । अस्मिन्नेव च परिशिष्टे षकारस्य यत् खकाररूपमुच्चारणं तस्यापि यथाशास्त्रमालोचनं विहितम् ।

ँ ँ विषयको विचारः – माध्यन्दिनपाठे ँ ँ इत्येवं संकेतितः को वर्णः, कथं च तस्योच्चारणं शिक्षाशास्त्रसम्मतमित्यस्मिन् विषये तृतीये परिशिष्टे (पृष्ठ ६३८-६४०) विचारो विहितः ।

के यमाः कति च—यमानां किं स्वरूपं, कति यमाः, कश्च तेषा लेखनप्रकार इत्यस्मिन् विषये द्वितीये परिशिष्टे (पृष्ठ ६३५-६३७) विचारः कृतः ।

पदपाठानां पारस्परिकी तुलना—सर्वेषामपि पदग्रन्थानां प्रवचनप्रकारो यथाशाखं भिद्यते । तेषु यावानपि पारस्परिको भेद उपलभ्यते, स सर्वोऽपि **'पदपाठानां तुलनात्मकमध्ययनम्'** इत्यस्मिन् प्रकरणे (पृष्ठ ११-३३) यथाशास्त्रं यथाशाखं च विस्तरेण प्रपञ्चितः । अनेन प्रकरणेन सर्वेषामेव समुपलब्धानां पदग्रन्थानां प्रवचनप्रकारोऽञ्जसा परिज्ञातुं शक्यते ।

एतत्कार्ये प्रवर्तने निमित्तम्—एकोनविंशत्युत्तरद्विसहस्रसंख्याके (२०१९) वैक्रमाब्दे राजस्थानान्तर्गत **'केकड़ी'** नगरवास्तव्याः पण्डितप्रवराः श्रीमदनमोहनव्यासशर्माणोऽकस्मात् केनचिन्निमित्तेन ममावसथमलंकृतवन्तः । वार्तालापे तेषां हस्तलिखितग्रन्थानां संग्रहे रुचिमुपलभ्य मया निवेदितं—यत्कदाचित् संयोगात् वेदव्याकरणविषयकः कोऽपि हस्तलेखो भवतां दृग्गोचरो भवेच्चेत् पुस्तकस्वामिने पत्रं पुष्पं समर्प्य मदर्थं ग्रहीतव्यः । द्वित्रिमासानन्तरं यदा पण्डितवर्याः पुनः मम गृहं समागतास्तदानीं द्वौ हस्तलिखितौ ग्रन्थौ मह्यमर्पितवन्तः । तयोरेको माध्यन्दिनपदपाठस्य १४७१ वैक्रमाब्दे लिखितः कोश आसीद्, अपरो भर्तृहरिविरचित-शतकत्रयस्य द्विशतवर्षपूर्वं राजस्थानभाषामिश्रितायां व्रजभाषायां पद्यमयः कोशः । सार्धपञ्चशतवर्षपुरातनं माध्यन्दिन-पदपाठस्य कोशमकस्मादुपलभ्याहं हर्षातिरेकेण पुलकितगात्रोऽभूवम् । यतो ह्यस्य पदग्रन्थस्यैतावत्प्राचीनः कोशः क्वचिदपि पुस्तकालयेषु नास्तीति सुविदितमासीन्मम ।

कार्यान्तरे व्यापृतत्वान्मया किञ्चित् कालं नायं ग्रन्थः सूक्ष्मया दृष्ट्याऽवलोकितः । यदा कालान्तरे मयाऽयं कोशः सूक्ष्मया दृशा परिशीलितः, त्रिस्थानेषु मुद्रितैश्च पाठैरस्य तुलना विहिता, तदास्मिन् कोशे महद् वैशिष्ट्यमुपलभ्यातितरां मुदितोऽभूवम्, प्रकाशने चास्य मतिं कृतवान् ।

राजस्थानसंस्कृतशिक्षाविभागतः साहाय्यम्—कोशमिममहं तात्कालिक-राजस्थानसंस्कृतशिक्षासंचालकेभ्यो गीर्वाणवाणीप्रसाराय बद्धपरिकरेभ्यो मित्र-वर्येभ्यः स्वर्गीयेभ्यो विद्वद्वर्येभ्यो **माधवकृष्णशर्म**महोदयेभ्यः प्रदर्शितवान् । तेऽप्येतावत्कालप्राचीनं महार्घं कोशं दृष्ट्वाऽत्रत्यं वैशिष्ट्यं चावगम्य नितरां प्रसन्ना अभवन् । वार्तालापे मयोऽक्तम—यदि भवतां राजस्थानसंस्कृतशिक्षा-विभागोऽस्य ग्रन्थस्य सम्पादन-कर्म्मणि साहाय्यं विदध्यात्, तर्ह्यहं ग्रन्थमिमं विविधानां प्राचीनकोशानां साहाय्येन सम्पादयितुमिच्छामि । अनुसन्धानकार्य-कुशलैः श्रीमद्भिर्माधवकृष्णशर्मभिरस्य कार्यस्य यथावद् गौरवं परिज्ञाय ग्रन्थस्यास्य सम्पादनकर्मणि स्वविभागतो यथोचितसाहाय्यप्रदानं प्रतिज्ञातम् ।

त्रिवर्षं यावत् प्रतिमासं सार्धशतमुद्राणां साहाय्यम्—राजस्थानसंस्कृत-शिक्षाविभागसंचालकेभ्यः साहाय्यविषयकं समाश्वासनं प्राप्य विविध-पुस्तकालयेभ्यः हस्तलिखितग्रन्थान् संगृह्य सुदूरस्थानीयेषु पुस्तकालयेषु गत्वा विविधान् कोशान् आलोच्यास्य ग्रन्थस्य सम्पादनकर्मणः रूपरेखां निश्चित्य मया राजस्थानसंस्कृतशिक्षाविभागसंचालकेभ्यः साहाय्यार्थं प्रतिवेदनं प्रदत्तम् ।

तत्रभवन्तो राजस्थानसंस्कृतशिक्षासंचालका विद्वद्वर्या माधवकृष्ण-शर्माणो विविधै राजनियमैः प्रतिबद्धहस्ता अपि स्वविभागात् सार्धशतमुद्रा-मासिकसाहाय्यप्रदानाय स्वीकृतिमुपलभ्य मामस्य सम्पादनकर्मणि नियोजित-वन्तः । यद्यपि राजकीयसाहाय्यं द्वाभ्यां वर्षाभ्यामेव स्वीकृतमभूत्, तथापि कार्यस्यास्य गौरवं जानानैः संचालकमहोदयैरेकवर्षाय साहाय्यं परिवर्धितम् । एवं राजस्थानसंस्कृतशिक्षाविभागस्य महता साहाय्येनास्य ग्रन्थस्य सम्पादन-कार्यस्य त्रिभिर्वर्षैर्मया पूर्तिर्विहिता ।

प्रकाशनकार्ये साहाय्यम्—एतादृशस्य महतो ग्रन्थस्य प्रकाशनमप्यति-व्ययसाध्यं भवति । तावद् व्ययीकर्तुं मादृशोऽकिञ्चनो जनो न कथमपि समर्थः । अतोऽस्य ग्रन्थस्य प्रकाशनकर्मणि सहायतार्थं केन्द्रीयशिक्षायुवक-सेवामन्त्रालयस्य संस्कृतविभागाध्यक्षेभ्यः २०२५ वैक्रमाब्दे प्रतिवेदनं प्रेषितम् । संस्कृतविभागाध्यक्षैः सहायतानिर्णायकसमितेश्चान्यैः सदस्यवर्यैरस्य कार्य-स्योपयोगितां महत्त्वं च विज्ञाय प्रकाशनकर्मणि साहाय्यमुररी कृतम् ।

श्रीरामलालकपूरन्यास(ट्रस्ट)स्य महान् सहयोगः—सस्वरस्य वैदिक-ग्रन्थस्य मुद्रणव्यवस्था भारतस्य राजधान्यां विद्यमानेषु अनेकेषु बृहन्मुद्रणालयेषु क्वचिदपि नास्ति । दूरदेशे च मुद्रणकार्ये महान् विलम्बो जायते । अतो मया श्रीरामलालकपूरन्यासाधिकारिभ्यो निवेदितं यत् स्वकीये नवस्थापिते मुद्रणा-

नयेऽस्य ग्रन्थस्य मुद्रणव्यवस्थां कुर्वन्त्विति । तैर्महतौदार्य्येण पञ्चसहस्रमुद्रमितं धनं व्ययीकृत्य वैदिकग्रन्थप्रकाशनयोग्यानि द्विविधानि महार्घाणि सस्वराणि मुद्राक्षराणि (टाइप) मुम्बईनगरस्थनिर्णयसागरसंस्थातः परिक्रीयाऽस्य ग्रन्थस्य मुद्रणे महत्साहाय्यमाचरितम् ।

कृतज्ञता-प्रकाशनम्

१—श्रीमतां पण्डितमदनमोहनव्यासमहाभागानामहमत्यन्तं कृतज्ञोऽस्मि, यैरतिदुर्लभः सार्धपञ्चशतवर्षपुरातनः माध्यन्दिन-संहितायाः पदपाटस्य हस्तलेखो मह्यं प्रदत्तः ।

२—राजस्थानसंस्कृतशिक्षाविभागस्य तात्कालिकानां संचालकानां विद्वन्मूर्धन्यानां स्वर्गीयमाधवकृष्णशर्मणामतिशयं कृतज्ञोऽस्मि । यैरस्य ग्रन्थस्य सम्पादनाय स्वविभागात् त्रिवर्षं यावत् प्रतिमासं सार्धशतमुद्राणां साहाय्यं विहितम् ।

३—श्रीरामलालकपूरन्यासस्य (ट्रस्टस्य) अधिकारिणामप्यहमति कृतज्ञोऽस्मि, यैरस्य ग्रन्थस्य मुद्रणाय पञ्चसहस्रमुद्रा व्ययीकृत्य यथावद् व्यवस्था विहिता ।

४—अस्मन्मित्राणां श्रीमहेन्द्रशास्त्रिमहोदयानामप्यहं नितान्तं कृतज्ञोऽस्मि, यैरस्य महत्त्वपूर्णग्रन्थस्य मुद्रणपत्रशोधनं महता परिश्रमेण सम्पादितम्, तदनु च संशोधनपत्र-विधानार्थं समग्रो ग्रन्थः पुनरवलोकितः । यदि तेषामस्मिन् कर्मणि साहाय्यं नाभविष्यत्तर्ह्यस्य ग्रन्थस्य शुद्धं मुद्रणमसंभवमेवासीत् । एतेषां साहाय्यस्य गौरवन्त्वनेनैव ज्ञातुं शक्यते, यदेषां सहयोगप्राप्तेः प्राग् यावन्ति पृष्ठानि मुद्रितान्यासन् तेषु मम दृष्टिदोषेण स्खलनान्यधिकान्यभूवन् ।

नम्रनिवेदनम्—अस्य ग्रन्थस्य सम्पादने वैदिकानां साम्प्रदायिकपाठस्य व्यवस्थापने महति प्रयत्ने कृतेऽपि ममाज्ञानात् प्रमादाद्वा क्वचित् स्खलनं संजातं स्यादिति नातिसम्भवम् । तदर्थं विद्वद्वरेण्याः वैदिकवाङ्मयस्य रक्षणे कृतपरिश्रमाः क्षमायाचनपुरःसरं प्रार्थ्यन्ते यन्ममाल्पज्ञस्य दोषान् संमार्ज्य ग्रन्थमिमं पठनपाठनकर्मण्युपयुज्य मामकीनं परिश्रमं सफलयन्तु, संशोधनपत्रानुसारं च पूर्वं ग्रन्थं संशोध्य पठन्त्विति ।

सं० २०२८, ज्येष्ठ कृष्णा ३ | **विदुषा वशंवदः**
सोनीपत (हरयाणा) | **युधिष्ठिरो मीमांसकः**

माध्यन्दिन-पदपाठस्य विषय-सूची

विषयः पृष्ठसंख्या

माध्यन्दिनपदपाठस्य सम्पादनकर्मण्युपयुक्तानां

हस्तलिखितानां मुद्रितानां च ग्रन्थानां परिचयः

माध्यन्दिनपदपाठस्यास्य सम्पादनकर्मणि विभिन्नस्थानीया ये ये हस्तलेखा मुद्रिता वा ग्रन्था उपयुक्तास्तेषां परिचयोऽधस्तात् प्रस्तूयते—

हस्तलिखिताः कोशाः

१. क—अयं हस्तलेखोऽस्माभिर् **'अजयमेरु'** (अजमेर) मण्डलान्तर्वर्तिनि **'केकड़ी'** नगरे निवसतां मित्रवर्याणां व्यासोपाह्वानां पण्डित **मदनमोहन**महोदयानां कृपयाऽधिगतः। अस्य विवरणम्—

आकारः—४×१० 'इञ्च' मितः।

पङ्क्तयः—प्रतिपृष्ठं ९ नवसंख्यामिताः।

अक्षराणि—प्रतिपङ्क्ति चत्वारिंशदक्षराणि प्रायेण।

लिपिः—प्राचीना देवनागरी।

लेखनकालः—१४७१ तमो वैक्रमाब्दः, १३३६ तमः शकाब्दः।

पत्राणि—पूर्वार्धे भूरामचन्द्र (१३१) मितानि, उत्तरार्धे ऋषिद्वीप (७७) मितानि। आहत्योभयोर्भागयोर् २०८ अष्टोत्तरद्विशतमितानि पत्राणि सन्ति।

अन्त्यपाठः—पूर्वार्धस्यान्त इत्थं पाठ उपलभ्यते—

"शुभं भवतु मंगलं।। संवत् १४७१ वर्षे शाके १३३६ बहमेने[१]।

---

१. **'वहमाने'** इति शुद्धः पाठो द्रष्टव्यः। उत्तरार्धस्यान्त्यपाठे शुद्धो निर्देश उपलभ्यते।

अषाढ शुदि १५ भौमे । [1]अद्य हंसीघणी ग्रामवास्तव्य ज्वोतिरामदेव-सुत थोतिपीपासुत असेस्वरपठनार्थे लिषितम् । [2]य्यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया । [2]य्यदि शुद्धमशुद्धं वा । मम दोषो न दीयते ।।१ तैलाद् रक्षेज्जलाद् रक्षेद् रक्षे शिथिलबन्धनात् । परहस्ते गता रक्षे । एवं वदति पुस्तिकं ।। शांति भवतु । गुरुभ्यो नमः । परमगुरुभ्यो नमः ।"

उत्तरार्धस्यान्ते त्वित्थं पठ्यते—

"समाप्तम् । शिवमस्तु । य्यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितम्मया । य्यदि शुद्धमशुद्धम्वा । मम दोषो न दीयते ।।१ संवत् कालातीत विक्रमसम्वत् १४७१ वर्षे शाके १३३६ वहमाने । सींघणी-ग्राम्यवास्तव्य ज्योतिरामदेवशुत ज्योतिपीपाशुत अमरेश्वरपठनार्थे लिषितं । शुभं भवतु मंगलं । भग्नपृष्ठकटिग्रीवा । दिव्यदृष्टिरनेकधा । कष्टेन लिखितं चेदं । य्यत्नेन प्रतिपालयेत ।।३ तैलाद्रक्ष जलाद्रक्ष । रक्षे शिथिलबन्धनात् । मूर्षहस्ते गता रक्षे । एवं वदति पुस्तकम् । हरसूर उपाध्याय गुरुनमस्कृत्य येनेदं पुस्तकं ददौ ।"

प्रत्यध्यायमन्ते पाठनिर्देशः—अस्मिन् कोशे प्रत्यध्यायमन्त तइत्थं पाठ उपलभ्यते—

'इति श्री व्वाजशनेयसंहितायां पदपाठने प्रथमोध्यायः ।'

एवमेवाऽऽत्रिंशदध्यायान्तं पाठ उपलभ्यते । तत्र प्रायेण **'व्वाजसनेयीसंहितायां'** **'पदपाठेन'** **'पदेन'** वा इत्येवं पाठभेदमात्रमुपलभ्यते । एकत्रिंशदध्यायादारभ्याऽऽचत्वारिंशदध्यायान्तं दशस्वध्यायेषु **'शाकल्य कृते[3]पदे'** इत्येवं विशिष्टः पाठो दृश्यते । तद्यथा—

"इति श्रीव्वाजसनेयी-संहितायां शाकल्यकृते पदेन एकत्रिंशोध्यायः ।"

---

१. अस्याः पङ्क्त्या मूलपाठः पत्रघर्षणादपमृष्टः, तदुपरि केनचिदवकालजेन लेखकेन अयं पाठो लिखितः । पुनलिखितेऽस्मिन् पाठे ग्रामादिनामानि भ्रष्टानि । शुद्धनामानि उत्तरार्धस्यान्ते निर्दिष्टे पाठे द्रष्टव्यानि ।

२. याज्ञवल्क्यशिक्षायां पदादेर्यकारवकारयोर्गुरुत्वमुपदिष्टम् । वैदिका पदादेर्वकारस्प गुरुत्वद्योतनाय यथा 'व्व' इत्येवं निर्दिशन्ति तथैवात्र हस्तलेखे यकारस्य गुरुत्वद्योतनाय यकारोऽपि 'य्य' इत्येवं लिख्यते ।

३. अस्ति कलकत्तानगरस्थे 'रायल एशियाटिक सोसायटी'नाम्नि पुस्तकालये माध्यन्दिनपदपाठस्यैको हस्तलेखः, तस्यान्तेऽपि 'शाकल्य कृते' इति पाठो दृश्यते । अस्य विवरणमग्रे यथास्थानं द्रष्टव्यम् ।

"इति श्री व्वाजसनेयीसंहितायां शाकल्यकृते पदे चत्वारिंशोऽध्यायः।"

लेखः—सम्पूर्णोऽप्ययं कोश एकेनैव लेखकेन लिखितो वर्तते। मध्ये मध्ये क्वचित् जीर्णेषु पत्रांशेषु पत्रान्तरं संयोज्य लेखकान्तरेण कृता पाठपूर्तिरुपलभ्यते। हस्तलेखोऽयं प्रायेण शुद्धो वर्त्तते।

अक्षरविन्यासः—कोशस्यातिप्राचीनत्वात् केषाञ्चिद् वर्णानां लेखविन्यासो भिन्नप्रकारक उपलभ्यते। तत्र सन्ध्यक्षराणामुपरितना मात्रा वङ्गलिपिवत् पुरस्तान्निर्दिश्यते। तद्यथा—

ादावाः वः=देवो वः।

ात्रे ष्टु ाभ न=त्रैष्टुभेन।

ाद्यो:=द्यौः।

इमां मात्रानिर्देशपद्धतिमाधुनिका विपश्चितः **'पृष्ठमात्रा'** पदेन व्यवहरन्ति। वयं त्वस्याः पद्धतेः कृते **पूर्वमात्रा प्राङ्मात्रा** पदस्य वा व्यवहार उचित इति मनुमः। एषा मात्रानिर्देशपद्धतिश्चतुःशतवर्षेभ्यः प्राचीनेषु देवनागराक्षरलिखितेषु ग्रन्थेषूपलभ्यते।

वैशिष्टचम्—अस्मिन् कोशे बहुविधं वैशिष्ट्यमुपलभ्यते। तत्र द्वित्रिस्थानवर्जं सर्वत्रैवास्मिन् हस्तलेखे मन्त्रपाठानुसारं सकलपदानां पाठ उपन्यस्यते। अन्येषु पदग्रन्थेषु पुनरुक्तानां पदानां मन्त्राणां च पदानि लुप्यन्ते[1] (पदपाठे न पठचन्ते)। तल्लोपाच्च मन्त्रकण्डिकासंख्याभिः सह पदकण्डिकासंख्यानां बहुधा भेदः संजायते। इह पुनरुक्तानां पदानामपि सकलपाठनिर्देशान्न कण्डिकासंख्या मन्त्रसंख्यातो भिद्यते। क्वचित् पुनरुक्तमन्त्रपाठे प्रतीकनिर्देशं कृत्वा सकलपाठलेखनाय स्थानं रिक्तमप्युपलभ्यते।

एतदतिरिक्तमत्र कोशे यत्किञ्चिद्वैशिष्ट्यमुपलभ्यते तत्सर्वं **'माध्यन्दिनपदपाठस्य चतुर्विधः पाठः'** इत्यस्मिन् प्रकरणे विस्तरेण विहितं, तत्तत्रैव द्रष्टव्यम्।

२. ख—अयं हस्तलेखः पूनानगरस्थाद् **भण्डारकर प्राच्यविद्याशोधप्रतिष्ठानाद्** उपलब्धः। अयं कोशस्तत्र संग्रहे 'क्रमाङ्क ८, सन् १८८१, ८२' इत्येवं निर्दिष्टो वर्तते। अस्य विवरणम्—

आकारः—२½ × ११½ 'इञ्च' मितः।

---

१. वैदिका अस्य निर्देशं **'गलितपाठ'** शब्देन कुर्वन्ति।

पङ्क्तयः—प्रतिपृष्ठं ४ चतस्रः।

अक्षराणि—प्रतिपङ्क्ति द्वात्रिंशत्त्रयस्त्रिंशद् वा प्रायेण।

लिपिः—देवनागरी।

लेखनकालः—१६९१ तमो वैक्रमाब्दः, १५५६ तमः शकाब्दः।

पत्राणि—पूर्वार्धे २४३, उत्तरार्धे १७८; आहत्य ४२१ एकविंशत्युत्तरचतुःशतानि सन्ति।

अन्त्यपाठः—पूर्वार्धस्यान्त इत्थं पाठ उपलभ्यते--

"इति पदे विंशतितमोऽध्यायः ।। संवत् १६९१ व शाके १५५६ श्रावणवदि १० लिखितं ।। श्रीरस्तु ।। ॐ नरसिंहाय नमः ।। श्री रामाय नमः ।। ॐ नमः कृष्णाय नमः ।। ॐ नमः श्री विन्दुमाधवाय नमः ।। ॐ नमः विश्वेश्वराय नमः ।।

श्री रामाय नमः ।। श्री कृष्णाय नमः। प्रथमविंशतिपदानि २० ।।"

उत्तरार्धस्यान्ते—

"इति श्रीवाजसनेयसंहितापदे चत्वारिंशतितमोध्या ।। संवत् १६९१ वर्षे मागसरमासे कृष्णपक्षे द्वितीयाया तिथै। श्रीरामाय नमः ।। ।। श्रीरामाय नमः पदपुस्तकं समाप्तं श्रीबिन्दुमाधवाय नम।"

प्रत्यध्यायमन्ते पाठनिर्देशः—

"इति वाजसनेयसꣳहितायां दीर्घपाठे पदे प्रथमोध्यायः।

इति वाजसनीये संहितायाः पदे द्वितीयोध्यायः।

इति वाजसनीये संहिताया दीर्घपाठे तृतीयोध्यायः।

इति वाजसनेय पदसंहितायां एकविंशोध्यायः।"

एवमन्यत्रापि द्रष्टव्यः।

लेखः—पूर्वार्धे ४८ अष्टाचत्वारिंशत्पत्रपर्यन्तस्यैको लेखकः, इतोऽग्रे आग्रन्थसमाप्ति (पूर्वार्धे चोत्तरार्धे च) यावद् अपरो लेखकः वर्णविन्यासः साधुतरः, लेखोऽपि प्रायेण शुद्धः।

३. ग—अयमपि हस्तलेखः पूर्वस्मादेव ग्रन्थागारादुपलब्धः। अयं कोशस्तत्र संग्रहे 'क्रमाङ्क ४४, सन् १८९२-९५' इत्येवं निर्दिष्टः। अस्य विवरणम्—

आकारः—४×८३/४ 'इञ्च' मितः ।

पङ्क्तयः—प्रतिपृष्ठं षट् सप्त वा ।

अक्षराणि—प्रतिपङ्क्ति २६-२८ संख्याकानि ।

लिपिः—देवनागरी ।

लेखनकालः—१८५० तमो वैक्रमाब्दः, १७१५ शकाब्दः ।

पत्राणिः—पूर्वार्धे १७४, उत्तरार्धे १४१; आहत्य ३१५ पञ्चदशोत्तरशतत्रयमितानि ।

अन्त्यपाठः—पूर्वार्धस्यान्ते १७४ तमे पत्र इत्थं पाठ उपलभ्यते—

"इति संहितापदे विंशतितमोऽध्यायः ॥२॥ छ ॥ ओ३म् । इमम् । मे । संवत् १८५० । का शाके १७१५ मार्गशिरमासे कृष्णपक्षे १० गुरौ ब्रह्मपुरी मध्ये वास्तव्य उदीच्य ज्ञातीय आ० जीवणजीसुत मोतीरामेण संहितायाः पदानि आत्मपठनार्थं लिखितानि ॥ परोपकारार्थं च ॥ चिरंजीवभाई संपत्रामस्येदं पुस्तकम् ॥ शुभं भवतु ॥ कल्याणमस्तु ॥"

उत्तरार्धस्यान्ते १४१ तमे पत्रे—

"···असौ । अहम् ॥१४॥ हरिः ओम्३ ॥ खम् । ब्रह्म ॥ इति वाजसनेयसंहिता पदे च··· ।"

इतोऽग्रे पत्रस्य नाशात् पाठः खण्डितो वर्तते ।

प्रत्यध्यायमन्ते पाठनिर्देशः—

"इति पदे प्रथमोध्यायः ।

इति संहितापदे विंशतितमोऽध्यायः ।

इति वाजसनेयपदे संहितायां एकविंशोध्यायः ।

इति वाजसनेय संहितायां पदे चतुस्त्रिंशतिमोध्यायः ।"

इत्येवं प्रकारो द्रष्टव्यः ।

लेखः—अयं सम्पूर्णोऽपि कोश एकेनैव लेखकेन लिखितो वर्तते । ३५ पञ्चत्रिंशत्तमोऽध्यायः स्वरचिह्नविरहितो वर्तते ।

४. घ—अयमपि कोशो भण्डारकरप्रतिष्ठानत एवास्माभिर्लब्धः । अयं कोशस्तत्र संग्रहे 'क्रमाङ्क ३५३, सन् १८८३-८४' इत्येवं निर्दिष्टो वर्तते । अस्य विवरणम्—

आकारः—४×८ 'इञ्च' मितः।

पङ्क्तयः—प्रतिपृष्ठं सप्त वाऽष्टौ वा।

अक्षराणि—प्रतिपङ्क्ति २०-२४ संख्यामितानि।

लिपिः—देवनागरी।

लेखनकालः—१७४१ तमः शकाब्दः (=१८७६ वैक्रमाब्दः)।

पत्राणि—सर्वाणि संकलय्य ३२७ सप्तविंशत्युत्तरशतत्रयमितानि।

अन्त्यपाठः—एकोनविंशस्याध्यायस्यान्ते त्वयं पाठ उपलभ्यते—

"इति पदे संहितायां एकोनविंशोध्यायः। ३१११॥ श्रीराम्॥ छ॥ श्री गंगागोदावरी प्रसन्॥ छ॥ श्री कृष्णाबाई प्रसन्न्॥ श्री रामचन्द्रप्र। सन्॥ छ॥ कृष्णार्पणमस्तु॥ श्री वेदमूर्तिप्रसन्न्।"

उत्तरार्धस्यान्ते—

"……असौ। ब्रह्म॥१४॥ ओम्। खम्॥ ब्रह्म॥१५॥ इतिवाजसनेयसंहितायां पदेषु चत्वारिंशतिमोऽध्यायः। शक १७४०१ प्रमाथिनाम संवत्सरे भाद्रपदबद्धतृतीया सौम्यवासरे तद्दिने तृतीयप्रहरे इदं पुस्तकं समाप्तम्।"

प्रत्यध्यायमन्ते पाठनिर्देशः—

"इति वाजसनेय संहितायां पदे प्रथमोध्यायः।

इति वाजसनेयपदे चतुर्दशोध्यायः।

इति पदे संहितायामेकोनविंशोध्यायः।

इति वाजसनेयपदसंहिताया एकविंशोध्यायः।"

लेखः—अयं कोशो मध्ये मध्ये बहुशः खण्डितः सन् प्रपूरित इत्यनुमीयते। अत एवात्र बहुरूपाणि पत्राणि बहूनां लेखकानां चाक्षरविन्यासो दृश्यते। यद्वाऽयं कोशो बहुभिः खण्डितैः कोशैः प्रपूरितः स्यात्।

५. ङ—अयं कोशो **वाराणसेयसंस्कृतविश्वविद्यालयस्थे** सरस्वतीभवनसंग्रहे विद्यते। अस्य कोशस्य प्रवेशसंख्या ४१२११, संख्या च ००१०५२ वर्तते। अस्य विवरणम्—

आकारः—४·३ × ६·१ 'इञ्च' मितः ।

पङ्क्तयः—प्रतिपृष्ठं प्रायेण १६ षोडश ।

अक्षराणि—प्रतिपङ्क्ति प्रायेण १८ अष्टादश ।

लिपिः—देवनागरी ।

पत्राणि—३०१ संख्यामितानि । पूर्वार्धस्येदं पुस्तकम् ।

अन्त्यपाठः—कोशान्तेऽयं पाठ उपलभ्यते—

"इति वाजसनेयसंहितायां दीर्घपाठे विंशतिमोऽध्यायः ।

विशेषः—अयं कोशः पूर्वार्धस्यैव वर्तते । लेखनकालोऽत्र निर्दिष्टो नास्ति । यद्ययं कोशोऽग्रे निर्दिष्टस्य कोशस्यैव पूर्वभागः स्यात्, तथा सति अस्य लेखनकालः १९३५ तमो वैक्रमाब्दः, १८०० तमः शकाब्दश्च भवितुमर्हति ।

६. च—अयं कोशोऽपि **वाराणसेयसंस्कृतविश्वविद्यालयस्थ**-सरस्वतीभवनस्थ एव । अस्य प्रवेशसंख्या ४१२१२, संख्या च ००१०५३ वर्तते । अस्य विवरणम्—

आकारः—४·२ × ६·१ 'इञ्च' मितः ।

पङ्क्तयः—प्रतिपृष्ठं प्रायेण १६ षोडश ।

अक्षराणि—प्रतिपङ्क्ति प्रायेण १८ अष्टादश ।

लिपिः—देवनागरी ।

लेखनकालः—१९३५ तमो वैक्रमाब्द; १८०० तमः शकाब्दः ।

पत्राणि—८६ षडशीतितमानि । उत्तरार्धस्येदं पुस्तकम्

अन्त्यपाठः—अस्यान्ते त्वयं पाठ उपलभ्यते—

"इति वाजसनेयसंहितायां दीर्घपाठे पदे चत्वारिंशद्दशमोऽध्यायः ॥४०॥ संवत् १९३५ शाके १८०० आश्विन कृष्ण ११ भानुवासरे ।"

विशेषः—पत्राणां सदृशाकाराद् अक्षरविन्यासस्य च सादृश्यादयं कोशः पूर्वनिर्दिष्टस्यैव कोशस्योत्तरभागः प्रतीयते । संग्रहसूचीनिर्मातुः प्रमादात्, संग्रहस्थकोशानां वा संख्यापरिवृद्ध्यर्थमेक एवकोशो विभज्य द्विर्निर्दिष्टः ।

७. छ—अयमपि कोशः **वाराणसेयसंस्कृतविश्वविद्यालयीय-सरस्वतीभवनस्थः**। अस्य प्रवेशसंख्या ६८५०, संख्या च ००१०६२ वर्तते।

अस्मिन् कोशे स्वल्यान्येव पत्राणि सन्ति, पदपाठोऽपि स्वर-विहीन एव। अतोऽयमुपयोगानर्ह एव समपद्यत।

८. ज—अयं कोशोऽस्माभिर्होशियारपुरस्थाद् **विश्वेश्वरानन्द-शोधसंस्थातः** समधिगतः। अयं तत्संग्रहे ७९ एकोनाशीतिसंख्यायां निर्दिष्टो वर्तते। अस्य विवरणम्—

आकारः—४×९ 'इञ्च' मितः।

पङ्क्तयः—प्रतिपृष्ठं ८ अष्टौ।

अक्षराणि—प्रतिपङ्क्ति पञ्चत्रिंशत् प्रायेण।

लिपिः—देवनागरी।

पत्राणि—अयं कोश उत्तरार्धमात्रस्यैव विद्यते। आदौ २, ३, ४ संख्याकानि पत्राणि लुप्तानि सन्ति, एवमन्तेऽपि ८५ पञ्चाशीति पत्रादग्रे चत्वारिंशदध्यायस्य द्वादशमन्त्रभागमारभ्य समाप्तिपर्यन्तो भागो विलुप्तो वर्तते।

लेखनकालः—अस्य कोशस्यान्त्यपत्रस्यानुपलम्भाद् लेखन-कालोऽज्ञात एवास्ति। तथाप्यक्षरविन्यासात् त्रिशतवर्षपूर्वलिखितोऽयं कोशः प्रतिभाति।

लेखः—अस्मिन् कोशे लेखन्याः स्थूलसूक्ष्मभावाद् अक्षराणां स्थूलसूक्ष्मभावेऽपि एकेनैव लेखकेनायं समग्रः कोशो लिखित इत्यक्षर-विन्यासात् स्पष्टं प्रतिभाति।

प्रत्यध्यायमन्ते पाठनिर्देशः—

"इति पदसंहितायामेकविंशतिमोध्यायः।

इति पदसंहिताया एकोनत्रिंशतिमोध्यायः।

इति पदसंहिताया एकोनचत्वारिंशतिमोध्यायः"।

लेखनपद्धतिः—अस्मिन् कोशे पदादौ यकारवकारौ सर्वत्र **'य' 'व'** इत्येवं सामान्यरूपेणैव लिखितौ, केवलम् एकत्रिंशदध्यायस्य षट्सु मन्त्रेषु पदादिर्यकारः 'य़' इत्येवं लिखितो दृश्यते।

९. **झ**--अयं कोशः **कलकत्तानगरस्थे 'रायल एशियाटिक सोसाइटी'**नाम्नि पुस्तकालये वर्तते। अयमस्माभिस्तत्रैव गत्वा समवलोकि। अयं कोशस्तत्संग्रहे १६६०तमे क्रमाङ्के निर्दिष्टो विद्यते। अस्य विवरणम्—

१. अयं हस्तलेख **उत्तरार्धमात्रस्यैव** विद्यते। अस्मिन् ग्रन्थेऽष्टाविंशत्यध्यायस्य द्वितीयमन्त्रं यावत् (४४ पत्रं यावद्) स्वराङ्कमुपलभ्यते, नेतः परम्।

२. अस्मिन् कोशे १०२ द्व्युत्तरशतमितानि पत्राणि सन्ति।

३. कोशान्ते च **'इति शाकल्यकृतपदे विंशतिमोऽध्यायः'** इत्येवं पाठ उपलभ्यते।

अत्र चत्त्वारिंशत्तमोऽध्याय एवोत्तरार्धस्याध्यायसंख्यामाश्रित्य विंशतितमया संख्ययाऽभिहितो ज्ञेयः।

मुद्रित-पदग्रन्थाः

१०. **ञ**—काश्यां गौरीशयन्त्रालये मुद्रितः पत्राकारः स्थूलाक्षरयुतः। अस्मिन् कोशे संयुक्तव्यञ्जनानां प्रायेण यथायथं द्वित्वनिर्देशः, यकारवकारयोश्चापि साम्प्रदायिकनिर्देश उपलभ्यते। स्वरसंचारे केषुचिद् विशिष्टेषु स्थलेषु भेद उपलभ्यते। अयं भेदः **'माध्यन्दिनपदपाठपरिचय'**प्रकरणे **'माध्यन्दिनपदपाठस्य चतुर्विधः पाठः'** इत्यस्मिन् प्रकरणे च निरूपितः, स तत एवावगन्तव्यः। अस्माभिस्त्वयं स्वरसंचारभेदो यथास्थानं **'इति काशिकः पाठः'** इत्येवं रूपेण टिप्पण्यां संगृहीतः। अयं कोशः प्रायेणाशुद्धिबहुलो वर्तते।

११. **ट**—अयं पदपाठग्रन्थो मुम्बय्यां तत्त्वविवेचक-यन्त्रालये मुद्रितः पत्राकारो मध्यमाक्षरयुतः। अस्मिन् पदपाठे प्रायेण रेफोत्तरवर्तिन एव व्यञ्जनस्य द्वित्वमुपलभ्यते। अयं ग्रन्थः काशीमुद्रितापेक्षया शुद्धः।

१२. **ठ**—श्रीमद्दयानन्दसरस्वतीप्रणीते यजुर्वेदभाष्ये मुद्रितः पदपाठः। अस्य प्रथमं तृतीयं च संस्करणमस्माभिरिहोपयुक्तम्। अनयोः संस्करणयोः क्वचिद् भेदोऽपि दृश्यते। इह पदपाठे लुप्तानि सर्वाणि पदानि मन्त्रपाठवत् यथास्थानं पठितानि। प्रपूरितेषु पदेषु क्वचित् स्वरराहित्यं, स्वरान्यथानिर्देशः, अवग्रहाभावः, अव-

ग्रहान्यथानिर्देशः, इतिपदेनावेष्टनाभाश्चेत्येवं रूपा लिपिकृतो बहवो दोषा उपलभ्यन्ते ।

१३. ड—अयं पदपाठः श्रीपण्डितब्रह्मदत्तजिज्ञासुभिः संशोधिते स्वकृतविवरणेन परिबृंहिते श्रीमद्दयानन्दसरस्वतीप्रणीतयजुर्वेदभाष्ये (प्रथमे भागे) मुद्रितो ज्ञेयः । अस्य ग्रन्थस्य काश्यां मुद्रितं द्वितीयं संस्करणमिहोपयुक्तम् । यद्यप्यत्र संयुक्तानां वर्णानां द्वित्वपाठः, पदाद्योश्च यकारवकारयोः साम्प्रदायिकपद्धत्या निर्देशो नास्ति, तथाऽप्यत्र 'ठ' ग्रन्थस्था लिपिकरदोषा न सन्ति । स्वरसंचारे चायं माध्यन्दिनपाठस्य काशिकं (काश्यां मुद्रितं) पाठमनुसरति ।

इत्युपयुक्तानां कोशानां विवरणं समाप्तम् ॥

वैदिकपदपाठानां तुलनात्मकमध्ययनम्

वैदिकवाङ्मये संहिताग्रन्थानामनन्तरं तत्पदग्रन्थानां विद्यते विशिष्टं स्थानमित्यत्र नास्ति कश्चिद विवादावसरः। इमे हि पदग्रन्थाः संहितापाठं विच्छिद्य पदस्वरूपप्रदर्शनेन, अवग्रहद्वारा प्रकृतिप्रत्ययविभागनिदर्शनेन पूर्वोत्तरपदविज्ञापनेन च मन्त्रार्थपरिज्ञाने महान्तमुपकारं विदधतीति सर्व एव वैदिका विद्वांसः स्वीकुर्वते। एतेन पदग्रन्थाः संहितानां संक्षिप्ततमा आद्या व्याख्याग्रन्था इत्यपि शक्यते निःसंशयं वक्तुम्।

तत्र प्रतिसंहितं पदप्रवचनप्रकारः प्रायेण भिद्यते। तत्तत्संहितानां पदप्रवचननियमास्तत्तत्प्रातिशाख्यग्रन्थेषु विस्तरेण प्रदर्शिताः सन्ति। तदनुसारं पदपाठानां तुलनात्मकमध्ययनं तात्कालिकानां विविधव्याकरणनियमानां परिज्ञाने महत् साहाय्यं विदधाति। बहुत्र च तादृशां संस्कृतभाषातो विलुप्तानां पदानां प्रकृत्यन्तराणां वा सद्भावं प्रदर्शयति, येषां कृते पाणिन्यादयो वैयाकरणा आदेशागमवर्णविकारान् उपदिशन्ति[१]।

सर्वेषु पदग्रन्थेषु सामपदपाठो महद् वैलक्षण्यं भजते। यत्रान्ये पदकारा ऐकमत्येन अविभागार्हं पदं मन्वाना अवग्रहं न प्रदर्शयन्ति, सामपदकारस्तु तत्रापि प्रायेणावग्रहं प्रदर्शयति। सामपदग्रन्थस्येदं वैशिष्ट्यमुपरिष्टाद् यथास्थानं निदर्शयिष्यते। इह तावत् सामान्येन पदग्रन्थानां प्रवचनप्रकारो यथायथं प्रविभज्य प्रदर्श्यते—

---

१. पाणिनीयव्याकरणे प्रकृत्यंशे निर्दिशिता लोपागमादेशादयो लुप्तानां प्रकृत्यन्तराणां ज्ञापका, इत्यस्मिन् विषये आस्माकीनः 'आदिभाषायां प्रयुज्यमानानामपाणिनीयप्रयोगाणां साधुत्वविवेचनम्' नामा निबन्धो द्रष्टव्यः। अयं वेदवाण्याश्चतुर्दशवर्षस्य प्रथमद्वितीयचतुर्थपञ्चषष्ठाङ्केषु प्रकाशितः।

१—अवगृह्यमाणपदेषु प्रवचनप्रकारः

प्रथमं तावद् अवगृह्यमाणानां पदानां प्रवचनप्रकार उच्यते—

क—ऋगथर्वपदेषु सावग्रहं पदम् अवगृह्यैव सकृत् प्रदर्श्यते। तद्यथा—

पुरःऽहितम्। ऋ० १।१।१॥ चित्रश्रवःऽतमः। ऋ० १।१।५॥
त्रिऽसप्ताः। अ० १।१।१॥ परिऽयन्ति। अ० १।१।१॥

ख—शुक्लकृष्णयजुःपदपाठेषु अवगृह्यमाणं पदमितिना पूर्वं निर्दिश्य पश्चादवगृह्यते। तद्यथा—

[1]श्रेष्ठतमायेतिश्रेष्ठ तमाय। शु० य० १।१॥

प्रजावतीरितिप्रजा वतीः। शु० य० १।१॥

श्रेष्ठतमायेतिश्रेष्ठ तमाय। तै० सं० १।१॥

प्रजावतीरितिप्रजा वतीः। तै० सं० १।१॥

मैत्रायणीयपदग्रन्थेऽपि द्विरावृत्तिर्भवति, परन्तु तत्रैकः कोशोऽवग्रहोत्तरभागस्थस्वरनिर्देशे शुक्लयजुषः पदपाठमनुसरति, अपरश्च तैत्तिरीयपदपाठम्। तद्यथा—

[2]श्रेष्ठतमायेतिश्रेष्ठ तमाय। श्रेष्ठतमायेतिश्रेष्ठ तमाय। मै० १।१।१॥

ग—सामपदग्रन्थेऽप्यवग्रहनिदर्शनाय द्विरावृत्तिः क्रियते, परन्तु तत्रावगृह्यमाणेन मन्त्रपदेन सहेतिपदं न पठ्यते। तद्यथा—

३ १ २ ३ २ ३
हव्यदातये हव्य दातये। सा० पू० १।१।१॥

---

१. माध्यन्दिनपदपाठे संहितेव व्यञ्जनानां द्विर्वचनरूपः यो यथायथं पाठ उपलभ्यते, तदपमृज्येह प्रदर्शनं लाघवाय ज्ञेयम्।

२. मैत्रायणीयस्वराङ्कनप्रकार ऋगथर्वयजुषां स्वराङ्कनप्रकाराद् भिद्यते। इह तु मैत्रायणीयपदनिदर्शनाय ऋग्यजुरथर्वसु सामान्येनादृतः स्वराङ्कनप्रकारः स्वीकृतो विस्पष्टार्थम्।

३ १ २ ३ २ ३
विश्ववेदसम् विश्व वेदसम् । स० पू० १।१।१ ॥

अत्रावग्रहकाले पूर्वभागान्ते वर्तमान उदात्तो विरामे वर्तमानोदात्त इव '२' द्वयङ्केन[1] निर्दिश्यते, उत्तरभागश्च तैत्तिरीयपदवत् स्वतन्त्रपद इव पूर्वभागान्ते वर्तमानादुदात्तात् स्वरिताद्वा यथायोगं स्वरितत्वमैकश्रुत्यं वा न लभते।

घ—इवपदप्रयोगे केचन पदकारा इवेन समासमाश्रित्यावग्रहं प्रदर्शयन्ति, अपरे 'इव' शब्दं स्वतन्त्रं पदं मन्यन्ते। तद्यथा—

इवपदेन समासस्तावत्—

पिताऽइव । ऋ० १।१।९; अथर्व० २।१३।१ ॥

पितेवेतिपिता इव । शु० य० ३।२४ ॥

पितेवेतिपिता इव, पितेवेतिपिता इव । मै० १।५ ॥

इह मैत्रायणीयपाठे पूर्ववदेव कोशभेदेनावग्रहोत्तरभागे द्विविधः स्वरसंचारो ज्ञेयः।

इवपदस्य स्वातन्त्र्यम्—

पिता । इव । तै० सं० १।५।६ ॥

राजा । इव । तै० सं० १।२।१४ ॥

१ २र ३
चर्म । इव । सा० पू० २।६।८ ॥

१ २र ३
महिषी । इव । सा० पू० १।६।६ ॥

अत्रेदमपि ज्ञेयम्—सूत्रकारः पाणिनिरिवेन समासं नेच्छति, वार्तिककारस्तु '**इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च**' (वा० २।२।१८) इत्यनेन समासं विदधाति।

---

१. द्र० अस्मदीया वैदिकस्वरमीमांसा। पृष्ठ २०३, सूत्र १६; पृष्ठ १५६, सूत्र ५३।

२–प्रगृह्यत्वनिदर्शनप्रकारः

प्रगृह्यत्वनिदर्शनाय यद्यपि सर्वेषु पदग्रन्थेष्वितिना निर्देशः सामान्यरूपेणोपलभ्यते, तथापि प्रगृह्यत्वनिदर्शनप्रकारः पदग्रन्थेषु बहुधा भिद्यते—

क—ऋक्सामाथर्वतैत्तिरीयमैत्रायणपदपाठेषु यत्र केवला प्रगृह्यसंज्ञैव निदर्शनीया भवति, तत्र केवलमितिपदं परं प्रयुज्यते । तद्यथा—

वायो इति । ऋ० १।२।३; अ० ६।६८।१ ॥

त्वे इति । सा० पू० १।१।३ ॥ **अस्मे इति** । सा०पू० २।१।३ ॥

विष्णो इति । तै० १।१।३; मै० १।१।३ ॥

अत्रेदमपि ध्येयम्—तैत्तिरीयपदपाठे ओकारान्तं सम्बुद्ध्यन्तं पदं प्रगृह्यत्वमप्रगृह्यत्वं चोभयं लभते, तस्य व्याख्यानमनुपदं (ग-सन्दर्भे) द्रष्टव्यम् ।

ख—शुक्लयजुषः पदपाठे प्रगृह्यत्वनिदर्शनाय मन्त्रपदमितिना निदर्श्य पुनरपि पठ्यते । तद्यथा—

विष्णो इति विष्णो । य० १।४ ॥

अयं प्रकारः प्रातिशाख्यकारैरुपस्थितपदेन स्मर्यते (द्र० का० प्रा० ४।९०) । पाणिनीयेऽपि '**अप्लुतवदुपस्थिते**' (अ० ६।१।१२५) इत्यस्मिन् सूत्रे तथैव व्यवहारो दृश्यते ।

ग—तैत्तिरीये पदपाठे सम्बुद्ध्यन्तमोकारान्तं पदं प्रगृह्यत्वमप्रगृह्यत्वं चोभयं लभते । तत्रेयं व्यवस्था—

यत्र मन्त्रपाठे सम्बुद्ध्यन्ताद् ओकारान्तात् पदात् परं व्यञ्जनाद्युत्तरपदं भवति, तत्र सम्बुद्धिनिमित्तकोऽयमोकार इति प्रदर्शनाय निरवग्रहं सावग्रहं चोभयरूपं पदमितिना संयोज्य प्रगृह्यत्वरूपेण प्रदर्श्यते । तद्यथा—

निरवग्रहं पदम्—

विष्णो हव्यम्—विष्णो इति । तै० १।१।३ ॥

सावग्रहं पदम्—

शतक्रतो या—शतक्रतो इतिशत क्रतो ।

तै० १।६।१२ (१) ॥

यत्र तु मन्त्रपाठे सम्बुद्धिनिमित्तक ओकार उत्तरपदादिस्वरेण सन्धि लभते तत्र निरवग्रहं पदं विनेतिना पठ्यते, सावग्रहं च पदमितिना सन्धि लभते । तद्यथा—

निरवग्रहं पदम्—

विष्णवुत—विष्णो । तै० १।२।१३ ॥

सावग्रहं पदम्—

शतक्रतवुद्वंशम्—शतक्रतविर्तिशत-क्रतो ।

तै० १।६।१२ (३) ॥

कृशानवेते—कृशानविर्तिकृश-अनो । तै० १।२।७ ॥

घ—सामपदकारस्तु सम्बुद्धवोकारान्तस्य पदस्य सर्वथा प्रगृह्यत्वं नेच्छति । तेन तत्रेतिकारो न प्रयुज्यते । तद्यथा—

विभावसो विभा वसो । सा० पू० १।६।६; ३।२।१० ॥

पुरूवसो पुरु वसो । सा० पू० ३।६।८ ॥

ङ—यत्र पदे प्रगृह्यत्वनिदर्शनेन सहावग्रहनिर्देशोऽपि कर्तव्यो भवति, तत्रेतिना प्रगृह्यत्वं निदर्श्य तत्पदं पुनरावर्त्यावग्रहः प्रदर्श्यते । तद्यथा—

द्रवत्पाणी इति द्रवत्ऽपाणी । ऋ० १।१।३ ॥

छन्दःपक्षे इति छन्दःऽपक्षे । अथर्व १।१।३ ॥

शतक्रतो इति शत-क्रतो[१] । तै० १।६।१२ (१) ॥

---

१. एतस्मिन् विषये पूर्वत्र (ङ-संदर्भे) विशेषेणोक्तं तदिहाप्यनुसन्धेयम् ।

च—साम्नः पदग्रन्थे तु यत्र प्रगृह्यत्वावग्रहत्वयोरेकस्मिन्नेव पदे निर्देश इष्यते, तत्र मन्त्रपदं यथावत् पठित्वा पुनरावृत्तौ पूर्वमवगृह्य चेतिना प्रगृह्यत्वं प्रदर्श्यते। तद्यथा—

विषुरूपे विषु रूपे इति । सा० पू० १।८।३ ॥

अहनी अ हनी इति । सा० पू० १।८।३ ॥

अत्रेदमप्यवधेयम्—अन्ये पदकाराः '**अहनी**' इत्येतत् पदं नावगृह्णन्ति । पदावग्रहविषये सामपदग्रन्थोऽन्यपदग्रन्थेभ्योऽत्यन्तं वैलक्षण्यं भजत इत्युक्तं पुरस्तात् । तस्य च निदर्शनमग्रे यथास्थानं करिष्यते।

३—उपसर्ग-निर्देश-प्रकारः

संहितापाठे उपसर्गो द्विधा प्रयुज्यते—स्वतन्त्रपदत्वेन क्रियया समस्य च । तत्र यः समस्य प्रयुज्यते, तत्र तन्निर्देशे यथापदपाठं तत्तन्निर्देशप्रकार उपयुज्यते । यस्तु स्वतन्त्रपदत्वेन प्रयुज्यते, स ऋगथर्वसामशुक्लयजुषां पदपाठेष्वन्यस्वतन्त्रपदमिव पठ्यते, परन्तु तैत्तिरीयपदग्रन्थे स इतिना निर्दिश्यते। यत्र च तत्रैव द्वयोरुपसर्गयोः स्वतन्त्रपदत्वेन सहपाठ उपलभ्यते, तत्र पर इतिना संयुज्यते न पूर्वः । तद्यथा—

एकोपसर्गस्य—

प्रेति । तै० १।१।१ ॥ **अन्विति** । तै० १।२।३ ॥

द्वयोरुपसर्गयोः—

संप्रयच्छति—सम् । प्रेति । यच्छति । तै० ६।३।२ ॥

अनुप्रेहि—अनु । प्रेति । इहि । तै० १।१।१० ॥

मैत्रायणीयपदपाठस्यैकस्मिन् कोशे उपसर्गनिर्देशस्तैत्तिरीयपदग्रन्थस्येवेतिना निर्दिश्यतेऽपरस्मिन्नन्यपदग्रन्थवत् विनैवेतिना।[1]

---

१. मैत्रायणीयपदकोशेष्वेके शुक्लयजुषः पदग्रन्थमनुसरन्ति, अपरे तैत्तिरीयपदपाठमित्युक्तं पुरस्तात् (पृष्ठ १२)।

४—अवगृह्यमाणपदेषु स्वराङ्कनप्रकारः

अवगृह्यमाणपदेषु स्वराङ्कनविषयेऽपि पदग्रन्थेषु बहु वैमत्य-मुपलभ्यते । तद्यथा—

क—ऋगथर्वशुक्लयजुषां पदपाठेष्ववगृह्यमाणपदस्योत्तर-भागः पूर्वभागस्थं स्वरमनुरुध्य संहितावत् स्वरं लभते, अर्थात् पूर्वभागस्थमुदात्तं स्वरितं वाश्रित्य उत्तरभागस्थमनुदात्तं यथाक्रमं स्वरितत्वमैकश्रुत्यं च लभते । यथा—

उदात्तात्स्वरितत्वम्—

घृतऽप्रतीकः । ऋ० ३।१।१८ ।। अथर्व० २।१३।१ ।।

प्रजावतीरितिप्रजा वतीः । शु० य० १।१ ।।

स्वरितादैकश्रुत्यम्—

अग्निऽस्वात्ताः । ऋ० १०।१५।१ ।। अथर्व १८।३।४४ ।।

श्रेष्ठतमायेतिश्रेष्ठ तमाय । शु० य० १।१ ।।

इदमप्यवधेयम्—उक्तपदपाठेषु यत्र प्रगृह्यत्वावग्रहत्वादि-निर्देशाय इतिपदं पदग्रन्थेषु प्रयुज्यते तत्र यदि मन्त्रपदं सर्वानुदात्तं भवन्ति तत्र पूर्वोत्तरावुभावपि भागौ इतिपदस्य तकारोत्तरवर्त्तिनं स्वरितमिकारमाश्रित्यैकश्रुत्यं प्राप्नुतः । तद्यथा—

चित्रभानो इति चित्र भानो ।

ऋ० १।३।४ ।। अ० २०।८४।३ ।। शु० य० २०।८७ ।।

शतक्रतोऽइतिशत क्रतो । शु० य० ३।४९ (पदग्रन्थे[1] ३।४८)

ख—साम्नः पदग्रन्थे काण्वे तैत्तिरीये चावग्रहस्थलेषूत्तरभागस्य स्वतन्त्रपदत्वमाश्रित्य पूर्वभागनिमित्ता स्वरितत्वैकश्रुत्योः प्रवृत्ति-रुत्तरभागे नोपलभ्यते । तद्यथा—

---

१. माध्यन्दिनपदपाठे पुनरुक्तानां पदानां लोपाद् यत्र मन्त्रपदकण्डिका-संख्यासु मिथो भेदो जायते तत्र उभयोः कण्डिकासंख्याऽत्र निर्दिष्टा ।

३२१ ३२ ३
बृहदनीकः बृहत् अनीकः । सा० पू० १।६।१० ॥

१ २र १ २र ३
वाजकर्मभिः वाज कर्मभिः । सा० पू० २।२।२ ॥

प्रजावतीरितिप्रजा वतीः । का० १।१; तै० १।१।१ ॥

श्रेष्ठतमायेतिश्रेष्ठ तमाय । का० १।१; तै० १।१।१ ॥

एतादृशेषु स्थलेषु मैत्रायणीयपदपाठस्यैकः कोशस्तैत्तिरीयपदक्रममवरुणद्धि, अपरः शुक्लयजुष इत्युक्तं प्राक् ।

ग—अवगृह्यमाणपदेषु यत्रोत्तरभाग आद्युदात्तो भवति पूर्वभागश्च सर्वानुदात्तस्तत्र शुक्लयजुषः पदपाठे संहितावत् स्वरविधानमाश्रित्य पूर्वभागान्ते वर्त्तमानस्यानुदात्तस्य उत्तरभागादौ वर्तमानमुदात्तमाश्रित्य स्वरितत्वं (अष्टा० ८।४।६७) ऐकश्रुत्यं (अष्टा० १।२।४०) च न भवति, अर्थादनुदात्त एवावतिष्ठते । तैत्तिरीयपदपाठे तूत्तरभागस्य स्वतन्त्रपदत्वस्याऽऽश्रयणात् पूर्वभागस्यानुदात्तस्य स्वरितत्वमैकश्रुत्यं चोपलभ्यते । तद्यथा—

अनुष्टुप् । अनुस्तुबित्यनु स्तुप् ।

शु० यजु० ८।४७ (पदग्रन्थे ८।४१) ।

अनुष्टुबित्यनु स्तुप् । तै० १।८।१३ ॥

इह तैत्तिरीयपदग्रन्थे उत्तरभागस्य स्वतन्त्रपदत्वाश्रयणात् 'स्तु' इत्युदात्तपरेऽपि 'नु' इत्यनुदात्तस्यैकश्रुत्यं भवति, अर्थात् **'उदात्तस्वरितपरस्य सन्नतरः'** (अष्टा० १।२।४०) इति नियमो न प्रवर्तते ।

घ—माध्यन्दिनपदपाठेषु यत्रावग्रहाद् उत्तरभागे उत्तम[1] उपोत्तमो वोदात्तो भवति, तस्माच्च पूर्वं द्वौ वा त्रयो वाऽनुदात्ता भवन्ति, तादृशस्थलेषु एकस्मिन् कोशे[2] उदात्तपूर्वम् अनुदात्तं विहायाऽपरोऽपरौ वानुदात्तौ पूर्वभागस्थादुदात्तादैकश्रुत्यं लभेते । अपरेषु कोशेषु

---

१. त्रिप्रभृतीनामन्त्य उत्तम इत्युच्यते, तत्पूर्वश्चोपोत्तमः, द्र० काशिका ४।१।७८ ॥

२. अयं पाठः काशीमुद्रिते पदपाठे दृश्यते ।

तैत्तिरीयपदग्रन्थ इवोत्तरभागस्य स्वातन्त्र्यविवक्षयां अनुदात्तत्व-मेवोपलभ्यते । तद्यथा--

प्रथमपक्षे—

विजानतऽइतिंवि जानतः । मा० य० ४०।७ ॥

विचचक्षिरऽइतिंवि चचक्षिरे । मा० य० ;४०।१० ॥

परिवत्सरायेतिंपरि वत्सराय ।

मा० य० ३०।१५ (पदपाठे ३०।१३) ॥

अत्र प्रथमोदाहरणे 'जा' इत्येकः, द्वितीयोदाहरणे **'चच'** इति द्वौ, तृतीयोदाहरणे **'व'** इत्येकोऽनुदात्त ऐकश्रुत्यं भजते ।

अपरपक्षे—

विजानातऽइतिंवि जानतः । मा० य० ४०।७ ॥

विचचक्षिरऽइतिंवि चचक्षिरे । मा० य० ४०।१० ॥

परिवत्सरायेतिंपरि वत्सराय ।

मा० य० ३०।१५ (पदपाठे ३०।१३) ॥

अस्मिन् पाठे तैत्तिरीयपदग्रन्थ इवानुदात्ता एवावतिष्ठन्ते ।

अयं च स्वरभेदो माध्यन्दिनकोशेषु नियतरूपेणोपलभ्यते । विशेषविचारस्तु **'माध्यन्दिनपदपाठस्य वैशिष्टचम्'** इत्यस्मिन् प्रकरणे द्रष्टव्यः ।

ङ—काण्वपदपाठस्यैकः कोशोऽस्माभिः कलकत्तानगरस्थे रायलएशियाटिकसोसाइटीनाम्नि ग्रन्थालये दृष्टः । तस्मिन् कोशे आवेष्टने क्रियमाणे इतिशब्दस्यान्त्यात् स्वरितादिकारात् पराणि अवगृह्यमाणपदस्य पूर्वभागस्थान्यप्यनुदात्तानि ऐकश्रुत्यं न लभन्ते । तद्यथा—

सजातवनीतिंसजात ऽ वनिं । १।६।३ ॥

कुमारीपुत्रमितिंकुमारी ऽ पुत्रम् । ३४।१।६ ॥

धनुःकारमितिंधनुः ऽ कारम् । ३४।१।७ ॥

च—काण्वपदपाठस्यैकस्मिन् कोशे उदात्तानुदात्तस्वरितानां त्रयाणामपि स्वराणां चिह्नान्युपलभ्यन्ते । अवग्रहोत्तरभागे च स तैत्तिरीयक्रममवरुणद्धि । तद्यथा—

प्रजाॅवतीरितिप्रजाॅ वतीः । १।१।२ ॥[1]

अत्राक्षरस्याधस्तान्निर्दिष्टं ‿ चिह्नमनुदात्तं द्योतयति, उपरिभागे वर्तमानं ॅ चिह्नम् उदात्तम्, एवमुपरिवर्तमानं ऽ चिह्नं स्वरितं च ।

मैत्रायणीयसंहितायाम् ऋग्वेदस्य कश्मीरपाठे चोदात्तस्वरनिर्देशायाक्षरस्युपरिभागे ꠲ इत्येवमूर्ध्वरेखा निर्दिश्यते (अन्यत्रेदं चिह्नं स्वरितार्थं व्यवह्रियते) ।

५—अवग्रहे विसंवादः

अवग्रहविषयेऽपि पदपाठेषु बहुत्र विसंवाद उपलभ्यते—

क—सन्ति कानिचिदेतादृंशि पदानि यान् केचन पदकारा अवगृह्णन्ति, अपरे नावगृह्णन्ति । तद्यथा—

अधीवासमित्यधि वासम् । तै० ४।६।६ ॥

अधीवासम् । अधिवासमित्यधि वासम् ।

शु० य० २५।३६ (पदपाठे २५।३७), [2]मै० ३।१६।१ ॥

ऋग्वेदे काण्वे च पदपाठे 'अधीवासम्' नावगृह्यते । द्र० ऋ० १।१४०।६; काण्व० २७।१४।१ ॥

ख—कतिपयान्येतादृशान्यपि पदानि सन्ति यत्रावग्रहं कुर्वन्तः केचन पदकारा पूर्वभागे विद्यमानं दीर्घत्वं छान्दसमितिमन्यमाना ह्रस्वयन्ति, अपरे तानि प्रकृतिदीर्घाणीति मत्वा न ह्रसयन्ति । तद्यथा—

---

१. द्र० वैदिकवाङ्मय का इतिहास 'वेदों के भाष्यकार' पृष्ठ १५७ ।

२. मैत्रायणीयपदग्रन्थस्योदाहरणान्यस्माभिः मैत्रायणीसंहितायाः 'लिपजिग' संस्करणे यत्र तत्र निर्दिष्टपदपाठेभ्यः संगृहीतानि ।

अशीतम । अशितमेत्यशि तम । मा० २।२० ॥

प्लीहाकर्णः । प्लीहुकर्णऽइतिप्लीहु कर्णः । मा० २४।४ ॥

शुण्ठाकर्णः । शुण्ठकर्णऽइतिशुण्ठ कर्णः । मा० २४।४ ॥

काण्वानां मते एषु पदेषु—

अशीतमेत्यशी तम । २।५।१ ॥

प्लीहाकर्णऽइतिप्लीहा कर्णः । २६।१।७ ॥

शुण्ठाकर्णऽइतिशुण्ठा कर्णः । २६।१।७ ॥

इत्येवं दीर्घत्वमेव पूर्वपदस्येष्टम्, न ह्रस्वत्वम् । तदुक्तम्—

अशीतमः—काण्वानामिदं प्रकृतिदीर्घम्, पदपाठेऽपि ह्रस्वाभावात् । द्र० का० प्राति० ३।१२९ सूत्रेऽनन्तव्याख्यानम् ।

'प्लीहाकर्णशुण्ठाकर्णौ प्रकृतिदीर्घौ' इति कात्यायनप्रातिशाख्यवचनं व्याचक्षाणोऽनन्तभट्ट आह—**तेन काण्वव्यतिरिक्तानां केषाञ्चित् पदकाले ह्रस्वपाठो भवति—**

इदमप्यत्रावधेयम्, प्रातिशाख्यव्याख्याताऽनन्तभट्टः काण्वशाखाध्यायी वर्तते इति ।

ग—कानिचित् पदान्येतादृशान्यपि विद्यन्ते यत्र वैयाकरणैरात्वादेशो विधीयते (द्र० अष्टा० ६।३।४५-४८), तान्यपि केचन पदकाराः प्रकृतिदीर्घाणीति मन्वानास्तथैवावग्रहयन्ति । तद्यथा—

महाव्रीहीणामितिमहा व्रीहिणाम् । तै० १।८।१२ ॥

अष्टाचत्वारिंशतः । अष्टाचत्वारिंशत इत्यष्टा चत्वारिंशतः । मै० २।२।६ ॥

घ—इत्थमेव तैत्तिरीयास्तत्राप्यवग्रहं निदर्शयन्ति यत्र वैयाकरणाः **'देवताद्वन्द्वे च'** (अष्टा० ६।३।२५) इति नियमेन पूर्वपदस्यानङादेशं विदधति । तद्यथा—

अग्नाविष्णू इत्यग्ना विष्णू । तै० १।१।१२ ॥
इन्द्रावरुणावितीन्द्रा वरुणौ । तै० २।३।१३ ॥
इन्द्राबृहस्पती इतीन्द्रा बृहस्पती । तै० ३।३।११ ॥

अन्ये पदकारास्तु द्वन्द्वसमासेऽवग्रहमेव न प्रदर्शयन्ति । तदेतद् अग्रे वक्ष्यते ।

६—सांहतिकदीर्घत्वषत्वणत्वविषये

पदकारा यत्र सांहतिकं दीर्घत्वं षत्वं णत्वं वा मन्यन्ते तत्र पदनिदर्शने विवदन्ते—

क—शुक्लयजुःपदपाठे मैत्रायणीये च प्रथम यथारूपं छान्दसं पदं निर्दिश्य, सांहतिकं कार्यमपमृज्येतिनाऽऽवेष्टयन्ति । तद्यथा—

दीर्घत्वस्य—

मामहानः । ममहानऽइतिममहानः ।
शु० य० १७।५५ (पदपाठे १७।५१), मै० २।१०।५ ॥

षत्वस्य—

त्रिष्टुप् । त्रिस्तुबितित्रि स्तुप् । शु० य० १०।११ ॥
मध्यमेष्ठेयाय । मध्यमेस्थेयायेतिमध्यमे स्थेयाय ।
मै० २।१२।५ ॥

णत्वस्य—

प्रणिनाय । प्रनिनायेतिप्र निनाय ।
शु० य० ५।४३ (पदपाठे ५।४१)

तैत्तिरीयसंहितापदपाठे यथारूपं छान्दसं पदमेवेतिना निदर्श्य षत्वणत्वविरहितं रूपमावर्त्यते । तद्यथा—

अनुष्टुबित्यनु स्तुप् । तै० १।८।१३ ॥
प्रणिनायेतिप्र निनाय । तै० १।३।५ ॥

'मामहानः इत्यादिषु यत्रान्ये पदकाराश्छान्दसं दीर्घत्वं मन्यन्ते, तत्र तैत्तिरीयपदकारः स्वाभाविकं दीर्घत्वं मत्वा न ह्रसयति । तद्यथा—

मामहानः । तै० ४।६।३ ॥

ग—ऋग्वेदाथर्ववेदयोरेतादृशेषु स्थलेषु पदकारा सांहतिकं कार्यमपमृज्य सकृदेव लौकिकं रूपमासाद्य पठन्ति । तद्यथा—

दीर्घत्वस्य—

ममहानम् । ऋ० १।११७।१७ ॥

षत्वस्य—

त्रिऽस्तुप् । ऋ० १०।१४।१६ ॥ अ० ८।६।२० ॥

णत्वस्य—

प्रऽनियार्य । ऋ० ३।८।११ ॥

प्रऽनीयते । अ० ६।२३।२ ॥

घ—सन्ति वेदे केचन लेट्लकारस्य वैयाकरणदृशा (अष्टा० ३।४।९४) अडाडागमयुक्तानि पदानि, तत्र आडागयुक्तेषु पदेषु छान्दसदीर्घत्वं मत्वा मैत्रायणीये पदग्रन्थे ह्रस्वत्वं प्रदर्श्यते । तद्यथा—

यजासि । **यजसीतियजसि** । मै० २।७।१ ॥

अपरेषु पदपाठेषु 'यजासि' इत्येवोच्यते ।

ङ—'**दाधार**' इत्येतत् पदमेतादृग् वर्तते यत्र पाणिनीयमतेन (६।१।७) 'मामहानः तूतुजानः' इव अभ्यासस्य दीर्घत्वं विधीयते, परन्तु पदकाराः पदकाले नेदं ह्रसयन्ति ।

७—द्वन्द्वसमासेऽवग्रहे मतभेदः

यत्र यत्र वैदिकपदेषु द्वन्द्वसमासो भवति, पदकाले तेषामवग्रह-विषयेऽपि विसंवाद उपलभ्यते । तद्यथा—

क—ऋगथर्वशुक्लयजुषां पदकारा द्वन्द्वसमासेऽवग्रहं न प्रदर्शयन्ति । तद्यथा—

अग्नाविष्णू इति । अथर्व ७।३०।१ ॥

इन्द्राबृहस्पती इति । ऋ० ४।४९।५ ॥

इन्द्रावरुणौ । ऋ० ६।६८।१ ॥

शुक्लयजुषः पदपाठे यत्र द्वन्द्वसमासे प्रगृह्यत्वं भवति तत्राऽवग्रहाभावेऽपीतिनाऽऽवेष्टयन्ति । तद्यथा—

इन्द्राबृहस्पतीऽइतीन्द्राबृहस्पती । मा० २५।६ ॥

ख—तैत्तिरीयपदपाठे तु द्वन्द्वसमासेऽप्यवग्रहः प्रदर्श्यते । तद्यथा—

अग्नाविष्णू इत्यग्ना विष्णू । तै० १।१।१२ ॥

इन्द्राविष्णू इतीन्द्रा विष्णू । तै० ३।२।११ ॥

इन्द्राबृहस्पती इतीन्द्रा बृहस्पती । तै० ३।३।११ ॥

८—नञ्समासेऽवग्रहविषये वैमत्यम्

क—ऋगथर्वशुक्लकृष्णयजुषां सर्वेऽपि पदकारा नञ्समासेऽवग्रहं न प्रदर्शयन्ति ।

ख—सामपदकारो नञ्समासेऽप्यवहमिच्छति । तद्यथा—

१ २र २ ३
अरातेः अ रातेः । सा० पू० १।१।६ ॥

३ १ २ ३ १ २र
अमित्रम् अ मित्रम् । सा० पू० १।२।१ ॥

३ १ २ ३ १ २र
अमृतम् अ मृतम् । सा० पू० १।४।१ ॥

९—साम्नः पदपाठस्य अवग्रहे वैशिष्ट्यम्

साम्नः पदपाठोऽवग्रहविषयेऽन्यपदपाठेभ्योऽत्यन्तं विसंवदति ।

तत्र तादृशानामपि पदानामवग्रहो दृश्यते, यान्यन्ये सर्वे पदकारा ऐकमत्येन विभागानर्हाणीति स्वीकुर्वते । तद्यथा—

मन्त्रपदम्	पदपाठः
३२ [1]मित्रम्	३ २ मि त्रम् । १।९ ॥[2]
३२ अद्य	३ २ अ द्य । ८।६ ॥
३ २ सख्ये	३ २ स ख्ये । ९।४ ॥
३ १र चन्द्रमसः	३ २ ३ चन्द्र मसः । २१।३ ॥
३ २ समुद्रम्	३ ३२ सम् उद्रम् । २७।४ ॥
[3]स्वस्तये	सु अस्तये । ३६।४ ॥
उस्रियाः	उ स्रियाः । ८५।१० ॥
पुत्रस्य	पुत् त्रस्य । १८८।२ ॥

इदं चात्रावधेयम्—सामपदकारोऽत्रावग्रहप्रदर्शनेन यमर्थविशेषं द्योतयति स नैरुक्तपदनिर्वचनेनापि पुष्यति । एतदर्थविज्ञापनाय पुरस्तान्निर्दिष्टानां पदानां यथाक्रमं यास्कीयं निर्वचनमुद्ध्रियते—

मित्र—प्रमीतेस्त्रायतेः । १०।२१ ॥

अद्य—अस्मिन् द्यवि । १।६ ॥

सख्य—समानख्यानाः ।७।३० ॥

चन्द्रमस्—चन्द्रो माता... । ११।५ ॥

समुद्र—सम् उद्द्रवन्त्यस्मादापः... । २।१० ॥

स्वस्ति—सु अस्तीति । ३।२१ ॥

---

१. इमान्युदाह्रियमाणानि पदानि, अग्रे च निर्दिश्यमानस्तुलनात्मको निरुक्तपाठः पण्डितभगवद्दत्तकृताद् 'वैदिक वाङ्मय का इतिहास' ग्रन्थात् संगृहीतः (द्र० वेदों के भाष्यकार, भाग पृष्ठ १५४-१५५) ।

२. अत्र प्रथमा संख्या कलकत्तामुद्रितस्य सामपदपाठस्य पृष्ठसंख्यां द्योतयति, अपरा तत्र वर्तमानां मन्त्रसंख्याम् ।

३. मुद्रणकाले समग्रस्य सामपदग्रन्थस्यास्मत्समीपेऽविद्यमानत्वात् स्वर-रहितान्येव त्रीणि पदानि प्रदर्श्यन्ते ।

उस्रिया—उत्स्राविणोऽस्यां भोगाः । ४।१६ ॥

पुत्र—पुन्नरकं ततस्त्रायते । २।२१ ॥

१०—पदकाले पुनरुक्तांशानां लोपालोपौ

संहितापाठे यानि पदानि तस्मिन्नेव मन्त्रे मन्त्रान्तरे वा पुनः पठ्यन्ते सम्पूर्णो वा मन्त्रः पुनः पठ्यते, तेषां पदकाले पुनः पाठविषयेऽप्युपलभ्यते विसंवादः । केषुचित् पदग्रन्थेषु पुनरुक्ता भागा मन्त्रा वा पुनर्न पठ्यन्ते, अपरेषु तादृशामपि भवति पाठः । एतदेव लक्ष्यीकृत्योक्तं (कात्या० प्रति० ४।१७७, १८१ टीका) केनचिदाचार्येण—

पुनरुक्तानि लुप्यन्ते पदानीत्याह शाकलः ।
अलोप इति गार्ग्यस्य काण्वस्यार्थवशादिति ॥

माध्यन्दिनानामपि पुनरुक्तानि पदानि लुप्यन्ते[१], काण्वैः सह क्वचिद् विसंवादोऽपि दृश्यते, अत एवोक्तम्—**काण्वस्यार्थवशादिति ।**

येषु पदपाठेषु पुनरुक्तांशानां लोप इष्यते तेष्वपि न सर्वेषामेव पुनरुक्तानां पदानां लोपो भवति, तत्रापि प्रातिशाख्यकारैर्विशेषविधानमुक्तम् । तद्विधानमपि परस्परं विसंवदते ।

एवं वैदिकपदग्रन्थानां तुलनात्मकाध्ययनेन प्रतीयते यदेषां पदकाराः स्वस्वकाले प्रसिद्धान् व्याकरणग्रन्थान् आश्रित्य स्वस्वपदपाठनियमान् निश्चितवन्तः । एषु पदकारेषु गार्ग्य-शाकल्य-शौनकास्त्वसंशयं व्याकरणप्रवक्तारोऽप्यासन् । तस्मादेतैस्तु स्वीयव्याकरणनियमानुसारमेव पदविभागः कृतः स्याद् इति संभाव्यते । पाणिनीयव्याकरणानुसारं क्वचिदवग्रहविषये विसंवादोऽप्युपलभ्यते । तदभिप्रेत्य तत्रभवता महाभाष्यकृता उक्तम्—

नहि लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यम् ।

महाभाष्य ३।१।१०९; ६।१।२०७; ८।२।१६ ॥

एतेन पाणिनीयलक्षणानुसारं मन्त्रणामन्यथाऽपि पदविभागः कर्तुं शक्य इति ज्ञाप्यते ।

इत्थं वैदिकपदपाठनां तुलनात्मकमध्ययनं प्रस्तुत्य माध्यन्दिनपदपाठस्य परिचयः प्रदीयते ।

●

---

१. अस्मदीयेऽतिप्राचीने कसंज्ञके कोशे पुनरुक्तानि पदानि मन्त्रानुसारं यथायथं पठ्यन्ते । पुनरुक्तानां मन्त्राणामपि पदपाठो यथास्थानं दृश्यते ।

माध्यन्दिन-पदपाठस्य परिचयः

पदग्रन्थानां प्रयोजनम् अस्माभिः संक्षेपेण पदपाठानां तुलनात्मकेऽध्ययने पुरस्तादुक्तम्। पुराकाले वेदानां यावत्यः शाखा आसन् तेषां सर्वेषामेव पदपाठा आसन्निति शक्यं प्राचीनेतिहासाद् अभ्यूहितुम्। परन्तु यथा सम्प्रति वेदानां ११३१ चन्द्ररामभूब्रह्ममितासु शाखासु उपद्वादशा एव शाखा उपलभ्यन्ते तथा पदग्रन्थास्तु ततोऽप्यल्पसंख्यका एव प्राप्यन्ते। ते चेमे--

१ - **ऋक्पदपाठः**
२—**माध्यन्दिनपदपाठः**
३—**काण्वपदपाठः**
४—**तैत्तिरीयपदपाठः**
५ —**मैत्रायणीयपदपाठः**
६—**सामपदपाठः**
७—**अथर्वपदपाठः**

एषु पदग्रन्थेषु—

ऋक्पदपाठः—ऋग्वेदस्य पदकारः **तत्रभवान् शाकल्य** इत्यत्र नास्ति कस्यापि विप्रतिपत्तिः। निरुक्तकारो यास्कोऽप्याह—

वा इति च य इति च चकार शाकल्य उदात्तं त्वेवमाख्यातमभविष्यद् असुसमाप्तश्चार्थः। ६।२८॥

कात्यायनप्रातिशाख्यव्याख्यातृभिः संक्रम (=पुनरुक्तपदलोप) प्रकरणे (४।१७७, १८१) कस्यचित् प्राचः श्लोक एवं पठ्यते—

पुनरुक्तानि लुप्यन्ते पदानीत्याह शाकलः।
अलोप इति गार्ग्यस्य काण्वस्यार्थवशादिति॥

अस्मिन्नपि श्लोके पदकारः कश्चित् शाकलः[1] (=शाकल्यः) स्मर्यते।

---

१. क्वचिदपवादविषयेऽप्युत्सर्गः प्रवर्तत इति न्यायेन यञः स्थानेऽण् अपि भवति। यथा **प्रदीयतां दाशरथाय मैथिलिः** (रामा० युद्ध० १४।३) इत्यत्राण्।

पुराणेष्वपि शाखा प्रकरणे शाकल्यः **'पदवित्तमः'** इति विशेषणेन असकृत् स्मर्यते ।

सामपदपाठः—सामवेदस्य पदपाठो **गार्ग्य**-प्रोक्त इति सम्प्रदायविद आचक्षते । यास्कीये निरुक्ते **'मेहना'** पदनिर्वचनप्रकरणे पठितस्य **'यन्म इह नास्तीति'** (४।४) वचनस्य व्याख्याने स्कन्दस्वामिना निरुक्तव्याख्यायां **'सामपदग्रन्थो गार्ग्यकृतः'** इति व्यक्तीकृतम् ।

'पूर्वनिर्दिष्टे श्लोकेऽपि **'अलोप इति गार्ग्यस्य'** इति वचनात् सामपदपाठस्य गार्ग्यकृतत्वमेव समर्थ्यते ।

गार्ग्य आचार्यो नैरुक्तानामन्यतम इति यास्कीयनिरुक्तग्रन्थाद् असकृद् व्यज्यते । पदपाठानां तुलनात्मकेऽध्ययने सामपदपाठस्य यास्कीयनिर्वचनेन साकं या समानता प्रदर्शिता (पूर्वपृष्ठ २५) तेनाप्येतन्मतं पुष्यति यन्नैरुक्तो गार्ग्य एव सामपदग्रन्थस्य प्रवक्तेति । पाणिनीयाष्टके गार्ग्यस्यासकृत्स्मरणादयं व्याकरणप्रवक्ताऽपि ज्ञेयः ।

तैत्तिरीयपदग्रन्थः—तैत्तिरीयः पदपाठ **आत्रेय**-कृत इति सम्प्रदायविदः प्रतिजानते । तैत्तिरीयकाण्डानुक्रमण्यां तु पदकार आत्रेय इति स्पष्टमुच्यते । तथाहि—

यस्याः पदकृदात्रेयो वृत्तिकारस्तु कुण्डिनः । इति ।

आपस्तम्बादिगृह्येष्वपि तर्पणप्रकरणे **'आत्रेयः पदकारः'** इत्येव स्मर्यते ।

काण्वपदपाठः—काण्वसंहितायाः पदपाठस्य कः प्रवक्ता इत्यत्र न किंचित् स्पष्टं प्रमाणमुपलभ्यते । पुनरपि पूर्वोद्धृते (पृष्ठ २६, २७) **'पुनरुक्तानि लुप्यन्ते'** इति श्लोके यथा गार्ग्यशाकल्ययोः पदकारत्वं व्यज्यते तथा **'कण्वस्यार्थवशात्'** इति वचनेन काण्वपदपाठस्य काण्वप्रोक्तत्वमपि शक्यमभ्यूहितुम् ।

अथर्वमैत्रायणीय—संहितयोः पदपाठस्य प्रवचनं काभ्यां कृतमिति न केनापि प्रमाणेन ज्ञायते ।

माध्यन्दिनपदपाठस्य प्रवक्ता

माध्यन्दिनपदपाठस्य कः प्रवक्ता इति न साम्प्रदायिका वैदिका विदन्ति । आधुनिकाः शोधप्रिया अपि विद्वांसोऽस्मिन् विषये

मौनमेवावलम्बन्ते । कलकत्तानगरस्थे एशियाटिकसोसाइटीपुस्तकालये विद्यत एको वाजसनेयपदपाठस्यैतादृशो हस्तलेखो यत्र ग्रन्थान्ते **'शौनककृते पदे'** इति लेखनं दृश्यते । यद्यपि शोधप्रिया विद्वांसो बहोः कालाद् एतेन हस्तलेखेन परिचितास्सन्ति, तथापि ते तत्र न श्रद्दधति, कोशस्यार्वाक्कालिकत्वाद् अपरस्मिंश्च कस्मिंश्चित् कोशे तादृश-पाठस्यादर्शनात् ।

परमिदमस्माकमत्यन्तं सौभाग्यं यदेकोऽपरोऽप्येतादृशः कोशः संप्राप्तो यस्मिन् अन्तिमेषु दशस्वध्यायेषु **'शाकल्यकृते पदे'** इति पाठो दशकृत्वः पठ्यते । अयं च कोशः सर्वेष्वपि विज्ञातेषु कोशेषु प्राचीनतमः । अस्य लेखनकालः पूर्वार्धस्योत्तरार्धस्य चान्ते **१४७१ वैक्रमाब्दः १३३६ शाकाब्दश्च** निर्दिष्टो वर्तते । अयं परमदुर्लभः कोशोऽस्माभिः अजमेरमण्डलान्तर्वर्ति-केकड़ीनगर-वास्तव्यस्य परम सुहृदः **पण्डितमदनमोहनव्यासशर्मणः** सकाशाल्लब्धः । सम्प्रत्ययम-स्मत्संग्रहे सुरक्षितो वर्तते (एतस्य कोशस्यान्यद्वैशिष्ट्यमुत्तरत्र **'माध्यन्दिनपदग्रन्थस्य चतुर्विधः पाठः'** इत्यस्मिन् प्रकरणे वक्ष्यते) ।

एतस्य प्राचीनतमस्य कोशस्य समुपलब्ध्या माध्यन्दिनपदपाठो-ऽपि शाकल्यप्रोक्त एवेति निश्चये न प्रमाणान्तरस्यापेक्षा जायते । यदि कश्चिद् ब्रूयात्—ऋक्पदप्रवक्तुः शाकल्यस्य शुक्लयजुषः साकं न संबन्धः सम्भवतीति । तन्न, दृश्यते हि आर्थर्वणशौनकशाखायाः प्रवक्तुः शौनकस्य ऋगनुक्रमणीनां बृहद्देवताग्रन्थस्य च प्रवक्तृत्वम्, शुक्लयजुषः पुरुषाध्यायस्य च व्याख्यातृत्वम्[1] । एवमेव वाजसनेय-चरणस्य कात्यायनशाखायाः प्रातिशाख्यस्य श्रौतसूत्रस्य च प्रवक्तुः कात्यायनस्य ऋक्सर्वानुक्रमण्याः प्रवक्तृत्वम् । सत्येवं शाकल्यस्य वाजसनेयपदपाठप्रवक्तृत्वं को नाम वारयितुं प्रभवेत् । वयं तु न तत्र कांचन विप्रतिपत्तिं पश्यामः ।

एवं संक्षेपेण पदप्रवक्तॄणां विषय उक्त्वा माध्यन्दिनपदपाठस्य प्रक्रिया किञ्चित् प्रदर्श्यते—

---

१. द्रष्टव्यम् पुरुषाध्यायस्य (शु० यजुः ३१) उव्वटव्याख्याया आरम्भे । अस्यवामीय सूक्तस्य (ऋक् १।१६४) आत्मानन्दीयव्याख्यारम्भेऽप्ययमर्थः सूच्यते ।

माध्यन्दिन-पदपाठस्य प्रक्रिया

वैदिकपदपाठानां पदविभागे प्रगृह्यत्वावग्रहत्वादिप्रदर्शने स्वरसंचारे च यः प्रक्रियाभेदः स समासेन यथायथं पूर्वं प्रदर्शितः[१]। माध्यन्दिनपदपाठ-प्रवचने यदन्यपदपाठेभ्यो वैलक्षण्यं तद् यद्यपि पुरस्तात् यथास्थानं निर्दाशितम्, तथापि सुग्रहायेह संक्षेपेण पुनः प्रदर्श्यते —

१—पदविभागे यत्र केवलं पदस्वरूपमेव प्रदर्शनीयं भवति तत्र मन्त्रपाठे संहितापाठानुरोधेन जायमानं संहिताकार्यं स्वरसंचारं चापहाय यथायथं पदं स्वस्वरसंयुक्तं प्रदर्श्यते। तद्यथा—

मन्त्रपाठः—

इषेत्वोर्जेत्वावायवस्थ। १।१॥

पदपाठः—

इषे। त्वा। ऊर्जे। त्वा। वायवः। स्थ। १।१॥

२—यत्पदं व्याकरणानुसारं प्रगृह्यसंज्ञक भवति तत्पदकाले यथायथं पठित्वा इतिकरणेन तस्य प्रगृह्यत्वं प्रदर्श्य पुनरावर्त्यते। तद्यथा—

अस्मेऽइत्यस्मे। ४।२२, २६॥

विष्णोऽइतिविष्णो। १।४॥

३—यत्र पदेऽवग्रहः[२] प्रदर्शनीयो भवति, तत्र मन्त्रपदं स्वरूपतः पठित्वा इतिनाऽऽवेष्टयाऽवग्रहः प्रदर्श्यते। तद्यथा—

---

१. द्रष्टव्यम् पूर्वत्र 'वैदिकपदपाठानां तुलनात्मकमध्ययनम्' प्रकरणे (पृष्ठ ११-२६)।

२. यस्मिन् पदेऽवान्तर्वर्तिनीं विभक्तिमाश्रित्यायजादिसर्वनामस्थानेषु सुप्सु (=विभक्तिषु तद्धितप्रत्ययेषु) क्वचि च पूर्वस्य यावद्भागस्य पदसंज्ञा भवति तावद्भागं पृथक्कृत्य प्रदर्शनमवग्रह उच्यते। तत्रोभयोर्भागयोरुच्चारणे मात्राकालपरिमितं व्यवधानं क्रियते। अवग्रहस्य विशेषनियमास्तत्तत्संहितायाः प्रातिशाख्याद् विज्ञेयाः।

श्रेष्ठतमायेतिश्रेष्ठ तमाय । १।१ ॥

प्रजावतीरितिप्रजा वतीः । १।१ ॥

४—यत्र प्रगृह्यत्वम् अवग्रहत्वं चोभयं प्रदर्शनीयं भवति, तत्र प्रथमं मन्त्रपदोत्तरमितिपदप्रयोगेण प्रगृह्यत्वं प्रदर्श्य पुनरावर्त्यावग्रहः प्रदर्श्यते । तद्यथा—

बृहद्भानोऽइतिबृहत् भानो ।
१२।१०६ [1] (पदपाठे १२।९७) ॥

शतक्रतोऽइतिशत क्रतो । ३।४९ (पदपाठे ३।४८) ॥

५—यत्रावगृह्यभागे मन्त्रपदे पदकारश्छान्दसं दीर्घत्वं सांहतिकं षत्वं सत्वं णत्वं वा मनुते, तत्र स प्रथमं मन्त्रपदं यथायथं पठति, तदनु च दीर्घत्वादिकार्यविरहितं पदं पठित्वा इतिनाऽऽवेष्ट्यावग्रहं प्रदर्शयति । तद्यथा—

दीर्घत्वस्य—

अशीतम । अशितमेत्यशि तम । २।२० ॥

षत्वस्य—

त्रिष्टुप् । त्रिस्तुबितित्रि स्तुप् । १०।११ ॥

सत्वस्य—

वयस्कृतम् । वयःकृतमितिवयः कृतम् । ३।१८ ॥

णत्वस्य—

प्राणिनाय । प्रनिनायेतिप्र निनाय ।
५।४३ (पदपाठे ५।४१) ॥

---

१. इह मन्त्रसंख्या एव प्राधान्येन निर्दिष्टा, यत्र पदग्रन्थे पुनरुक्तानां पदानां मन्त्राणां वा लोपात् कण्डिकासंख्या भिद्यते, तत्र पदकण्डिकासंख्याऽपि निर्दिश्यते ।

६—यत्रानवगृह्यमाणेऽपि पदे पूर्ववत् पदकारश्छान्दसं दीर्घत्वं सांहतिकं वा षत्वादिकार्यं स्वीकरोति तत्रापि स प्रथमं यथायथं मन्त्रपदं स्वतन्त्रतया पठति, तदनु च दीर्घत्वादिविरहितं पदं पठित्वेतिनाऽऽवेष्टयति । तद्यथा—

दीर्घत्वस्य--

शमीष्व । शमिष्वेतिशमिष्व । १।१९ ॥

षत्वस्य—

सुषुवुः । सुसुवुरितिसुसुवुः ।

२०।६३ (पदपाठे २०।३६) ॥

णत्वस्य—

त्रिणवत्रयस्त्रिंशौ । त्रिनवत्रयस्त्रिंशावितित्रिनवत्रयस्त्रिंशौ ।

१०।१४ ॥

एवं पदकाले स्वरसंचारेऽपि—

७—सामान्येन पदपाठे पदानि स्वमूलभूतं स्वरं प्रापय्य पठ्यन्ते । तद्यथा—

इषे । त्वा । ऊर्जे । त्वा । वायवः । स्थ ।

८—यत्र मन्त्रपदमितिपदेन निर्दिश्य पुनः पठ्यते, तत्र त्रीण्यपि पदानि परस्परं संहितावत् स्वरं सन्धिकार्यं च लभन्ते । तद्यथा—

विष्णोऽइति विष्णो । १।४ ॥

अस्मेऽइत्यस्मे । ४।२२, २६ ॥

९—यत्र मन्त्रपदेऽवग्रहः प्रदर्शनीयो भवति तत्रावग्रहोत्तरभागोऽपि संहितावत् स्वरं लभते । तद्यथा—

श्रेष्ठतमायेतिश्रेष्ठ तमाय । १।१ ॥

प्रजावतीरितिप्रजा वतीः । १।१ ॥

१०—यत्र त्ववगृह्यमाणपदस्योत्तरभागे उत्तम[1] उपोत्तमो वोदात्तो वा स्वरितो वा भवति, तस्माच्च पूर्वं यत्र द्वौ वा त्रयो वा अनुदात्ता भवन्ति, तत्र तेऽनुदात्तत्वमेव भजन्ते, अर्थात् पूर्वभागस्थमुदात्तं स्वरितं वाऽऽश्रित्य स्वरितत्वमैकश्रुत्यं च न लभन्ते । तद्यथा—

विजानतऽइतिवि जानतः । ४०।७ ॥

विचचक्षिरऽइतिवि चचक्षिरे । ४०।१० ॥

परिवत्सरायेतिपरि वत्सराय ।

३०।१५ (पदपाठे ३०।१३) ॥

आहनन्न्युयेत्या हुनन्याय । १६।३५ ॥

अपरस्मिन्नैकस्मिन् कोशे तु उदात्तपरं स्वरितपरं वाऽनुदात्तं[2] विहायावशिष्टानामनुदात्तानामैकश्रुत्यं दृश्यते । तद्यथा—

विजानतऽइतिवि जानतः । ४०।७ ॥

विचचक्षिरऽइतिवि चचक्षिरे । ४०।१० ॥

परिवत्सरायेतिपरि वत्सराय ।

३०।१५ (पदपाठे ३०।१३)

आहनन्युयेत्या हनन्याय । १६।३५ ॥

अयमुभयथापि स्वरसंचारनियमो वाजसनेयप्रातिशाख्ये (१।१४८,१४९) मतान्तरेण विहितो दृश्यते ।

---

१. त्रिप्रभृतीनामन्त्यमुत्तमम्, उत्तमस्य समीपम् (अन्त्यात्पूर्वभावी) उपोत्तमम् । एते उभे अपि संज्ञे व्याकरणनिकाये प्रसिद्धे। द्र० अष्टा० ४।१।७८ सूत्रस्य भाष्यं काशिकादयो वृत्तिग्रन्थाश्च ।

२. उदात्तस्वरितपरोऽनुदात्तोऽनुदात्तत्वमेव भजते नैकश्रुत्यं स्वरितत्वं च लभते । तदुक्तम्—उदात्तस्वरितपरस्य सन्नतरः (अष्टा० १।२।४०), नोदात्तस्वरितोदयम्० (८।४।६६) इति च ।

माध्यन्दिनसंहितायां तदीये पदपाठे च

यकारवकारयोर्विशिष्टा लेखन-पद्धतिः

माध्यन्दिनसंहितायामस्त्यन्यसंहिताभ्य उच्चारणे वैशिष्टयम्। तद् द्विविधम्—वर्णविषयकं स्वरविषयकं च। तद्द्विविधस्याप्युच्चारणवैशिष्टयस्यानुरूपमस्याः संहिताया लेखनेऽपि वर्णानां स्वरविशेषाणां चाङ्कनप्रकारो भिद्यतेऽन्याभ्यः। अयमेव लेखनप्रकारो माध्यन्दिनपदपाठेऽपि स्वल्पभेदेन व्यवह्रियते। अत इह प्रथमं संहितायां वर्णोच्चारणवैशिष्टयार्थं यस्तदीयो लेखनप्रकारः स निर्दिश्यते—

१—अस्याः संहिताया यः पाठः साम्प्रतिकैरुत्तरदेशीयैरधीयते, तत्र रेफहकारोत्तरवर्तिनां व्यञ्जनानाम्, अनच्पराणामच उत्तराणां यरां, यणः पराणां मयां, मयः पराणां वा यणाम्, शरः पराणां खयाम्, खयः पराणां वा शराम्, अन्येषां च वर्णानां यथालक्षणं द्वित्वं विलिख्यते; तदर्थं च कात्यायनीयं प्रातिशाख्यमेवैकं शरणम्। इयं व्यञ्जनानां द्वित्वविशिष्टलेखनपद्धतिर्माध्यन्दिनसंहितायाः पाठेऽपि यथायथमुपलभ्यते। तद्यथा—

सवितापप्रार्प्पयतुश्श्रेष्ठतमायकर्म्मणऽआप्प्यायद्ध्वमग्घ्न्याऽइन्द्रायभागम्प्प्रजावतीरनमीवाऽअयक्क्ष्मा ······· बहूर्व्वीर्व्वर्धजमानस्य ··· । १।१ ॥

साविश्श्वायु ··· सोमेनातनच्मिमाव्विष्ण्णोहव्व्यꣳरक्क्ष । १।४॥

२—माध्यन्दिनसंहितापाठेऽनुस्वारस्य रेफोष्मवर्जं सर्वत्रैव परसवर्णत्वं नित्यं भवति। रेफोष्मसु अनुस्वार एवावतिष्ठते, **'रेफोष्मणां सवर्णा न सन्ति'**[1]इति वचनात्। अनुस्वारमपि माध्यन्दिना ह्रस्वदीर्घभेदेन द्विप्रकारकमाचक्षते। तयोर्निदेशपद्धतिरपि बहुधा भिद्यते। सम्प्रति दीर्घोऽनुस्वारः ꣳ चिह्नेनाङ्क्यते, ह्रस्वश्च ꣴ चिह्नेन।

---

१. आपिशली पाणिनीया च शिक्षा, द्र० षष्ठ-प्रकरणम्।

ह्रस्वसंज्ञकात् स्वरात् परोऽनुस्वारो दीर्घ उच्चार्यते लिख्यते च, एवं दीर्घसंज्ञकात् स्वरात् परो ह्रस्वः।

अनन्तभट्टस्तु प्रतिज्ञापरिशिष्टस्य (३।२) व्याख्यानेऽनुस्वारस्य ह्रस्वदीर्घगुरुभेदेन त्रिविधत्वमुक्त्वा एकस्योच्चारणं लेखनं च नष्टमित्याह[1]।

अस्मन्मते तु ह्रस्वदीर्घभेदेन द्विविधस्यानुस्वारस्य यत् साम्प्रतिक **'ग्वम्'** **'गुँ'** वोच्चारणं तच्छास्त्रविरुद्धम्। तस्यानुस्वारत्वादनुस्वाररूपेणैवोच्चारणं कर्तव्यम्, नान्यथा।

३—माध्यन्दिना यकारवकारौ गुरुलघुलघुतरभेदेन त्रिविधाविति मन्यन्ते। तेषां च याज्ञवल्क्यशिक्षायां लघुमाध्यन्दिनशिक्षायां च यः प्रविभाग उक्तः, स इत्थं समासतो ज्ञेयः—

क—**गुरु-यकारः**—पादादिः, पदादिः, रेफहयऋवर्णैश्च सयुक्तः पदमध्यगः, आम्रेडने पूर्वपदादिश्च यो यकारः स गुरुः स्मर्यते (अयं गुरुर्यकारः सम्प्रति य, य़, उदरगतविन्दुयुतो यकार इत्येवं त्रिभिः प्रकारैर्लिख्यते। तत्र 'य' इत्ययं प्रकारः प्रायेणाश्रीयते)। तद्यथा—

पादादिः—

यज्ञेन[2] यज्ञमयजन्त। ३१।१६॥

पदादिः—

यज्ञमयजन्त। ३१।१६॥

रेफेण संयुक्तः—

सूर्य्यः। ३।९॥

हकारेण संयुक्तः—

गेह्याय। १६।४४॥

---

१. प्रतिज्ञापरिशिष्टे (३।२) अनुस्वारस्य रेफोष्मपरस्य त्रिविधत्वमुक्तम्। ह्रस्वात् परो दीर्घः, दीर्घात् परो ह्रस्वः, गुरौ परे गुरुः। अत्र तृतीयस्य चिह्नं परिभ्रष्टम्। द्र० अनन्त-टीका ३।२॥

२. इह पदादित्वादेव गुरुत्वे सिद्धे पादादिवचनं किमर्थमित्यनुसन्धेयम्।

यकारेण संयुक्तः—

धाय्यारूपम् । १९।२४ ॥

ऋकारेण संयुक्तः—

सामान्यृग्भिः । २०।१२ ॥

आम्रेडने पूर्वस्य—

यत्रयत्र । २९।४३ ॥

इह परस्यापि पदादित्वात् प्राप्तं गुरुत्वं प्रतिषेद्धुं पूर्वस्य पुनर्गुरुत्वमुच्यते ।

ख—लघु-यकारः—पदमध्यगः केवलः, रेफादीन् पूर्वनिर्दिष्टान् चतुरो वर्णान् विहायान्यवर्णैश्च संयुक्तः, पञ्चमाक्षरात् परः पदादिः, उपसर्गाच्च परः पादमध्यगः पदादिश्च यकारो लघुः स्मर्यते (अयं सामान्यरूपेण लिख्यते) । तद्यथा—

पदमध्यगः केवलः—

देवयजनम् । ४।१ ॥

रेफादिभिन्नवर्णैः संयुक्तः—

आप्यायध्वम् । १।१ ॥

पञ्चमात् परः पदादिः—

रेवान्यो० । ३।२६ ॥

उपसर्गात् परः पादमध्यगः पदादिः—

व्यियत् । २४।३४ ॥ अनुयं । ३३।८० ॥

इह पादमध्यग इति विशेषणाद् उपसर्गात् परः पादादिर्यकारो गुरुरेव । तद्यथा—

अनु योजा । ३।५२ ॥ उपयज्ञं च । ८।३५ ॥

अनयोरुदाहणयोरुपसर्गः पूर्वपादान्तः, यकारश्चोत्तरपादादिर्ज्ञेयः ।

आम्रेडन उत्तरस्य—

यत्रयत्र । २९।४३ ॥

अयमत्र विशेषः—सनवर्णाभ्यां परः 'सयोजते (१५।३३) सुयुधऽइ० (१७।३५) नयन्तु (३७।७)'। इति प्रयोगविशेषेष्वेव श्रूयमाणो यकारो लघुः स्मर्यते, एभ्योऽन्यत्र गुरुरेव। तद्यथा—

सयन्ता । ६।२९ ॥ मनोनयेषु । ७।१७ ॥

ग—लघुतरो यकारः—पदान्ते 'अय्-आय्'रूपः सन्धिजो यकारो लघुतरः स्मर्यते । परन्तु माध्यन्दिनसंहितायामयं न श्रूयते, लोप एवास्यामनन्ति। पाणिनीया अपि पदान्तगौ सन्धिजौ यकारवकारौ लघुप्रयत्नतराविति प्रतिजानते । तथा ह्याहुः—**व्योर्लघुप्रयत्नतरः शाकटायनस्यैव** (अष्टा० ८।३।१८) इति ।

३—माध्यन्दिना वकारमपि गुरुलघुलघुतरप्रयत्नभेदेन त्रिविधं स्मरन्ति। तद्यथा—

क—गुरुवकारः—पदादौ यो वकारः स गुरुः स्मर्यते। तस्य गुरुत्वस्य द्योतनाय स द्विर्लिख्यते। तद्यथा—

व्वायवस्थ । १।१ ॥

ख—लघुवकारः—पदमध्यगस्य, पदादेश्च युष्मदादेशस्य, वा वै इत्यनयोर्निरर्थकयोर्निपातयोः, विकल्पार्थस्य वा पदस्य, उपसर्गाच्च परस्य वकारस्य लघुत्वं स्मर्यते। तद्यथा—

पदमध्यगः—

प्रजावतीः १।१ ॥

युष्मदादेशः—

देवो वः । १।१ ॥ या वाङ्कशा । ७।११ ॥

वा वै निपातौ—

वातो वा । ६।७ ॥ न वा ऽ उ २३।१६ ॥(इह वै निप

वा विकल्पार्थः—

मित्रावरुणनेत्रा वा मरुन्नेत्रा वा । ६।३६ ॥

ग—लघुतरो वकारः—यः पदान्तीयः 'अव्-आव्'रूपः सन्धिजो वकारः स लघुतरः स्मृतः । तद्यथा—

व्वायवृतस्पते । २७।३४ ॥

इह ऋकारपूर्वो वकारो लघुतरः । अयं पाणिनीयैरपि लघुप्रयत्नतर इत्येवं स्मर्यते (द्र० अ० ८।३।१८) ।

पदपाठे यकारवकारयोर्लेखनपद्धतिः

माध्यन्दिनसंहितायां व्यञ्जनानां द्विर्लेखनरूपा यकारवकारयोश्च गुरुत्वादिद्योतनाय च या विशिष्टा लेखनपद्धतिरवलोक्यते सा प्रायेण तत्पदपाठेऽपि उत्तरदेशीयैर्व्यवह्रियते । परन्तु यकारवकारयोर्गुरुत्वादिविषयेऽस्ति कश्चन भेदः । तद्यथा—

क—गुरुयकारः—माध्यन्दिनपदपाठेऽधोलिखितेषु प्रसङ्गेषु यकारो गुरुः स्मर्यते—

पदादौ—

यज्ञेन । यज्ञम् । ३१।१६ ॥

रेफेण संयुक्तः—

सूर्य्यः । ३।९ ॥

हकारेण संयुक्तः—

गेह्याय । १६।४४ ॥

यकारेण संयुक्तः—

धाय्यारूपमितिधाय्या रूपम् । १९।२४ (पदपाठे १९।२२)

अवग्रहे परभागादिः—

देवयजनमितिदेव यजनम् । ४।१ ॥

आम्रेडिते तूभयत्र (पदादाववग्रहे च) यथानियमम्—

य्त्रयत्रेतियत्र य्त्र । २९।४३ ॥

विशेषः—इतिनाऽऽवेष्टने क्रियमाणे इतिपदात् परो यकारः पदादिः सन्नपि गुरुर्न स्मर्यते । तद्यथा—

य्त्रयत्रेतियत्र यत्र । २९।४३ ॥

य्यज्ञपतिरितियज्ञ पतिः । १।२ ॥

ककोशस्था विशिष्टा लेखनपद्धतिः—आस्माकीनेऽतिप्राचीने (वि० सं० १४७१) पदग्रन्थे यत्र-यत्र यकारो गुरुरिष्यते तत्र-तत्र वकारवद् यकारोऽपि द्विलिख्यते । तद्यथा—

य्यज्ञेन, सूर्य्यः, गेह्य्याय, धाय्यारूपमितिधाय्या रूपम् ।

ककोशेऽन्यद् वैशिष्टचम्—अन्यकोशेषु आवेष्टने क्रियमाणे इतिपदात् परो यकारो लघुः स्मर्यते, परन्त्वस्मिन् कोशे पदादित्वात् तस्य संहितावद् गुरुत्वमाश्रित्य द्विलिख्यते । तद्यथा—

य्यत्रयत्रेतिय्यत्र यत्र । २९।४३ ॥

य्यज्ञपतिरितिय्यज्ञ पतिः । १।२ ॥

ख--लघुयकारः—गुरुयकारनिर्देशादन्यत्र पदमध्यगो यकारो लघुः स्मर्यते । तद्यथा—

देवयजनमितिदेव यजनम् । ४।१ ॥

ककोशे तु न केवलं य-र-हवर्णैरेवासंयुक्तोऽपि तु व्यञ्जनान्तरमात्रेणासंपृक्तः पदमध्यगो यकारो लघुः स्मर्यते ।

एवमावेष्टने क्रियमाणे इतिपदात् परः पदादिरपि यकारो लघुरेव स्मर्यते । तद्यथा—

यज्ञपतिरितियज्ञ पतिः । १।२ ॥

कसंज्ञके प्राचीनतमे कोशे तु इतिपदात् परोऽपि यकारो गुरुः स्मर्यते । तेन स द्विलिख्यत इत्युक्तं पुरस्तात्[1] ।

---

१. य्यत्रयत्रेतिय्यत्र यत्र (२९।४३) य्यज्ञपतिरितिय्यज्ञ पतिः (१।२)॥

लघुयकारस्य विशिष्टः संकेतः—आस्माकीने ककोशे यकारस्य लघुत्वं द्योतनाय यकारस्य मध्येऽधस्ताच्च बिन्दुर्निक्षिप्यते । तद्यथा—

देवयजनमितिदेव य़जनम्[1] । ४।१ ॥

क्वचित् मध्येऽधस्ताद्वैक एव बिन्दुर्दृश्यते । मुद्रणाक्षरेषु मध्येऽधस्ताच्च बिन्दोर्निक्षेपो न संभवतीति कृत्वा केवलमधस्तादेव निर्दिष्टः । तद्यथा—

देवय़जनमितिदेव य़जनम् । ४।१ ॥

ग—लघुतरो यकारः—संहितापाठ इव पदपाठेऽपि लघुतरस्य यकारस्य लोप एव भवति । तद्यथा—

वृत्रतूर्य्येऽइतिवृत्र तूर्य्ये । १।१३ ॥

तस्मान्नायं पदपाठे श्रूयते ।

क—गुरुवकारः—माध्यन्दिनपदपाठे निम्ननिर्दिष्टो वकारो गुरुः श्रूयते—

पदादिः--पदपाठे सर्वोऽपि पदादिर्वकारो गुरुर्भवति । तद्यथा—

व्वायवः । व्विष्णोः । व्वः । व्वाम् ।

विशेषः—संहितापाठे **वः वाम्** इत्यनयोर्युष्मदादेशयोः, **वा वै** इत्यनर्थकयोर्निपातयोः, **वा** इतिविकल्पार्थस्य च वकारस्य लघुत्वमुक्तम्, परन्तु कसंज्ञकं प्राचीनं कोशं विहायान्येषु पदकोशेषु एषामपि गुरुत्वमाश्रित्य द्विर्लेखनं भवति, तथा चैवोदाहृतम् । ककोशे त्वेतेषां संहितावदेव लघुत्वमाश्रित्य सकृदेव वकारलेखनं दृश्यते । एवमेव वृत्रादिपदेषु ऋकारे परतः श्रूयमाणो वकारोऽपि ककोशे लघुरेव स्मयते ।

अवग्रह उत्तरभागादिः—अवग्रहे यत्रोत्तरभागस्यादौ वकारः श्रूयते स गुरुर्भवति, तस्माद् द्विश्च लिख्यते । तद्यथा—

देववीतयऽइतिदेव व्वीतये । १।१८ ॥

---

१. कहस्तलेखे 'य्य' इत्येवं लेखनं लिपिकारप्रमादजम् ।

विशेषः—कसंज्ञके प्राचीने पदकोशे त्ववग्रहे परभागादिर्वकारोऽपि लघुरेव स्मर्यते, सकृच्च लिख्यते । तद्यथा—

देववीतयऽइतिदेव वीतये । १।१८ ॥

यत्र वकारादिपदस्य इतिनाऽऽवेष्टनं क्रियते तत्र कसंज्ञके कोशे यकारवद् वकारस्यापि गुरुत्वमाश्रीयते, तस्माद् द्विश्च लिख्यते । तद्यथा—

व्विष्णोऽइतिव्विष्णो । १।४ ॥

व्व्रतपतऽइतिव्व्रत पते । १।५ ॥

अन्यपदकोशेषु इतिपदात् परो पदादिर्वकारोऽपि लघुत्वात् सकृदेव लिख्यते ।

ख—लघुवकारः—पदग्रन्थे पदमध्यग इतिकरणाच्च परो वकारो लघुः स्मर्यते । तद्यथा—

पदमध्यगः—

देवयजनमितिदेव यजनम् । ४।१ ॥

इतिकरणात् परः—

व्विष्णोऽइतिविष्णो । १।४ ॥

व्व्रतपतऽइतिव्रत पते । १।५ ॥

विशेषः—कसंज्ञके कोशे इतिपदात् परस्यावेष्टयमानस्य पदादेर्वकारस्य गुरुत्वमेव स्मर्यते द्विश्च लिख्यते, अवग्रह उत्तरभागादिश्च लघुः स्मर्यते सकृच्च लिख्यत इत्युभयं पुरस्तादुक्तम् ।

ग—लघुतरो वकारः— पदपाठेऽपि पदान्तीयः सन्धिजो वकारो लघुतर एव स्मर्यते । तद्यथा—

त्रिनवत्रयस्त्रिंशावितित्रिनवत्रयस्त्रिंशौ । १०।१४ ॥

एष यकारवकारयोरुच्चारणनिमित्तो लेखनपद्धत्तौ यो भेदः स सामान्येन निर्दिष्टः, विशेषस्तु यथासम्प्रदायपाठमूह्नीयः ।

माध्यन्दिन-पदपाठस्य चतुर्विधः पाठः

माध्यन्दिनपदपाठस्य येषां हस्तलिखितानां मुद्रितानां च कोशानां साहाय्येन मयेदं संस्करणं व्यधायि, तेषां पारस्परिकतुलनया यो निष्कर्षो मया समुपलब्धस्तदनुसारं माध्यन्दिनपदपाठस्य चतुर्विधः पाठो वर्तते । स चैवम्—

१—**प्रथमः पाठः**—स वर्तते, यमुत्तरभारतीया वैदिकाः पठन्ति । अस्मिन् पाठे संयुक्तानां व्यञ्जनानां यथालक्षणं द्विर्वचनमुपलभ्यते । अस्य पाठस्य प्रातिनिध्यं वाराणसीस्थे सरस्वतीभवनपुस्तकालये विद्यमानौ **ङच**संज्ञकौ (ग्रन्थसंख्या ००१०५२-५३) कोशौ पूनानगरस्थो धसंज्ञकः (क्रमसंख्या ३५३) कोशश्च पूर्णरूपेण कुर्वन्ति । काश्यां मुद्रितो ग्रन्थोऽपि स्वल्पतमभेदेनामुमेव पाठमनुसरति (अत्र यो भेदः सोऽनुपदं द्रष्टव्यः) ।

अयं पाठोऽस्माभिः प्रधानरूपेण प्रथमं स्थूलाक्षरैर्निर्दिष्टः ।

२—**द्वितीयः पाठः**—स विद्यते, यः प्रथमं पाठमनुसरन्नपि विशिष्टेषु स्थलेषु स्वरविधाने स्वराङ्कने वा कञ्चिद् भिन्नं प्रकारमनुसरति । तद्यथा—

अस्मिन् पाठेऽवगृह्यमाणे पदे यत्रोत्तरभाग उत्तम उपोत्तमो[1] वोदात्तो वा स्वरितो वा भवति, ततश्च पूर्वं द्वौ वा त्रयो वाऽनुदात्ता भवन्ति, तत्रोदात्तात् स्वरिताद्वाऽव्यवहितं पूर्वमनुदात्तं विहायाऽन्येऽनुदात्ता इतिपदस्यान्त्यं स्वरितमाश्रित्य तथैवैकश्रुत्यं लभन्ते, यथा पूर्वभागस्था अनुदात्ताः । तद्यथा—

सुवँविदानाऽइतिसम् व्विदाना॒ । १२।७९ ॥

देवकिल्ल्विषादितिदेव किल्ल्विषात् । १२।८१ ॥

---

१. त्रिप्रभृतीनामन्त्य उत्तमः, तत्समीपस्थः (अन्त्यात् पूर्वः) उपोत्तमः (द्र० काशिका ४।१।७८) ॥

व्वैश्श्वकर्म्मणमितिंवैश्श्व कर्म्मणम् । १३।५० ॥

आहनन्द्युायेत्यां हनन्द्याय । १६।३५ ॥

अयं स्वराङ्कनप्रकारः काशीमुद्रिते पदपाठे प्रायेण दृश्यते । यत्र क्वचिद् अस्मिन् ग्रन्थे प्रथमपाठानुसारी स्वराङ्कनमुपलभ्यते, स प्रमादपाठ इत्यस्माकं मतम् । तद्यथा—

सुपिप्पलाऽइतिंसु पिप्पलाः । ११।४५ ॥

कुतः प्रमादपाठ इति चेद्, अग्रे अस्यैव पदस्य द्वितीयपाठानुसारमेव स्वरसंचारदर्शनात् । तद्यथा--

सुपिप्पलाऽइतिंसु पिप्पलाः । १२।६० ॥

एतादृशेषु विशिष्टेषु स्थलेषु प्रथमे पाठे इतिपदस्यान्त्यं स्वरितमाश्रित्य पूर्वभागस्था अनुदात्तास्त्वैकश्रुत्यं लभन्ते नापरभागस्थाः, तथा सति तत्रैवं स्वरविन्यासः क्रियते—

सवँविदानाऽइतिंसम् व्विदानाः । १२।७९ ॥

देवकिल्ल्विषादितिंदेव किल्ल्विषात् । १२।८१ ॥

व्वैश्श्वकर्म्मणमितिंवैश्श्व कर्म्मणम् । १३।५० ॥

आहनन्द्युायेत्यां हनन्द्याय । १६।३५ ॥

विशेषः—अनुपदं वक्ष्यमाणयोस्**तृतीयचतुर्थ**पाठयोरप्येतादृशेषु विशिष्टेषु स्थलेषु प्रथमपाठानुसार्येव स्वरसंचार उपलभ्यते । स्वामिदयानन्दभाष्येऽप्ययमेव पाठः प्रायेण वर्तते (द्र० 'ठ' संज्ञकः कोशः) । तस्यैव ग्रन्थस्य 'ड' संज्ञके कोशे तु सम्पादकेन द्वितीयपाठानुसारी (पाणिनीयव्याकरणसिद्धः) पाठः कृत इति ज्ञेयम् । कात्यायनप्रातिशाख्ये १।१४८, १४६ सूत्रयोरुभयथाऽपि स्वरसंचार उपदिश्यते । वैदिकग्रन्थेष्वेतादृशेषु स्थलेषु यथापाठं व्यवस्थाऽऽश्रीयते । तेन प्रातिशाख्यानुसारं स्वरसंचारविषयको द्विविधोऽपि पाठो नियतव्यवस्थया प्रामाणिक इति शक्यते विज्ञातुम् ।

द्वितीयपाठस्य स्वराङ्कनप्रकारभेदः सर्वत्र यथास्थानं टिप्पण्यामुट्टङ्कितः ।

३—तृतीयः पाठः—सोऽस्ति, यत्र केवलं रेफोत्तरवर्तिनां संयुक्तानां व्यञ्जनानामेव द्विर्लेखनमुपलभ्यते, नान्येषाम् । अस्मिन् पाठे 'गच्छ'[1] आदिषु पदेषु छकारात् पूर्वं पठ्यमानश्चकारोऽपि न दृश्यते ।

अयं पाठः प्राधान्येन **खजकोशयोः मुम्बय्यां मुद्रिते** च ग्रन्थे उपलभ्यते । प्राचीनतमः **'क' कोशोऽपि** व्यञ्जनानां द्वित्वाद्वित्वविषय इममेव पाठमनुसरति । अयं तृतीयः पाठः स्वरसंचारविषये प्रथमं पाठमेवावरुणद्धि ।

अस्मिन् पाठे संयुक्तव्यञ्जनानां द्वित्वाद्वित्वविषयको यावत्सु पदेषु भेदस्तावतां पदानां पाठो मुख्यपाठानन्तरं सूक्ष्माक्षरेषु निर्दिष्टः ।

विशेषः—एषु त्रिष्वपि पाठेषु पुनरुक्तानि पदानि मन्त्राश्च यथालक्षणं लुप्यन्ते । तल्लोपात् पदपाठस्य या कण्डिकासंख्या सा संहिताया मन्त्रकण्डिकासंख्यया सह प्रायेण भिद्यते ।

४—चतुर्थः पाठः—स ज्ञेयो, य आस्माकीने प्राचीनतमे **कसंज्ञके** कोश उपलभ्यते । अयं पाठो यद्यपि संयुक्तव्यञ्जनानां द्वित्वाद्वित्वविषये स्वरसंचारे च **तृतीयमेव पाठमनुसरति**, तथाप्यत्र सन्ति केचन विशिष्टा भेदा, येऽस्य स्वतन्त्रं पाठं व्यवस्थापयन्ति । तद्यथा—

क—अस्मिन् पाठे **वाम् वः वा वै** आदीनां पदादिर्वकारः संहितापाठ इव लघुः स्मर्यते । अत एवात्र एषां वकार एक एव लिख्यते । सर्वेष्वन्यकोशेषु एषां पदानामपि वकारो गुरुः स्मर्यते द्विश्च लिख्यते 'व्व' इति ।

एवमेव ऋकारोत्तरः पदादिवकारोऽप्यस्मिन् पाठे संहितावत् 'वृ' इत्येवं ह्रस्व एव श्रूयते । अन्यत्र तु 'व्वृ' इत्येवं गुरुराश्रीयते ।

---

१. मुम्बईमुद्रिते बहुत्र रेफोत्तरवर्तिनो व्यञ्जनस्य द्विर्वचनाभावः, छकारस्य च सचकारः 'च्छ' इत्येवं पाठ उपलभ्यते । अस्य कोशस्य 'च्छ' इत्येवं रूपः पाठो दशमाध्यायपर्यन्तं निदर्शनार्थं टिप्पण्यां निर्दिष्टः । **घसंज्ञके** कोशे व्यञ्जनानां यथायथं द्विर्वचनपाठेऽपि छकारश्चकाररहित एव प्रायेण दृश्यते । पाणिनीयव्याकरणानुसारं यत्र तुगागमस्य नित्यत्वमुक्तं, तत्रापि वैदिकपाठे व्यवस्थया विकल्प उपलभ्यते ।

संहितायां **वाम् वै वः वा वृ** एषां वकारस्य लघुत्वं याज्ञवल्क्यशिक्षाया-मभिहितम् ।

ख—अस्मिन् पाठे आवेष्टनकाले इतिकारात् परः पदादिर्वकारो गुरुः स्मर्यते द्विश्च लिख्यते । तद्यथा—

व्विष्णोऽइतिव्विष्णो । १।४ ॥

व्विश्वायुरितिव्विश्व आयुः । १।४ ॥

अन्यपदकोशेषु इतिकारात् परः पदादिर्वकारो लघुः स्मर्यते सकृच्च लिख्यते । तद्यथा—

व्विष्णोऽइतिविष्णो । १।४ ॥

व्विश्वायुरितिविश्व आयुः । १।४ ॥

ग—अस्मिन् पदपाठेऽवग्रहात् पर उत्तरभागादिर्वकारो लघुः स्मर्यते सकृच्च लिख्यते । तद्यथा—

देववीतयऽइतिदेव वीतये । १।१५ ॥

ब्रह्मवनीतिब्रह्म वनि । १।१८ ॥

अपरेषु कोशेष्ववग्रहात् परो वकारो गुरुः स्मर्यते द्विश्च लिख्यते । तद्यथा—

देववीतयऽइतिदेव व्वीतये । १।१५ ॥

ब्रह्मवनीतिब्रह्म व्वनि । १।१८ ॥

घ—अस्मिन् पदपाठ आवेष्टने इतिकरणात् परो यकारो गुरुः स्मर्यते द्विश्च लिख्यते । तद्यथा—

य्यज्ञपतिरितिय्यज्ञ पतिः । १।२ ॥

अन्येषु पदकोशेषु इतिकारात् परो यकारो लघुः स्मर्यते सामान्यरूपेण च लिख्यते । तद्यथा—

यज्ञपतिरितियज्ञ पतिः । १।२ ॥

विशेषः—अस्मिन् कोशे गुरुर्यकारोऽपि गुरुवकारस्येव द्वि-लिख्यते । अन्यकोशेषु तु प्रायेण 'य़' इत्येवं निर्दिश्यते ।

ङ--अस्मिन् पदकोशेऽवग्रहादुत्तरो यकारो लघुः स्मर्यते । तद्यथा—

देवयुवमितिदेव युवम् । १।१२ ॥

अन्येषु कोशेषु अवग्रहात् परो यकारो गुरुः स्मर्यते 'य़' इत्येवं च लिख्यते । तद्यथा—

देवयुवमितिदेव य़ुवम् । १।१२ ॥

विशेषः—अस्मिन् कोशे यकारवकारयोर्गुरुत्वलघुत्वयोः स्वतन्त्रायां व्यवस्थायां सत्यपि बहुत्र प्रथमद्वितीयतृतीयपाठवद् वैपरीत्येनापि लेखनं दृश्यते । स लेखककृतः प्रमादपाठो ज्ञेयः । एतादृशेषु स्थलेषु शुद्धः पाठष्टिप्पण्यां प्रदर्शितः ।

च—अस्मिन् पदपाठे व्यञ्जनान्तरेणासंपृक्तो लघुयकारो मध्ये-ऽधस्ताच्चोभयत्र बिन्दुना सह निर्दिश्यते, क्वचिदेकेनापि बिन्दुना । तद्यथा—

देवयज्यायाऽइतिदेव यज्यायै । १।१३ ॥

अत्र इतिपदात् पूर्वौ य्य या, परौ च य्य यै इत्यत्र यकारः ।

टिप्पणी—मध्यवर्तिनो बिन्दोर्मुद्रणे निर्देशो न संभवति, तादृशमुद्राक्षरस्याभावात् । अतोऽस्माभिरिह मध्यबिन्दुर्न निर्दिष्टः, अधस्तादेक एव बिन्दुः 'य़' इत्येवं निर्दिष्टः । अपि च 'य़' इत्यस्मिन् मुद्राक्षरे उकारमात्रायाः संबन्धः शक्यो नाभूदिति कृत्वा तादृशेषु स्थलेषु उकारमात्राया अधस्तात् 'यु' इत्येवं बिन्दुना निर्देशो विहितः ।

छ—अस्मिन्नपि पाठे 'गच्छ' आदिषु तृतीयपाठ इव छकारात् पूर्वं श्रूयमाणश्चकारो न दृश्यते ।

ज—अस्मिन् पदपाठे सकारात् पूर्ववर्ती वर्गीयः **प्रथमो** वर्णः प्रायेण **द्वितीय** उपलभ्यते । तद्यथा—

ऋख्सामाभ्याम् । ४।१ ॥ ऋख्सामयोः । ४।९ ॥

एवमेवान्यत्रापि **ऋक्साम**-शब्दे खकारो दृश्यते[1]। तथा—

अर्वुर्थ्स्वित्यर्वुत् सु । हृथ्स्वितिंहृत् सु । ४।३१ ॥

पृथ्स्वितिंपृत् सु । ६।२६ (पदपाठे ६।२७) ॥

मथ्स्व । ८।५ (पदपाठे ८।४) ॥

पृथ्स्वितिंपृत् सु । ९।८ ॥

पश्चाथ्सदऽइतिंपश्चात् सदः । ९।३५ ॥

इत्येवमादिषु प्रथमवर्णस्य स्थाने द्वितीयवर्णापत्तिर्दृश्यते। न केवलं पदपाठ एवापि त्वस्मिन् पदकोशे मन्त्रप्रतीकनिर्देशेऽपि द्वितीयवर्णापत्तिरुपलभ्यते। तद्यथा—

तथ्सवितुः । तत् ! सवितुः । ३।३५ मन्त्रपदे ॥

विशेषः—अस्मिन् पदकोशे **वत्स-उत्स-अप्स-गृत्स-अप्सरा** इत्यादिषु द्वितीयवर्णापत्तिर्न दृश्यते।

ककोशं विहायान्यकोशेषु द्वितीयवर्णापत्तिर्नदृश्यते, परन्तु मुम्बईमुद्रिते 'ट' संज्ञके कोशे क्वचित् द्विवर्चनेन सह द्वितीयवर्णापत्तिरुपलभ्यते। तद्यथा—

उत्थ्मौं । १३।३१ ॥ **उत्थ्सम् । १३।४४ ॥**

अप्फ्सः । १४।४ ॥ **द्रप्फ्सः । १४।९ ॥**

मुम्बईमुद्रिते क्वचिदेव द्वितोयवर्णापत्तेर्दर्शनात् मुद्रणप्रमादः स इत्यस्माकं मतम्।

वर्गीयप्रथमवर्णस्थाने तद्वर्गीयद्वितीयवर्णलेखनपद्धतिस्**तैत्तिरीयाणां संहितादिषू**पलभ्यते। वार्त्तिककारः कात्यायनोऽपि पौष्करसादेराचार्यस्य मते **'चयो द्वितीयाः शरि पौष्करसादेः'** (८।४।४८) इति वार्तिकेन प्रथमानां द्वितीयत्वमादिशति।

---

१. यथा—१३।५६ (पदपाठे १३।५१), १८।४३ (पदपाठे १८।४१)।

ऋ—अस्मिन् पदपाठे क्वचिद् अन्यकोशेभ्यः पाठभेदा अप्युपलभ्यन्ते, ते प्रायेण लेखकप्रमादजाः, परन्तु क्वचित् तादृशा अपि पाठभेदाः सन्ति, **ये पाठभेदत्वेनैव स्वीकर्तुमर्हाः** । तद्यथा—

(i) **ऊर्णम्म्रदसमित्यूर्णम् म्रदसम् । २।२, ९ ॥**

ऊर्णम्म्रदाऽइत्यूर्णम् म्रदाः । २१।३३ (पत्रा ४, क) ॥

अन्येषु पदकोशेषु तु **'ऊर्णम्म्रदाऽइत्यूर्ण म्रदाः'** इत्येवमवगृह्यते । कपाठानुसारी पदविभागो मैत्रायणीसंहितायाः 'लिपजिग'-संस्करणे प्रथमभागे एकादशे (११) पृष्ठे टिप्पण्यां **'ऊर्णम्रदा इत्यूर्ण म्रदाः'** इत्येवं निर्दिष्ट उपलभ्यते ।

ककोशेऽपि द्वयोः स्थानयोः (४।१०; २१।५७ पत्रा ६, क) **'ऊर्णम्म्रदाऽइत्यूर्ण म्रदाः'** इत्येव पाठो दृश्यते, स च प्रमादपाठः स्यात् ।

(ii) **पितरो यथाभागमा वृषायिषत** । २।३१ ॥ इत्यत्र—

आ । वृषायिषत ।

इति पदच्छेदो दृश्यते । अन्यपदकोशेषु तु—

आ । अवृषायिषत । इति दृश्यते ।

(iii) शुक्लयजुषि १७।३ मन्त्रे श्रूयते—

घृतश्चुतो मधुश्चुतः ।

पदग्रन्थेष्वस्य पाठ एवमुपलभ्यते—

घृतश्चुतऽइतिघृत श्चुतः । मधुश्चुतऽइतिमधु श्चुतः ।

परन्त्वस्मिन् ककोशे—

घृतश्च्युतऽइतिघृत श्च्युतः । मधुश्च्युतऽइतिमधु श्च्युतः ।

मधुश्चुतः पदं यजुषि २१।४२ मन्त्रेऽपि श्रूयते । तत्रापि कपाठे सयकारः **'मधुश्च्युतः'** इत्येव पाठो दृश्यते ।

इदं चावधेयम्—यजुषः १७।३ मन्त्रस्य मुम्बईमुद्रिते उव्वट-महीधरभाष्यग्रन्थे स्वामिदयानन्दभाष्ये च सयकारवान् ‘**घृतश्च्युतो मधुश्च्युतः**’ पाठो दृश्यते, तथैव च व्याख्यायते। परन्तु २१।४२ मन्त्रस्थे ‘**मधुश्चुतः**’ पदे' यकार एषु भाष्यग्रन्थेषु नोपलभ्यते।

अयं पाठो लेखकप्रमाज इति न शक्यते वक्तुम्, द्वयोः स्थानयोः समानरूपेण पाठात्। नैतावदेव, मैत्रायणीपदग्रन्थेऽपि ‘**मधुश्च्युत इतिमधुः च्युतः**’ इति सयकारपाठ उपलभ्यते[1]। सकारस्तत्र पूर्वस्यांश इति तु विशेषः[2]।

(iv) माध्यन्दिनसंहितायां १२।४ मन्त्रे तदीये पदपाठे च ‘**वामदेव्यम्**’ इति पदमन्तोदात्तं श्रूयते। परन्तु ककोशे ‘**वामदेव्यम्**’ इति पदमन्तस्वरितं पठ्यते। तद्यथा—

वामदेव्यमितिवाम देव्यम्।

अन्तस्वरितत्वं च वामदेव्यस्य नान्यत्रोपलब्धे वैदिकवाङ्मयेऽस्माभिरुपलब्धः। भगवान् पाणिनिस्तु—**वामदेवाड्ड्यड्डौ** (अष्टा० ४।२।८) इति सूत्रेण **ड्यत्-ड्यौ** द्वौ प्रत्ययौ विदधाति। तत्र ड्यप्रत्यये प्रत्ययस्वरेणान्तोदात्तो वामदेव्यशब्दो निष्पद्यते, ड्यति तु **तित्स्वरितम्** (अष्टा० ६।१।१७९) इत्यनुशासनाद् अन्तस्वरितः, यथा चात्र कपाठ उपलभ्यते।

एतादृशाः पाठविशेषा अस्य ककोशस्य माध्यन्दिनसंहितायाः कस्याश्चिदवान्तरशाखायाः पदपाठत्वं द्योतयन्ति।

(v) माध्यन्दिन-पदपाठे यत्र यत्र ‘ऊँऽइत्यूँ’ पाठो दृश्यते तत्रास्मिन् कोशे ‘उंऽइत्युम्’ इत्येवं पाठ उपलभ्यते।

महाभाष्ये उञ ऊँ (१।१।१८) सूत्रभाष्ये योगविभागेन ‘ऊँ इति’ ‘उ इति’ च द्वौ प्रयोगौ प्रदर्शितौ। तैत्तिरीयसंहितायां मन्त्रपाठे यत्र यत्र ‘उ’ पदं भूयते, तत्र तत्र पदपाठे ‘उ’ इत्येव प्रयुज्यते। तत्र इतिना प्रगृह्यत्वमपि न प्रदर्श्यते।

---

१. द्रष्टव्यम्—अस्मिन्नेव संस्करणे १७।३ मन्त्रस्य पदपाठस्य टिप्पण्याम्।

२. [illegible]तीयम्—सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः (वा० ३।१।११), दधिस्यति, मधुस्यति।

ञ—अस्मिन् कोशेऽन्तिमे दशके प्रत्यध्यायमन्ते '**शाकल्यकृते पदेन**' इत्येवं पाठो दृश्यते ।

कलकत्तानगरस्य 'रायलएशियाटिक-सोसाइटी' इत्याख्यस्य पुस्तकालयेऽप्यस्ति १६६० संख्याक उत्तरार्धस्यैकः कोशो, यस्य चत्वारिंशत्तमेऽध्याये '**शाकल्यकृते पदे**' इत्येवं पाठ उपलभ्यते ।

अनयोर्द्वयोर्हस्तलेखयोस्तत्राप्यास्माकीनस्यातिप्राचीनस्य हस्तलेखस्य प्रामाण्येन वाजसनेयसंहितायाः पदपाठोऽपि शाकल्यप्रोक्त इति शक्यते वक्तुम् ।

ट—अस्मिन् पदपाठे पुनरुक्तानां पदानां मन्त्रांशानां मन्त्राणां च संक्रमो (=लोपो) न दृश्यते[1], ते यथास्थानं पठ्यन्ते । अतोऽस्मिन् ग्रन्थे मन्त्रकण्डिकासंख्यया साकं पदकण्डिकासंख्यायाः क्वचिदपि भेदो नोपलभ्यते (अन्यकोशेषु पुनरुक्तानां लोपात् संख्याभेदो जायते) । यत्र क्वचित् पुनरुक्तानां मन्त्राणां पाठो नापि दृश्यते, तत्रापि प्रतीकमात्रं निर्दिश्य स्थानं रिक्तं परित्यज्यते पाठलेखनाय ।

गलितागलितपाठयोः को मुख्यः पाठः

कपाठवर्जमन्येषु सर्वेषु कोशेषु पुनरुक्तानां पदानां मन्त्रांशानां मन्त्राणां च संक्रमो दृश्यते । वाजसनेयप्रातिशाख्येऽपि संक्रमविधानं दृश्यते । ततो जायते विचारणा यत् कपाठस्य किं मूलमिति ?

एतस्मिन् विषये पदपाठस्य **संक्रमरूपः पाठ एव मूलभूत** इत्यस्माकं मतम् । तत्रैते हेतवः—

क—वाजसनेयप्रातिशाख्ये संक्रमपाठविषयकाणां नियमानामुपलम्भात् ज्ञायते यत्तन्मते संक्रमरूप एव पाठो, न तु सकलपाठ इति ।

ख—क-हस्तलेखे यत्र यत्र अन्यकोशे लुप्तानां पदानां मन्त्रांशानां मन्त्राणां वा पदानि लिख्यन्ते, तत्र प्रायेण पदस्वरोऽशुद्धो निर्दिश्यते । क्वचिच्च संहितास्वर एव पदस्वरस्थाने निर्दिश्यते । तद्यथा—

पात । स्वस्तिभिरिति॑ । सदा॑ । नः॒ । २७।२८ ॥

---

१. केवलमेकस्मिन् स्थाने प्रथमाध्यायस्यैकविंशतितमस्य मन्त्रस्य पदपाठे 'अर्धं गलितम्' इति निर्देश उपलभ्यते ।

अत्र पदस्वरानुसारम्—

पात । स्वस्तिभिः । सदा । नः ॥

इत्येवं पाठेन भाव्यम् । इमानि पदान्यन्यकोशेषु न पठ्यन्ते पुनरुक्तत्वात् ।

ग—अन्यत्र गलितानां पदानामिह पाठे बहुत्र अवग्रहेऽप्यशुद्धयो दृश्यन्ते ।

घ—बहुत्र गलितमन्त्रपदेषु क-कोशे मन्त्रस्य प्रतीकमात्रं दृश्यते, पाठपूर्त्यर्थं च स्थानं रिक्तमुलभ्यते ।

एभिर्हेतुभिः संक्रमपाठस्यैव मुख्यत्वं द्योत्यते । लेखकेन कदाचित् ककोशस्याऽऽधारभूते कोशे लुप्तानां पदानां पूर्त्यर्थः प्रयत्नः कृतः स्यात् । तत्पूर्तिकाले पूर्वपठितस्य पदपाठस्य यथायथमस्मरणात् स्वरावग्रहयोरशुद्धयः संजाताः स्युरिति संभाव्यते ।

विशेषः--अत्र मुद्रणे ककोशस्य तावानेव पाठः प्रदर्शितः, यो मुख्यपाठात् द्विरावृत्यभावरूपात् पाठाच्च कथंचिदपि भिद्यते । अत्र कपाठे पदमध्यस्य लघुयकारस्य निदर्शनाय यो विशेषः बिन्दुनिक्षेपरूपः प्रयासो दृश्यते, सोऽप्यत्र यथास्थानं निदर्शितः ।

इत्थमस्मिन् प्रकरणे माध्यन्दिन-पदपाठस्य चतुर्विधः पाठः' इति यथामति सम्यक् प्रतिपादितम् । आशासे वैदिका विद्वांसोऽस्मिन् विषये विचार्य तथ्यमुपस्थापयिष्यन्ति ।

* ओ३म् *

अथ माध्यन्दिन-संहितायाः पदपाठः

प्रथमोऽध्यायः

[उदीच्य-पाठः]

ओ३म् । इषे । त्वा । ऊर्ज्जे । त्वा । वायवः । स्थ । देवः । वः । सविता । प्र । अर्प्पयतु । श्रेष्ठतमायेतिश्रेष्ठ तमाय । कर्म्मणे । आ । प्यायध्वम् । अघ्न्याः । इन्द्राय । भागम् । प्रजावतीरितिप्रजा वतीः । अनमीवाः । अयक्ष्माः । मा । वः । स्तेनः । ईशत । मा । अघशंस-ऽइत्यघ शंसः । ध्रुवाः । अस्मिन् । गोपतावितिगो पतौ । स्यात । बह्वीः । यजमानस्य । पशून् । पाहि ॥१॥

[दाक्षिणात्यपाठस्य विशिष्टांशाः]

श्रेष्ठतमायेतिश्रेष्ठ तमाय । प्यायध्वम् । अघ्न्याः । प्रजावतीरितिप्रजा वतीः । अयक्ष्माः । अघशंसऽइत्यघ शंसः । अस्मिन् । बह्वीः ॥१॥

[कहस्तलेखस्य विशिष्टाः पाठाः][1]

वायवः । वः । अर्प्पयतु । श्रेष्ठतमायेतिश्रेष्ठ तमाय । प्यायध्वम् । इन्द्राय । प्रजावतीरितिप्रजा वतीः । अयक्ष्माः । वः । यजमानस्य ॥१॥

---

१. विशेषः—इतोऽग्रे दाक्षिणात्यपाठस्य कपाठस्य च पार्थक्यं रेखया प्रदर्शयिष्यते । सर्वत्रोपरितनो दाक्षिणात्यपाठोऽधस्तनश्च कपाठो विज्ञेयः ।

वसोः । पवित्रम् । असि । द्यौः । पृथिवी । मातरिश्वनः । घर्मः । विश्वधाऽइतिविश्व धाः ॥ परमेण । धाम्ना । दृंहस्व । मा । ह्वाः । मा । ते । यज्ञपतिरितियज्ञ पतिः । ह्वार्षीत् ॥२॥

शतधारमितिशत धारम् । सहस्रधारमितिसहस्र धारम् ॥ देवः । त्वा । सविता । पुनातु । वसोः । पवित्रेण । शतधारेणेतिशत धारेण । सुप्वेतिसु प्वा । काम् । अधुक्षः ॥३॥

सा । विश्वायुरितिविश्व आयुः । विश्वकर्म्मेतिविश्व कर्म्मा । विश्वधायाऽइतिविश्व धायाः ॥ इन्द्रस्य । त्वा । भागम् । सोमेन । आ । तनच्मि । विष्णोऽइतिविष्णो । हव्यम् । रक्ष ॥४॥

अग्ने । व्रतपतऽइतिव्रत पते । व्रतम् । चरिष्यामि । तत् । शकेयम् । तत् । मे । राध्यताम् ॥ इदम् । अहम् । अनृतात् । सत्यम् । उप । एमि ॥५॥

पवित्रम् । मातरिश्वनः । विश्वधाऽइतिविश्व धाः । धाम्ना । यज्ञपतिरितियज्ञ पतिः ॥२॥

पवित्रेण । सुप्वेतिसु प्वा । अधुक्षः ॥३॥

विश्वायुरितिविश्व आयुः । विश्वकर्म्मेतिविश्व कर्म्मा । विश्वधायाऽइतिविश्व धायाः । तनच्मि । विष्णोऽइतिविष्णो । हव्यम् । रक्ष ॥४॥

अग्ने । चरिष्यामि । राध्यताम् । सत्यम् ॥५॥

विश्वधाऽइतिविश्व धाः । यज्ञपतिरितियज्ञ पतिः ॥२॥

विश्वायुरितिविश्व आयुः । विश्वकर्म्मेतिविश्व कर्म्मा । विश्वधायाऽइतिविश्व धायाः । विष्णोऽइतिविष्णो ॥४॥

व्रतपतऽइतिव्रत पते । शकेयम् ॥५॥

कः । त्वा । युनक्ति । सः । कस्मै । तस्मै ॥ कर्मणे । वाम् । वेषाय । वाम् ॥६॥

प्रत्युष्टमितिप्रति उष्टम् । रक्षः । प्रत्युष्टाऽइतिप्रति उष्टाः । अरातयः । निष्टप्तम् । निस्तप्तमितिनिः तप्तम् । रक्षः । निष्टप्ताः । निस्तप्ताऽइतिनिः तप्ताः । अरातयः ॥ उरु । अन्तरिक्षम् । अनु । एमि ॥७॥

धूः । असि । धूर्व । धूर्वन्तम् । धूर्व । तम् । यः । अस्मान् । धूर्वति । तम् । धूर्व । यम् । वयम् । धूर्वामः ॥ देवानाम् । असि । वह्नितममितिवह्नि तमम् । सस्नितममितिसस्नि तमम् । पप्रितममितिपप्रि तमम् । जुष्टतममितिजुष्ट तमम् । देवहूतममितिदेव हूतमम् ॥८॥

अहुतम् । असि । हविर्धानमितिहविः धानम् ॥ विष्णुः । त्वा । क्रमताम् । उरु । वाताय । अपहतमित्यप हतम् । रक्षः । यच्छन्ताम् । पञ्च ॥९॥

युनक्ति । कस्मै । तस्मै ॥६॥

प्रत्युष्टमितिप्रति उष्टम् । रक्षः । प्रत्युष्टाऽइतिप्रति उष्टाः । निष्टप्तम् । निस्तप्तमितिनिः तप्तम् । रक्षः । निष्टप्ताः । निस्तप्ताऽइतिनिः तप्ताः । अन्तरिक्षम् ॥७॥

अस्मान् । वह्नितममितिवह्नि तमम् । सस्नितममितिसस्नि तमम् । पप्रितममितिपप्रि तमम् । जुष्टतममितिजुष्ट तमम् ॥८॥

विष्णुः । अपहतमित्यप हतम् । रक्षः । यच्छन्ताम् ॥९॥

य्युनक्ति । वाम् । वेषाय । वाम् ॥६॥ अरातयः । अरातयः ॥७॥

य्यः । य्यम् । वयम् । वह्नितममितिवह्नि तमम् ॥८॥

वाताय । य्यच्छन्ताम् ॥९॥

देवस्य । त्वा । सवितुः । प्रसवऽइतिप्र सवे । अश्विनोः । बाहुब्भ्यामितिबाहु भ्याम् । पूष्ण्णः । हस्त्ताब्भ्याम् । अग्ग्नये । जुष्टम् । गृह्ण्णामि । अग्ग्नीषोमाब्भ्याम् । जुष्टम् । गृह्ण्णामि ॥१०॥

भूताय । त्वा । न । अरातये । स्वः । अभिविक्ख्येष-मित्त्यभि विक्ख्येषम् । दृꣳहन्ताम् । दुर्य्याः । पृथिव्याम् । उरु । अन्तरिक्क्षम् । अनु । एमि । पृथिव्याः । त्वा । नाभौ । सादयामि । अदित्त्याः । उपस्त्थऽइत्त्युप स्थे । अग्ग्ने । हव्यम् । रक्क्ष ॥११॥

पवित्त्रेऽइतिपवित्त्रे । स्त्थः । वैष्ण्णव्यौ । सवितुः । वः । प्रसवऽइतिप्र सवे । उत् । पुनामि । अच्छिद्द्रेण । पवित्त्रेण । सूर्य्यस्य । रश्म्मिभिरितिरश्म्मि भिः । देवीः । आपः । अग्ग्रेगुवऽइत्त्यग्ग्रे गुवः । अग्ग्रेपुवऽइत्त्यग्ग्रे पुवः । अग्ग्ने । इमम् । अद्द्य । यज्ज्ञम् । नयत । अग्ग्ने । यज्ज्ञ-

---

प्रसवऽइतिप्र सवे । अश्विनोः । बाहुभ्यामितिबाहु भ्याम् । पूष्णः । हस्ताभ्याम् । अग्नये । जुष्टम् । गृह्णामि । अग्नीषोमाभ्याम् । जुष्टम् । गृह्णामि ॥१०॥

अभिविख्येषमित्यभि विख्येषम् । पृथिव्याम् । अन्तरिक्षम् । पृथिव्याः । अदित्याः । उपस्थऽइत्युप स्थे । अग्ने । हव्यम् । रक्ष ॥११॥

पवित्रेऽइतिपवित्रे । वैष्णव्यौ । प्रसवऽइतिप्र सवे । अछिद्रेण । पवित्रेण । रश्मिभिरितिरश्मि भिः । अग्रेगुवऽइत्यग्रे गुवः । अग्रेपुवऽइत्यग्रे पुवः । अग्ने ।

अग्नये ॥१०॥

भूताय । अरातये । अभिविख्यैषमित्यभि विख्यैषम् । दुर्याः । सादयामि ॥११॥

वः । सूर्यस्य । यज्ञम् । नयत । यज्ञपतिमितियज्ञ पतिम् ।

पतिमितियज्ञ पतिम् । सुधातुमितिसु धातुम् । यज्ञ-पतिमितियज्ञ पतिम् । देवयुवमितिदेव युवम् ॥१२॥

युष्माः । इन्द्रः । अवृणीत । वृत्रतूर्य्यइतिवृत्र तूर्य्ये । यूयम् । इन्द्रम् । अवृणीध्वम् । वृत्रतूर्य्यइतिवृत्र तूर्य्ये । प्रोक्षिताइतिप्र उक्षिताः । स्थ । अग्नये । त्वा । जुष्टम् । प्र । उक्षामि । अग्नीषोमाभ्याम् । दैव्याय । कर्म्मणे । शुन्धध्वम् । देवयज्यायाइतिदेव यज्यायै । यत् । वः । अशुद्धाः । पराजघ्नुरितिपरा जघ्नुः । इदम् । वः । तत् । शुन्धामि ॥१३॥

शर्म्म । असि । अवधूतमित्यव धूतम् । रक्षः । अव-धूताइत्यव धूताः । अरातयः । अदित्याः । त्वक् । असि । प्रति । त्वा । अदितिः । वेत्तु । अद्रिः । असि ।

अद्य । यज्ञम् । अग्रे । यज्ञपतिमितियज्ञ पतिम् । यज्ञपतिमितियज्ञ पतिम् ॥१२॥

युष्माः । वृत्रतूर्यइतिवृत्र तूर्ये । अवृणीध्वम् । वृत्रतूर्यइतिवृत्र तूर्ये । प्रोक्षिताइतिप्र उक्षिताः । अग्नये । जुष्टम् । उक्षामि । अग्नीषोमाभ्याम् । दैव्याय । शुन्धध्वम् । देवयज्यायाइतिदेव यज्यायै । अशुद्धाः । पराजघ्नुरितिपरा जघ्नुः ॥१३॥

अवधूतमित्यव धूतम् । रक्षः । अवधूताइत्यव धूताः । अदित्याः ।

य्यज्ञपतिमितिय्यज्ञ पतिम् । देवयुवमितिदेव युवम् ॥१२॥

य्युष्माः । वृत्रतूर्य्यइतिवृत्र तूर्य्ये । य्यूयम् । वृत्रतूर्य्यइतिवृत्र तूर्य्ये । अग्नये । दैव्याय । देवयज्यायाइतिदेव यज्यायै । य्यत् । वः । वः ॥१३॥

अरातयः ॥१४॥

वानस्पत्यः । ग्रावा । असि । पृथुबुध्न इति पृथु बुध्नः । प्रति । त्वा । अदित्याः । त्वक् । वेत्तु ॥१४॥

अग्नेः । तनूः । असि । वाचः । विसर्जनमिति वि सर्जनम् । देववीतय इति देव वीतये । त्वा । गृह्णामि । बृहद्ग्रावेति बृहत् ग्रावा । असि । वानस्पत्यः । सः । इदम् । देवेभ्यः । हविः । शमीष्व । शमिष्वेति शमिष्व । सुशमीति सु शमी । शमीष्व । शमिष्वेति शमिष्व ॥ हविष्कृत् । हविष्कृदिति हविः कृत् । आ । इहि ॥१५॥

कुक्कुटः । असि । मधुजिह्व इति मधु जिह्वः । इषम् । ऊर्जम् । आ । वद । त्वया । वयम् । सङ्घातं सङ्घातमिति सङ्घातम् सङ्घातम् । जेष्म । वर्षवृद्धमिति वर्ष वृद्धम् । असि । प्रति । त्वा । वर्षवृद्धमिति वर्ष वृद्धम् । वेत्तु । परापूतमिति परा पूतम् । रक्षः । परापूता इति परा पूताः । अरातयः । अपहतमित्यप हतम् । रक्षः । वायुः । वः । वि । विनक्तु । देवः । वः । सविता । हिरण्यपाणि-

---

अद्रिः । वानस्पत्यः । पृथुबुध्न इति पृथु बुध्नः । अदित्याः ॥१४॥

अग्नेः । गृह्णामि । बृहद्ग्रावेति बृहत् ग्रावा । वानस्पत्यः । देवेभ्यः । शमीष्व । शमिष्वेति शमिष्व । शमीष्व । शमिष्वेति शमिष्व ॥१५॥

मधुजिह्व इति मधु जिह्वः । जेष्म । वर्षवृद्धमिति वर्ष वृद्धम् । वर्षवृद्धमिति वर्ष वृद्धम् । रक्षः । अपहतमित्यप हतम् । रक्षः । विनक्तु । हिरण्य-

---

विसर्जनमिति वि सर्जनम् । देववीतय इति देव वीतये ॥१५॥

त्वया । वयम् । वर्षवृद्धमिति वर्ष वृद्धम् । वर्षवृद्धमिति वर्ष वृद्धम् । अरातयः । वायुः । वः । वः ॥१६॥

रितिहिरण्य पाणिं । प्रति । गृभ्णातु । अच्छिद्रेण । पाणिना ॥१६॥

धृष्टिः । असि । अप । अग्ने । अग्निम् । आमादमित्याम अदम् । जहि । निः । क्रव्यादमितिक्रव्य अदम् । सेध । आ । देवयजमितिदेव यजम् । वह ॥ ध्रुवम् । असि । पृथिवीम् । दृंह । ब्रह्मवनीतिब्रह्म वनि । त्वा । क्षत्रवनीतिक्षत्र वनि । सजातवनीतिसजात वनि । उप । दधामि । भ्रातृव्यस्य । वधाय ॥१७॥

अग्ने । ब्रह्म । गृभ्णीष्व । धरुणम् । अन्तरिक्षम् ॥ धर्त्रम् । दिवम् ॥ विश्वाभ्यः । त्वा । आशाभ्यः । उप । दधामि । चितः । स्थ । ऊर्ध्वचितऽइत्यूर्ध्व चितः । भृगूणाम् । अङ्गिरसाम् । तपसा । तप्यध्वम् ॥१८॥

धिषणा । असि । पर्वती । प्रति । त्वा । अदित्याः । त्वक् । वेत्तु । दिवः । स्कम्भनीः । असि । धिषणा । असि । पार्वतेयी । प्रति । त्वा । पर्वती । वेत्तु ॥१९॥

पाणिरितिहिरण्य पाणिं । गृभ्णातु । अछिद्रेण ॥१६॥

धृष्टिः । अग्ने । अग्निम् । आमादमित्याम अदम् । क्रव्यादमितिक्रव्य अदम् । ब्रह्मवनीतिब्रह्म वनि । क्षत्रवनीतिक्षत्र वनि । भ्रातृव्यस्य ॥१७॥

अग्ने । ब्रह्म । गृभ्णीष्व । अन्तरिक्षम् । विश्वाभ्यः । आशाभ्यः । ऊर्ध्वचितऽइत्यूर्ध्व चितः । तप्यध्वम् ॥१८॥

अदित्याः । स्कम्भनीः ॥१९॥

देवयजमितिदेव यजम् । ब्रह्मवनीतिब्रह्म वनि । क्षत्रवनीतिक्षत्र वनि । सजातवनीतिसजात वनि । वधाय ॥१७॥

पार्वतेयी ॥१९॥

धान्यम् । असि । धिनुहि । देवान् । प्राणाय । त्वा । उदानायेत्युत् आनाय । व्यानायेतिवि आनाय । दीर्घाम् । अनु । प्रसितिमितिप्र सितिम् । आयुषे । धाम् । चक्षुषे । त्वा । महीनाम् । पयः । असि ॥२०॥

सम् । वपामि । आपः । ओषधीभिः । ओषधयः । रसेन । रेवतीः । जगतीभिः । पृच्यन्ताम् । मधुमतीरितिमधु मतीः । मधुमतीभिरितिमधु मतीभिः । पृच्यन्ताम् ॥२१॥

जनयत्यै । त्वा । सम् । यौमि । इदम् । अग्नेः । इदम् । अग्नीषोमयोः । इषे । त्वा । घर्म्मः । असि । विश्वायुरितिविश्व आयुः । उरुप्रथाऽइत्युरु प्रथाः । उरु । प्रथस्व । उरु । ते । यज्ञपतिरितियज्ञ पतिः । प्रथताम् । अग्निः । ते । त्वचम् । मा । हिंसीत् । देवः । त्वा । सविता । श्रपयतु । वर्षिष्ठे । अधि । नाके ॥२२॥

धान्यम् । उदानायेत्युत आनाय । दीर्घाम् । प्रसितिमितिप्र सितिम् । चक्षुषे ॥२०॥

पृच्यन्ताम् । पृच्यन्ताम् ॥२१॥

जनयत्यै । अग्नेः । अग्नीषोमयोः । विश्वायुरितिविश्व आयुः । उरुप्रथाऽइत्युरु प्रथाः । यज्ञपतिरितियज्ञ पतिः । अग्निः । वर्षिष्ठे ॥२२॥

प्राणाय । उदानायेत्युत आनाय । व्यानायेतिवि[1] आनाय । आयुषे । पयः ॥२०॥

ओषधयः ॥२१॥

जनयत्यै । यौमि । अग्नीषोमयोः । विश्वायुरितिविश्व आयुः । यज्ञपतिरितियज्ञ पतिः । श्रपयतु ॥२२॥

---

१. ककोशशैल्यनुसारमिह 'व्यानायेतिवि आनाय' इति पाठेन श्राव्यम् ।

मा । भेः । मा । सम् । विक्क्थाः । अतमेरुः । यज्ञः । अतमेरुः । यजमानस्य । प्रजेतिप्र जा । भूयात् । त्रितार्य । त्वा । द्वितार्य । एकतार्य ॥२३॥

आ । ददे । अध्वरकृतमित्यध्वर कृतम् । देवेभ्य॑ः । इन्द्रस्य । बाहुः । असि । दक्षिणः । सहस्रभृष्टिरितिसहस्र भृष्टिः । शततेजाऽइतिशत तेजाः । वायुः । असि । तिग्मतेजाऽइतितिग्म तेजाः । द्विषतः । वधः ॥२४॥

पृथिवि । देवयजनीतिदेव यजनि । ओषध्याः । ते । मूलम् । मा । हिंसिषम् । व्रजम् । गच्छ । गोष्ठानम् । गोस्थानमितिगो स्थानम् । वर्षतु । ते । द्यौः । बधान । देव । सवितरितिसवितः । परमस्याम् । पृथिव्याम् । शतेन । पाशैः । यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः । तम् । अतः । मा । मौक् ॥२५॥

विक्थाः । यज्ञः । प्रजेतिप्र जा ॥२३॥

अध्वरकृतमित्यध्वर कृतम् । देवेभ्य॑ः । दक्षिणः । सहस्रभृष्टिरिति-सहस्र भृष्टिः । तिग्मतेजाऽइतितिग्म तेजाः ॥२४॥

ओषध्याः । गछ । गोष्ठानम् । गोस्थानमितिगो स्थानम् । पृथिव्याम् । अस्मान् । द्वेष्टि । द्विष्मः ॥२५॥

य्यज्ञः । य्यजमानस्य । भूय्यात् । त्रिताय्य । द्विताय्य । एकताय्य ॥२३॥

व्वायुः ॥२४॥

देवय्यजनीतिदेव य्यजनि । य्यः । य्यम् । व्वय्यम् ॥२५॥

अप॑ । अररु॑म् । पृ॒थि॒व्यै । दे॒व॒यज॑ना॒दिति॑दे॒व॒ यज॑नात् । व॒द्ध्या॒स॒म् ॥ अर॑रो॒ऽइत्त्यर॑रो । दिव॑म् । मा । प॒प्त॒ऽ॒ । द्र॒प्सः । ते॒ । द्याम् । मा । स्क॒न् ॥२६॥

गा॒य॒त्त्रेण॑ । त्वा॒ । छन्द॑सा । परि॑ । गृ॒ह्णा॒मि॒ ॥ त्रैष्टु॑भेन । त्रैस्त्तु॑भे॒नेति॒त्त्रैस्त्तु॑भेन । जाग॑तेन । सु॒क्क्ष्मा । च॒ । असि॑ । शि॒वा । च॒ । अ॒सि॒ । स्यो॒ना । सु॒षदा॑ । सु॒सदेति॑सु सदा॑ । ऊर्ज्ज॑स्वती । पय॑स्वती ॥२७॥

पु॒रा । क्रू॒रस्य॑ । वि॒सृ॒प॒ऽइति॑वि॒ सृप॑ः । वि॒र॒प्प्शि॒न्नि॒ति॑वि रप्प्शिन् । उ॒दा॒दा॒येत्त्यु॑त् आदाय॑ । पृ॒थि॒वीम् । जी॒व॒दा॑नु॒मिति॑जी॒व दा॑नुम् ॥ याम् । ऐर॑यन् । च॒न्द्रम॑सि । स्व॒धाभि॑ः । ताम् । ऊँ॒ऽइत्त्यूँ॒ । धीरा॑सः । अ॒नु॒दि॒श्येत्त्य॑नु दि॒श्य॑ । य॒ज॒न्ते॒ ॥ प्रोक्क्ष॑णी॒रिति॑प्प्र॒ उक्क्ष॑णीः । आ । सा॒द॒य॒ । द्वि॒ष॒तः । व॒धः । अ॒सि॒ ॥२८॥

पृ॒थि॒व्यै । व॒ध्या॒स॒म् । अर॑रो॒ऽइत्त्यर॑रो । प॒प्त॒ऽ॒ । द्र॒प्सः ॥२६॥

गा॒य॒त्रेण॑ । गृ॒ह्णा॒मि॒ । त्रैष्टु॑भेन । त्रैस्तु॑भे॒नेति॒त्रैस्तु॑भेन । सु॒क्ष्मा ॥२७॥

वि॒र॒प्शि॒न्निति॑वि रप्शिन् । उ॒दा॒दा॒येत्यु॑त् आदाय॑ । ऊँ॒ऽइत्यूँ॒ । अ॒नु॒दि॒श्येत्य॑नु दि॒श्य॑ । प्रोक्ष॑णी॒रिति॑प्र॒ उक्ष॑णीः ॥२८॥

दे॒व॒य्यज॑ना॒दिति॑दे॒व॒ [1]य्यज॑नात् ॥२६॥

गा॒य्य॒त्रेण॑ । पय्य॑स्वती ॥२७॥

वि॒सृ॒प॒ऽइति॑वि॒ सृप॑ः । वि॒र॒प्शि॒न्निति॑वि रप्शिन् । उ॒दा॒दा॒य्येत्यु॑त आदाय्य॑ । य्याम् । ऐर॑य्यन् । ऊँ॒ इत्युँम्[2] । य्य॒ज॒न्ते॒ । सा॒द॒य्य॒ ॥२८॥

---

१. ककोशशैल्यनुसारमवग्रहादो द्वित्वं न भवति, तेन 'य्यजनात्' इति युक्तः पाठो ज्ञेयः ।

२. 'ऊँ॒ऽइत्यूँ॒' इति शुद्धः पाठो ज्ञेयः ।

अनिंशितऽइत्त्यनिं शित६ं । असि । सपत्त्नक्क्षिदितिं-सपत्त्न क्षित् । व्वाजिनम् । त्वा । व्वाजेद्ध्यायाऽइतिंवाज इद्ध्यायै । सम् । मार्ज्जिम ॥ अनिंशितेत्त्यनिं शिता । असि । सपत्त्नक्क्षिदितिंसपत्त्न क्षित् । व्वाजिनीम् । त्वा । व्वाजेद्ध्याया-ऽइतिंवाज इद्ध्यायै । सम् । मार्ज्जिम ॥२९॥

अदित्त्यै । रास्न्ना । असि । व्विष्णोंर्६ं । व्वेष्प१ः । असि । ऊर्ज्जे । त्वा । अदब्ब्धेन । त्वा । चक्क्षुंषा । अवं । पश्श्यामि ॥ अग्ग्ने१ः । जिह्वा । असि । सुहूरितिंसु हू१ः । देवेब्भ्यः । धाम्म्नेंधाम्म्नऽइतिधाम्म्नें धाम्म्ने । मे । भव । यजुंषेयजुषऽइतियजुंषे यजुषे ॥३०॥

अनिंशितऽइत्यनिं शित६ं । सपत्नक्षिदितिंसपत्न क्षित् । व्वाजेध्याया-ऽइतिंवाज इध्यायै । अनिंशितेत्यनिं शिता । सपत्नक्षिदितिंसपत्न क्षित् । व्वाजेध्यायाऽइतिंवाज इध्यायै ॥२९॥

अदित्यै । रास्ना । व्विष्णोंर्६ं । व्वेष्प१ः । अदब्धेन । चक्षुंषा । पश्यामि । अग्ने१ः । जिह्वा । देवेभ्यः । धाम्नेंधाम्नऽइतिधाम्नें धाम्ने ॥३०॥

व्वाजेध्याय्याऽइतिंवाज[1] इध्याय्यै । मार्य्मि[2] । व्वाजेध्याय्याऽइतिंवाज[1] इध्याय्यै । मार्य्मि[2] ॥२९॥

[3]व्वेष्य१ः । य्यजुंषेय्यजुषऽइतिय्यजुंषे [4]य्यजुषे ॥३०॥

---

१. ककोशशैल्यनुसारमिह 'व्वाज' इति युक्तः पाठो ज्ञेयः ।

२. यकारस्य जकारोच्चारणजोऽपपाठः । 'मार्ज्जिम' इत्येव शुद्धः पाठो ज्ञेयः ।

३. इह 'वेष्पः' इत्यपि पठितुं शक्यः । यतो हि बहुत्र ककोशे यकार-सदृशः पकारो लिख्यते । द्रष्टव्यं प्रथमपरिशिष्टान्ते 'वेष्पः—निवेष्पम्—निवेष्प्याय' पदानां विवेचनम् ।

४. ककोशशैल्यनुसारमवग्रहादौ द्वित्वं न भवति तेन 'य्रजुषे' इति युक्तः पाठो ज्ञेयः ।

सवितुः । त्वा ॥ तेजः । असि । शुक्रम् । अमृतम् । धाम । नाम । प्रियम् । देवानाम् । अनाधृष्टम् । देवयजनमितिदेव यजनम् । असि ॥३१॥

॥ इति वाजसनेयिसंहितापदे प्रथमोऽध्यायः ॥

शुक्रम् । अनाधृष्टम् ॥३१॥

प्रियम् । देवयजनमितिदेव [1]य्यजनम् ॥३१॥

॥ इति श्रीवाजसनेयिसंहितायां पदपाठेन प्रथमोऽध्याय. ॥

---

१. ककोशशैल्यनुसारमिह 'य्यजनम्' इति युक्तः पाठो ज्ञेयः ।

द्वितीयोऽध्यायः

कृष्णः । असि । आखरेष्ठः । आखरेस्स्थऽइत्त्याखरे स्थः । अग्नये । त्वा । जुष्टम् । प्र । उक्क्षामि । वेदिः । असि । बर्हिषे । त्वा । जुष्टाम् । प्र । उक्क्षामि । बर्हिः । असि । स्रुग्भ्यऽइतिस्रुक् भ्यः । त्वा । जुष्टम् । प्र । उक्क्षामि ॥१॥

अदित्यै । व्युन्दनमितिवि उन्दनम् । असि । विष्णोः । स्तुपः । असि । ऊर्णम्म्रदसमित्यूर्णं म्रदसम् । त्वा । स्तृणामि । स्वासस्स्थामितिसु [1]आसस्स्थाम् । देवेभ्यः ।

कृष्णः । आखरेष्ठः । आखरेस्थऽइत्याखरे स्थः । अग्नये । जुष्टम् । उक्षामि । जुष्टाम् । उक्षामि । स्रुग्भ्यऽइतिस्रुक् भ्यः । जुष्टम् । उक्षामि ॥१०॥

अदित्यै । विष्णोः । ऊर्णम्म्रदसमित्यूर्णं[2] म्रदसम् । स्वासस्थामितिसु

अग्नये ॥१॥

व्युन्दनमितिवि उन्दनम् । ऊर्णम्म्रदसमित्यूर्णम्[2] म्रदसम् ।

---

१. 'स्वासस्स्थामितिसु आसस्स्थाम्' इति काश्या मुद्रिते पाठः । विशेषस्त्वत्र चतुर्विधपाठनिरूपणावसरे उक्तः, स तत्रैव द्रष्टव्यः । इतोऽग्रे केवलम् अवग्रहादुत्तरभाग एव प्रदर्शयिष्यते, यत्र स्वरभेदो दृश्यते ।

२. स्वामिदयानन्दस्वीकृतात् पदपाठादन्यत्र यत्र व्यञ्जनद्विर्वचनं नोपलभ्यते तत्रापि सर्वेषु अस्मदुपलब्धेषु कोशेषु म्म्र इत्येव पाठ उपलभ्यते । ककोशे त्ववग्रहे स्वष्टमेव ऊर्णम् म्रदसम् इत्येवमवगृह्यते । अत्र ४।१० मन्त्रस्थः ककोशपाठोऽपि द्रष्टव्यः ।

भुवपतय॒ऽइति॒भुव॑ पतये । स्वाहा॑ । भुव॑नपतय॒ऽइति॒भुव॑न पतये । भूतानाम् । पत॑ये ॥२॥

गन्ध॒र्वः॒ । त्वा॒ । वि॒श्वाव॑सुः । वि॒श्वव॑सु॒रिति॑वि॒श्व व॑सुः । परि॑ । द॒धा॒तु॒ । वि॒श्व॑स्य । अरि॑ष्ट्यै । यज॑मानस्य । प॒रि॒धिरिति॑परि॒ धिः॒ । अ॒सि॒ । अ॒ग्निः॒ । इ॒डः॒ । ई॒डि॒तः॒ ॥ इन्द्र॑स्य । बा॒हुः॒ । अ॒सि॒ । दक्षि॑णः ॥ मि॒त्रावरु॑णौ । त्वा॒ । उ॒त्त॒र॒तः॒ । परि॑ । ध॒त्ता॒म् । ध्रु॒वेण॑ । धर्म्म॑णा ॥३॥

वी॒तिहो॑त्र॒मिति॑वी॒ति हो॑त्रम् । त्वा॒ । क॒वे॒ । द्यु॒मन्त॒मिति॑द्यु॒ मन्त॑म् । सम् । इ॒धी॒म॒हि॒ ॥ अग्ने॑ । बृ॒हन्त॑म् । अ॒ध्व॒रे ॥४॥

आ॒स॒स्था॒म् । दे॒वेभ्य॑ ॥२॥

वि॒श्वाव॑सुः । वि॒श्वव॑सु॒रिति॑वि॒श्व व॑सुः । वि॒श्व॑स्य । अरि॑ष्ट्यै । अ॒ग्निः । दक्षि॑णः । मि॒त्रावरु॑णौ ॥३॥

वी॒तिहो॑त्र॒मिति॑वी॒ति हो॑त्रम् । द्यु॒मन्त॒मिति॑द्यु॒ मन्त॑म् । अग्ने॑ । अ॒ध्व॒रे ॥४॥

भुव॑पतय॒ऽइति॒भुव॑ पतये । भुव॑नपतय॒ऽइति॒भुव॑न पतये । [1]भू॒तानां॑पतय॒ऽइति॑भू॒तानाम् पत॑ये ॥२॥

वि॒श्वव॑सु॒रिति॑वि॒श्व व॑सुः । यज॑मानस्य ॥३॥

वी॒तिहो॑त्र॒मिति॑वी॒ति हो॑त्रम् ॥४॥

---

१. अयं पाठोऽशुद्धः प्रतिभाति, 'भूतानाम्पत॑ये' इत्यत्र द्वयुदात्तत्वदर्शनात् पदद्वयमेव साधु । तेनात्रापि 'भूतानाम् । पत॑ये' इत्येवं शुद्धः पाठो ज्ञेयः ।

समिदितिसम् इत् । असि । सूर्य्यः । त्वा । पुरस्त्तात् । पातु । कस्याः । चित् । अभिशंस्त्याऽइत्त्यभि शंस्त्यै ॥ सवितुः । बाहूऽइतिबाहू । स्थः । ऊर्णम्म्रदसमित्त्यूर्णम्म्रदसम् । त्वा । स्तृणामि । स्वासस्त्थमितिसु [1]आसस्त्थम् । देवेभ्यः । आ । त्वा । वसवः । रुद्राः । आदित्त्याः । सदन्तु ॥५॥

घृताची । असि । जुहूः । नाम्म्ना । सा । इदम् । प्रियेण । धाम्म्ना । प्रियम् । सदः । आ । सीद । उपभृदित्त्युप भृत् । ध्रुवा ॥ ध्रुवा । असदन् । ऋतस्य । योनौ । ता । विष्णोऽइतिविष्णो । पाहि । पाहि । यज्ज्ञम् । पाहि । यज्ज्ञपतिमितियज्ज्ञ पतिम् । पाहि । माम् । यज्ज्ञन्यमितियज्ज्ञ न्यम् ॥६॥

पुरस्तात् । अभिशंस्त्याऽइत्यभि शंस्त्यै । ऊर्णम्म्रदसमित्यूर्णम्[2] म्रदसम् । स्वासस्थमितिसु आसस्थम् । देवेभ्यः । रुद्राः । आदित्याः ॥५॥

नाम्ना । धाम्ना । उपभृदित्युप भृत् । विष्णोऽइतिविष्णो । यज्ञम् । यज्ञपतिमितियज्ञ पतिम् । यज्ञन्यमितियज्ञ न्यम् ॥६॥

सूर्य्यः । ऊर्णम्म्रदसमित्यूर्णम्[2] म्रदसम् ॥५॥

प्रिय्येण । प्रिय्यम् । य्योनौ । विष्णोऽइतिविष्णो । य्यज्ञम् । य्यज्ञपतिमितिय्यज्ञ पतिम् । य्यज्ञन्यमितिय्यज्ञ न्यम् ॥६॥

---

१. 'स्वासस्त्यमितिसु आसस्थम्' इति काशिकोऽपपाठः । 'आसस्थम्' इत्येवं शुद्धः पाठोऽत्र ज्ञेयः । द्रष्टव्याऽत्र पृष्ठ १३ टि० १ ।

२. द्रष्टव्याऽत्र पृष्ठ १३ टि० २ ।

अग्ने । वाजजिदिति वाज जित् । वाजम् । त्वा । सरिष्यन्तम् । वाजजितमिति वाज जितम् । सम् । मार्ज्मि । नमः । देवेभ्यः । स्वधा । पितृभ्य इति पितृ भ्यः । सुयमे इति सु यमे । मे । भूयास्तम् ॥७॥

अस्कन्नम् । अद्य । देवेभ्यः । आज्यम् । सम् । भ्रियासम् । अङ्घ्रिणा । विष्णो इति विष्णो । मा । त्वा । अव । क्रमिषम् । वसुमतीमिति वसु मतीम् । अग्ने । ते । छायाम् । उप । स्थेषम् । विष्णोः । स्थानम् । असि । इतः । इन्द्रः । वीर्यम् । अकृणोत् । ऊर्ध्वः । अध्वरः । आ । अस्थात् ॥८॥

अग्ने । वेः । होत्रम् । वेः । दूत्यम् । अवताम् । त्वाम् । द्यावापृथिवी इति द्यावापृथिवी । अव । त्वम् ।

अग्ने । सरिष्यन्तम् । देवेभ्यः । पितृभ्य इति पितृ भ्यः । भूयास्तम् ॥७॥

अस्कन्नम् । अद्य । देवेभ्यः । आज्यम् । विष्णो इति विष्णो । अग्ने । विष्णोः । ऊर्ध्वः । अध्वरः । अस्थात् ॥८॥

अग्ने । होत्रम् । दूत्यम् । द्यावापृथिवी इति द्यावापृथिवी । द्यावापृथिवी-

---

वाजजिदिति वाज जित् । वाजजितमिति वाज जितम् । मार्ज्मि[1] । सुयमे इति सु [2]यमे । भूयास्तम् ॥७॥

श्रियासम् । विष्णो इति विष्णो । वसुमतीमिति वसु मतीम् । छायाम् । वीर्यम् ॥८॥

अवताम्[3] । त्वाम्[3] ॥९॥

---

१. यकारस्य जकारोच्चारणजोऽपपाठः । 'मार्ज्मि' इति शुद्धः पाठो ज्ञेयः

२. ककोशशैल्यनुसारमिह 'यमे' इति शुद्धः पाठो द्रष्टव्यः ।

३. संहितायाम् 'अवत्वं' इति दर्शनादपपाठोऽयम् । तेन 'अव । त्वम्' इत्येवं शुद्धः पाठो ज्ञेयः ।

द्यावापृथिवीऽइतिद्यावापृथिवी । स्विष्टकृदितिस्विष्ट कृत् । देवेभ्यः । इन्द्रः । आज्येन । हविषा । भूत् । स्वाहा । सम् । ज्योतिषा । ज्योतिः ॥९॥

मयि । इदम् । इन्द्रः । इन्द्रियम् । दधातु । अस्मान् । रायः । मघवानऽइतिमघ वानः । सचन्ताम् ॥ अस्माकम् । सन्तु । आशिषऽइत्त्या शिषः । सत्त्याः । नः । सन्तु । आशिषऽइत्त्या शिषः । उपहूतेत्त्युप हूता । पृथिवी । माता । उप । माम् । पृथिवी । माता । ह्वयताम् । अग्निः । आग्नीध्रात् । स्वाहा ॥१०॥

उपहूतऽइत्त्युप हूतः । द्यौः । पिता । उप । माम् । द्यौः । पिता । ह्वयताम् । अग्निः । आग्नीध्रात् । स्वाहा ॥ प्रति । गृह्णामि । अग्नेः । त्वा । आस्येन । प्र । अश्नामि ॥११

एतम् । ते । देव । सवितः । यज्ञम् । प्र । आहुः । बृहस्पतये । ब्रह्मणे ॥ तेन । यज्ञम् । अव । तेन । यज्ञपतिमितियज्ञ पतिम् । तेन । माम् । अव ॥१२॥

ऽइतिद्यावापृथिवी । स्विष्टकृदितिस्विष्ट कृत् । देवेभ्यः । आज्येन ॥९॥

अस्मान् । अस्माकम् । आशिषऽइत्या शिषः । सत्याः । आशिषऽइत्या शिषः । उपहूतेत्युप हूता । अग्निः । आग्नीध्रात् ॥१०॥

उपहूतऽइत्युप हूतः । अग्निः । आग्नीध्रात् । गृह्णामि । अग्नेः । अश्नामि ॥११॥

यज्ञम् । बृहस्पतये । ब्रह्मणे । यज्ञम् । यज्ञपतिमितियज्ञ पतिम् ॥१२॥

मयि । इन्द्रियम् । रायः । मघवानऽइतिमघ वानः । ह्वयताम् ॥१०॥

ह्वयताम् ॥११॥

य्यज्ञम् । बृहस्पतये । य्यज्ञम् । य्यज्ञपतिमितिय्यज्ञ पतिम् ॥१२॥

मनः । जूतिः । जुषताम् । आज्ज्यस्य । बृहस्पतिः । यज्ञम् । इमम् । तनोतु । अरिष्टम् । यज्ञम् । सम् । इमम् । दधातु ॥ विश्वे । देवासः । इह । मादयन्ताम् । ओम् । प्र । तिष्ठ ॥१३॥

एषा । ते । अग्ने । समिदितिसम् इत् । तया । वर्द्धस्व । च । आ । च । प्यायस्व ॥ वर्द्धिषीमहि । च । वयम् । आ । च । प्यासिषीमहि ॥ ससवाथंसमितिसस वाथंसम् । वाजजितमितिवाज जितम् ॥१४॥

अग्नीषोमयोः । उज्जितिमित्युत् जितिम् । अनु । उत् । जेषम् । वाजस्य । मा । प्रसवेनेतिप्र सवेन । प्र । ऊहामि ॥ अग्नीषोमौ । तम् । अप । नुदताम् । वाजस्य । एनम् । प्रसवेनेतिप्र सवेन । अप । ऊहामि ॥ इन्द्राग्ग्न्योः ॥ इन्द्राग्ग्नीऽइतीन्द्राग्ग्नी ॥१५॥

आज्यस्य । बृहस्पतिः । यज्ञम् । अरिष्टम् । यज्ञम् । विश्वे । ओ३म् । तिष्ठ ॥१३॥

अग्ने । वर्धस्व । वर्धिषीमहि ॥१४॥

अग्नीषोमयोः । उज्जितिमित्युत् जितिम् । प्रसवेनेतिप्र सवेन अग्नीषोमौ । प्रसवेनेतिप्र सवेन । इन्द्राग्न्योः । इन्द्राग्नीऽइतीन्द्राग्नी ॥१५॥

य्यज्ञम् । य्यज्ञम् । मादयन्ताम् ॥१३॥

तय्या । प्यायस्व । व्वयम् । ससवाथंसमितिसस वाथंसम् । व्वाजजितमितिव्वाज जितम् ॥१४॥

अग्नीषोमय्योः ॥१५॥

वसुंभ्य॒ऽइतिवसुं भ्यः᳖ । त्वा । रु॒द्रेभ्यः॑ । आ॒दि॒त्येभ्यः॑ । सम् । जा॒ना॒था॒म् । द्या॒वा॒पृ॒थि॒वी॒ऽइति॒द्या॒वा॒पृ॒थि॒वी । मि॒त्रावरु॑णौ । त्वा । वृ॒ष्ट्या । अ॒व॒ता॒म् ॥ व्यन्तु॑ । वयः॑ । अ॒क्तम् । रिहा॑णाः᳖ । म॒रुता॑म् । पृष॑तीः᳖ । ग॒च्छ॒ । व॒शा । पृश्निः॑ । भू॒त्वा । दिव॑म् । ग॒च्छ॒ । ततः॑ । नः᳖ । वृष्टि॑म् । आ । व॒ह॒ ॥ च॒क्षु॒ष्पाः । च॒क्षु॒ष्पा॒ऽइति॑चक्षुः᳖ पाः । अग्ने॑ । अ॒सि॒ । चक्षुः॑ । मे॒ । पा॒हि॒ ॥१६॥

सम् । प॒रि॒धि॒मिति॑परि धिम् । प॒र्य॒धत्था॒ऽइति॑परि॒ अ॒धत्थाः᳖ । अग्ने॑ । दे॒व॒ । प॒णि॒भि॒रिति॑प॒णि भिः॑ । गु॒ह्य॒मा॑नः᳖ । तम् । ते॒ । ए॒तम् । अनु॑ । जोष॑म् । भ॒रा॒मि॒ । ए॒षः । न । इ॒त् । त्वत् । अ॒प॒चे॒तया॑ता॒ऽइत्य॑प चे॒तया॑तै । अ॒ग्नेः । प्रि॒यम् । पाथः॑ । अपि॑ । इ॒तम् ॥१७॥

वसुंभ्य॒ऽइति॒वसुं भ्यः᳖ । रु॒द्रेभ्यः॑ । आ॒दि॒त्येभ्यः॑ । द्या॒वा॒पृ॒थि॒वी॒ऽइति॑द्यावापृथिवी । मि॒त्रावरु॑णौ । वृ॒ष्ट्या । अ॒क्तम् । ग॒छ[1] । पृश्निः॑ । भू॒त्वा । ग॒छ[1] । वृष्टि॑म् । च॒क्षु॒ष्पाः । च॒क्षु॒ष्पा॒ऽइति॑चक्षुः᳖ पाः । अ॒ग्ने । चक्षुः॑ ॥१६॥

प॒र्य॒धत्था॒ऽइति॑परि॒ अ॒धत्थाः᳖ । अग्नें । गु॒ह्य॒मा॑नः᳖ । अ॒प॒चे॒तया॑ता॒ऽइत्य॑प चे॒तया॑तै । अ॒ग्नेः ॥१७॥

वसुंभ्य॒ऽइति॒वसुं भ्यः᳖ । [2]वृष्ट्या । वयः॑ । [2]वृष्टि॑म् ॥१६॥

त्वम् । प॒र्य॒धत्था॒ऽइति॑परि॒ अ॒धत्थाः᳖ । गु॒ह्य॒मा॑नः᳖ । अ॒प॒चे॒तया॑ता॒ऽइत्य॑प चे॒तया॑तै । प्रि॒यम् ॥१७॥

---

१. मुम्बईमुद्रिते 'ग॒च्छ॒' इति सचकारः पाठः ।

२. ककोशे ऋकारपरो वकारो न गुरुर्भवति ।

सँस्रवभागाऽइतिसँस्रव भागाः । स्थ । इषा । बृहन्तः । प्रस्तरेष्ठाः । प्रस्तरेस्थाऽइतिप्रस्तरे स्थाः । परिधेयाऽइतिपरि धेयाः । च । देवाः ॥ इमाम् । वाचम् अभि । विश्वे । गृणन्तः । आसद्येत्या सद्य । अस्मिन् । बर्हिषि । मादयध्वम् । स्वाहा । वाट् ॥१८॥

घृताचीऽइतिघृताची । स्थः । धुर्यौ । पातम् । सुम्नेऽइतिसुम्ने । स्थः । सुम्ने । मा । धत्तम् ॥ यज्ञ । नमः । च । ते । उप । च । यज्ञस्य । शिवे । सम् । तिष्ठस्व । स्विष्टऽइतिसु इष्टे । मे । सम् । तिष्ठस्व ॥१९॥

अग्ने । अदब्धायोऽइत्यदब्ध आयो । अशीतम । अशितमेत्यशि तम । पाहि । मा । दिद्योः । प्रसित्याऽइतिप्र सित्यै । दुरिष्ट्याऽइतिदुः इष्ट्यै । दुरद्मन्याऽइतिदुः [1]अद्मन्यै । अविषम् । नः । पितुम् । कृणु ॥

प्रस्तरेष्ठाः । प्रस्तरेस्थाऽइतिप्रस्तरे स्थाः । विश्वे । आसद्येत्या सद्य । अस्मिन् । मादयध्वम् ॥१८॥

सुम्नेऽइतिसुम्ने । सुम्ने । यज्ञ । यज्ञस्य । तिष्ठस्व । स्विष्टऽइतिसु इष्टे । तिष्ठस्व ॥१९॥

अग्ने । अदब्धायोऽइत्यदब्ध आयो । अशितमेत्यशि तम । दिद्योः । प्रसित्याऽइतिप्र सित्यै । दुरिष्ट्याऽइतिदुः इष्ट्यै । दुरद्मन्याऽइतिदुः अद्मन्यै ।

परिधेय्याऽइतिपरि धेय्याः । मादय्यध्वम् ॥१८॥

धुर्य्यौ । य्यज्ञ । य्यज्ञस्य ॥१९॥

अदब्धाय्योऽइत्यदब्ध आय्यो । य्योनौ । अग्ने । [2]संवेशपतय्यऽइति

---

१. 'दुरद्द्मन्याऽइतिदुः अद्द्मन्यै' इति काशिकः पाठः ।

२. अपपाठोऽयं लेखकप्रमादजः । 'सँवेशपतय्यऽइतिसँवेश पतय्ये' इत्येवं शुद्धः पाठो ज्ञेयः ।

सुषदा । सुसदेतिसु सदा । योनौ । स्वाहा । वाट् । अग्नये । सँवेशपतयऽइतिसँवेश पतये । स्वाहा । सरस्वत्यै । यशो-भगिन्याऽइतियशः भगिन्यै । स्वाहा ॥२०॥

वेदः । असि । येन । त्वम् । देव । वेद । देवेभ्यः । वेदः । अभवः । तेन । मह्यम् । वेदः । भूयाः ॥ [1]देवाः । गातुविदऽइतिगातु विदः । गातुम् । वित्त्वा । गातुम् । इत ॥ मनसः । पते । इमम् । देव । यज्ञम् । स्वाहा । वाते । धाः ॥२१॥

सम् । बर्हिः । अङ्क्ताम् । हविषा । घृतेन । आदित्यैः । वसुभिरितिवसु भिः । मरुद्भिरितिमरुत् भिः ॥ इन्द्रः । विश्वेदेवेभिरितिविश्वे देवेभिः । अङ्क्ताम् । दिव्यम् । नभः । गच्छतु । यत् । स्वाहा ॥२२॥

अग्नये । सरस्वत्यै । यशोभगिन्याऽइतियशः भगिन्यै ॥२०॥

देवेभ्यः । मह्यम् । [1]देवाः । वित्वा । यज्ञम् ॥२१॥

आदित्यैः । मरुद्भिरितिमरुत् भिः । विश्वेदेवेभिरितिविश्वे देवेभिः । दिव्यम् । गछतु[2] ॥२२॥

संवेश पतये । य्यशोभगिण्याऽइतिय्यशः भगिण्यै[3] ॥२०॥

य्येन । मह्यम्[3] । भूय्राः । [1]देवाः । गातुविदऽइतिगातु विदः । यज्ञम्[3] । यज्ञइतियज्ञम्[3] ॥२१॥

व्वसुभिरितिव्वसु भिः । व्विश्वदेवेभिरितिव्विश्व देवेभिः । य्यत ॥२२॥

---

१. अत्र दीर्घात् स्वरितात् परस्य विसर्गचिह्नस्य ÷, ः इत्येवं द्वैविध्यं दृश्यते ।

२. मुम्बईमुद्रिते 'गच्छतु' इति सचकारः पाठः ।

३. पत्रभागस्य नाशात् पुनर्लिखितोऽपपाठः ।

कः । त्वा । वि । मुञ्चति । सः । कस्म्मै । तस्म्मै ॥ पोषाय । रक्क्षसाम् । भागः । असि ॥२३॥

सम् । वर्चसा । पयसा । सम् । तनूभिः । अगन्महि । मनसा । सम् । शिवेन ॥ त्वष्टा । सुदत्रऽइतिसु दत्त्रः । वि । दधातु । रायः । अनु । मार्ष्टु । तन्वः । यत् । विलिष्टमितिवि लिष्टम् ॥२४॥

दिवि । विष्णुः । वि । अक्क्रंस्त । जागतेन । छन्दसा । ततः । निर्भक्क्तऽइतिनिः भक्क्तः । अन्तरिक्क्षे । त्रैष्टुभेन । त्रैस्त्तुभेनेतित्त्रैस्त्तुभेन । पृथिव्याम् । गायत्रेण । अस्म्मात् । अन्नात् । अस्यै । प्रतिष्ठायाः[1] ।

कस्मै । तस्मै । रक्षसाम् ॥२३॥

अगन्महि । त्वष्टा । सुदत्रऽइतिसु दत्रः । मार्ष्टु । तन्वः । विलिष्टमितिवि लिष्टम् ॥२४॥

विष्णुः । अक्रंस्त । निर्भक्तऽइतिनिः भक्तः । अन्तरिक्षे । त्रैष्टुभेन । त्रैस्तुभेनेतित्रैस्तुभेन । पृथिव्याम् । गायत्रेण । अस्मात् । प्रतिष्ठायाः ।

पोषाय ॥२३॥

पयसा । रायः । यत् । विलिष्टमितिवि लिष्टम्[2] ॥२४॥

गायत्रेण । [प्रतिष्ठायाः । प्रतिस्थायाऽइतिप्र][3]ति स्थायाः ।

---

१. अत्र २३ पृष्ठस्था प्रथमा टिप्पणी द्रष्टव्या ।

२. पत्रभागस्य नाशात् पुनर्लिखितोऽपपाठः । विलिष्टमितिवि लिष्टम्' इति साधीमान् पाठः ।

३. कोष्ठान्तर्गतः पाठः पत्रभागस्य नाशान्नष्टः ।

प्रतिस्त्थायाऽइतिप्रति स्थायाꣳ[1] । अगन्म । स्वरितिस्वः । सम् । ज्योतिषा । अभूम ॥२५॥

स्वयम्भूरितिस्वयम् भूः । असि । श्रेष्ठः । रश्मिः । वर्च्चोदाऽइतिवर्च्चःꣳ दाः । असि । वर्च्चः । मे । देहि ॥ सूर्य्यस्य । आवृतमित्या वृतम् । अनु । आ । वर्त्ते ॥२६॥

अग्ने । गृहपतऽइतिगृह पते । सुगृहपतिरितिसु [2]गृहपतिः । त्वया । अग्ने । अहम् । गृहपतिनेतिगृह पतिना । भूयासम् । सुगृहपतिरितिसु [2]गृहपतिः । त्वम् । मया । अग्ने । गृहपतिनेतिगृह पतिना । भूयाꣳ ॥ अस्त्थूरि । नौ ।

प्रतिस्थायाऽइतिप्रति स्थायाꣳ । अगन्म ॥२५॥

श्रेष्ठः । रश्मिः । आवृतमित्या वृतम् ॥२६॥

अग्ने । अग्ने । अग्ने । अस्थूरि । गार्हपत्यानीतिगार्ह पत्यानि ।

---

[3]ज्योतिषा ॥२५॥

[स्वयम्भूरितिस्वयम् भूः ।][4]वर्च्चोदाऽइतिवर्च्चःꣳ दाः । [सूर्य्यस्य । आवृतमित्या वृतम्][4] ॥२६॥

ःꣳ या । भूयासम् । मया । भूयाꣳ[5] ······

---

१. 'प्रतिष्ठायै । प्रतिष्ठायाऽइति प्रतिऽस्थायै' इति स्वामिदयानन्दस्वीकृतः पाठः । उव्वटोऽप्यस्य मन्त्रस्य व्याख्याने 'अस्यै प्रतिष्ठायै । अस्या भूमेः [प्र]तिष्ठाया निर्भक्तः' इत्येवं व्याख्यन् चतुर्थ्यन्तमेव पद स्वीचकार । मन्त्रपाठे '[अ]स्यै' चतुर्थ्यन्तपाठात् 'प्रतिष्ठाया अगन्म' इत्यत्र चतुर्थ्यन्तः 'प्रतिष्ठायै' पदच्छेद एव साधीयान् प्रतिभाति । पदकाराभिप्रायस्त्वत्र मृग्यः ।

२. 'गृहपतिः' इति काशिकः पाठः ।

३. यकारस्य जकारोच्चारणजोऽपपाठः । 'ज्योतिषा' इति पाठेन भाव्यम् ।

४. पत्रभागस्य नाशान्नोपलभ्यतेऽयं पाठः ।

५. इहोत्तरपृष्ठस्था प्रथमा टिप्पणी द्रष्टव्या ।

गार्हपत्त्यानीतिगार्ह पत्त्यानि । सन्तु । शतम् । हिमाः । [1]अचारिषम् । तत् । अशकम् । तत् । मे । अराधि । इदम् । अहम् । यः । एव । अस्मि । सः । अस्मि ॥२७॥

अग्नये । कव्यवाहनायेतिकव्य वाहनाय । स्वाहा । सोमाय । पितृमतऽइतिपितृ मते । स्वाहा ॥ अपहताऽइत्यप हताः । असुराः । रक्षांसि । वेदिषदः । वेदिसदऽइति-वेदि सदः ॥२८॥

ये । रूपाणि । प्रतिमुञ्चमानाऽइतिप्रति मुञ्चमानाः । असुराः । सन्तः । स्वधया । चरन्ति ॥ परापुरऽइतिपरा

अस्मि । अस्मि ॥२७॥

अग्नये । कव्यवाहनायेतिकव्य वाहनाय । अपहताऽइत्यप हताः । रक्षांसि ॥२८॥

प्रतिमुञ्चमानाऽइतिप्रति मुञ्चमानाः । अग्निः । अस्मात् ॥२९॥

...[2]अचारिषम् । [3]अहम् य एवा अस्मि । [3]सः । अस्मि ॥२७॥

अग्नयै । कव्यवाहनाय्रेतिकव्य वाहनाय्र । सोमाय[3] । वेदिसद-ऽइतिवेदि सदः ॥२८॥

स्ये । स्वधय्रा । स्ये ॥२९॥

---

१. 'अचारिषम् । अस्मि ।' पर्यन्तो भागः संहितापाठानुसारम् अष्टा-विंशतितमायाः कण्डिकायाः । अयं भागः ककोशवर्जमन्येषु लिखितेषु मुद्रितेषु च पुस्तकेषु सप्तविंशतितमायां कण्डिकायां प्रदर्श्यते । तेन पदपाठे संहिता-पाठापेक्षया एकस्याः कण्डिकासंख्याया न्यूनता समजनि । क-कोशे तु प्राये-णैतादृशेषु स्थलेषु संहितापाठानुसारमेव विभाग उपलभ्यते । अत एव ककोशे बहुत्र कण्डिकासंख्याया भेद उपलभ्यते । इह त्वस्माभिः ककोशपाठेऽपि सारल्याय सामान्यपदपाठनिर्दिष्टैव कण्डिकासंख्या निर्दिश्यते ।

२. अत्रस्था प्रथमा टिप्पणी द्रष्टव्या ।

३. पत्रभागस्य नाशात् पुनर्लिखितोऽस्वरोऽपपाठः स्पष्टः ।

पुरः । निपुर इतिनि पुरः । ये । भरन्ति । अग्निः । तान् । लोकात् । प्र । नुदाति । अस्मात् ॥२९॥

अत्र । पितरः । मादयद्ध्वम् । यथाभागमितियथा भागम् । आ । व्वृषायद्ध्वम् । व्वृषयद्ध्वमितिवृष यद्ध्वम् ॥ अमीमदन्त । पितरः । यथभागमितियथा भागम् । आ । अवृषायिषत ॥३०॥

नमः । वः । पितरः । रसाय । शोषाय । जीवाय । स्वधायै । घोराय । मन्यवे । नमः । वः । पितरः । पितरः । नमः । वः । गृहान् । नः । पितरः । दत्त । सतः । वः । पितरः । देष्म्म । एतत् । वः । पितरः । वासः ॥३१॥

अत्र । मादयध्वम् । व्वृषायध्वम् । व्वृषयध्वमितिवृष यध्वम् ॥३०॥

मन्यवे । देष्म ॥३१॥

मादयध्वम् । य्यथाभागमितिय्यथा भागम् । वृषायध्वम् । वृषयध्वमितिवृषय्यध्वम् । य्यथाभागमितिय्यथा भागम् । वृषायिषत[1] ॥३०॥

व्वः[2] । रसाय । [3]व्वः । शोषाय । [3]व्वः । जीवाय । [3]व्वः । स्वधायै । [3]व्वः । घोराय । [2]व्वः । [2]व्वः । [2]व्वः । [2]व्वः ॥३१॥

---

१. एतत् कोशादन्यत्र 'अवृषायिषत' इति पाठः । उभयथापि पदच्छेदस्य सम्भवः, स्वरदोषाभावात् ।

२. कपाठे (वः) पदे वकारः संहितावदेव गुरुर्न भवति । तस्मादिह गुरुत्वेन 'व्वः' वकारद्वयवान् पाठश्चिन्त्यः ।

३. कपाठे पुनरुक्तान्यपि पदानि संहितावत् पुनः पठयन्ते । तदनुसारमिह पुनः पाठेऽपि 'व्वः' इति द्विवकारवान् पाठोऽशुद्धः ।

आ । धत्त । पितरः । गर्भम् । कुमारम् । पुष्क्करस्रजमितिपुष्क्कर स्रजम् । यथा । इह । पुरुषः । असत् ॥३२॥

ऊर्जम् । वहन्तीः । अमृतम् । घृतम् । पयः । कीलालम् । परिस्रुतमितिपरि स्रुतम् । स्वधाः । स्थ । तर्प्पयत । मे । पितॄन् ॥३३॥

॥ इति वाजसनेयिसंहितापदे द्वितीयोऽध्यायः ॥

गर्भम् । पुष्करस्रजमितिपुष्कर स्रजम् ॥३२॥

यथा ॥३२॥

पयः । तर्प्पयत ॥३३॥

॥ इति वाजसनेयिसंहितापदे द्वितीयोऽध्यायः ॥

तृतीयोऽध्यायः

समिधेतिसम् इधा । अग्निम् । दुवस्यत । घृतैः । बोधयत । अतिथिम् ॥ आ । अस्मिन् । हव्या । जुहोतन ॥१॥

सुसमिद्धायेतिसु समिद्धाय । शोचिषे । घृतम् । तीव्रम् । जुहोतन ॥ अग्नये । जातवेदसऽइतिजात वेदसे ॥२॥

तम् । त्वा । समिद्भिरितिसमित् भिः । अङ्गिरः । घृतेन । वर्द्धयामसि ॥ बृहत् । शोच । यविष्ठ्य ॥३॥

उप । त्वा । अग्ने । हविष्मतीः । घृताचीः । यन्तु । हर्यत ॥ जुषस्व । समिधऽइतिसम् इधः । मम ॥४॥

अग्निम् । अस्मिन् । हव्या ॥१॥

तीव्रम् । अग्नये ॥२॥

समिद्भिरितिसमित् भिः । अङ्गिरः । यविष्ठ्य ॥३॥

अग्ने । हविष्मतीः ॥४॥

बोधयत ॥१॥

सुसमिद्धायेतिसु समिद्धाय । अग्नये ॥२॥

वर्द्धयामसि । यविष्ठ्य ॥३॥

[1]यन्तु । हर्यत ॥४॥

---

१. 'यन्तु' इत्येव शुद्धः पाठो ज्ञेयः ।

भूः । भुवः । स्वः । द्यौरिवेतिद्यौः इव । भूम्ना । पृथिवीवेतिपृथिवी इव । वरिम्णा ॥ तस्याः । ते । पृथिवि । देवयजनीतिदेव यजनि । पृष्ठे । अग्निम् । अन्नाद-मित्त्यन्न अदम् । अन्नाद्यायेत्त्यन्न अद्याय । आ । ददे ॥५॥

आ । अयम् । गौः । पृश्निः । अक्रमीत् । असदत । मातरम् । पुरः ॥ पितरम् । च । प्रयन्नितिप्र यन् । स्वरितिस्वः ॥६॥

अन्तरित्त्यन्तः । चरति । रोचना । अस्य । प्राणात् । अपानतीत्त्यप [1]अनती ॥ वि । अख्यत् । महिषः । दिवम् ॥७॥

त्रिंशत् । धाम । वि । राजति । वाक् । पतङ्गाय । धीयते ॥ प्रति । वस्तोः । अह । द्युभिरितिद्यु भिः ॥८॥

द्यौरिवेतिद्यौः इव । भूम्ना । वरिम्णा । पृष्ठे । अग्निम् । अन्नादमित्यन्न अदम् । अन्नाद्यायेत्यन्न अद्याय ॥५॥

पृश्निः । अक्रमीत् । प्रयन्नितिप्र यन् ॥६॥

अन्तरित्यन्तः । अपानतीत्यप अनती । अख्यत् ॥७॥

द्युभिरितिद्यु भिः ॥८॥

देवयजनीतिदेव [2]यजनि । अन्नाद्यायेत्यन्न अद्याय ॥५॥

अयम् । प्रयन्नितिप्र यन् ॥६॥

[3]अन्तः । [3]रोचनादितिरो चना ॥७॥

पतङ्गाय । धीयते ॥८॥

---

१. 'अनति' इति पाठान्तरम् ।

२. कपाठशैल्यनुसारं 'यजनि' इति शुद्धः पाठो ज्ञेयः ।

३. मूलपत्रांशस्य नाशात् पुनर्लिखितोऽस्वरोऽपपाठः ।

अ॒ग्निः । ज्योतिः॑ । ज्योतिः॑ । अ॒ग्निः । स्वाहा॑ । सूर्य्यः॑ । ज्योतिः॑ । ज्योतिः॑ । सूर्य्यः॑ । स्वाहा॑ ॥ अ॒ग्निः । वर्च्चः॑ । ज्योतिः॑ । वर्च्चः॑ । स्वाहा॑ । सूर्य्यः॑ । वर्च्चः॑ । ज्योतिः॑ । वर्च्चः॑ । स्वाहा॑ ॥ ज्योतिः॑ । सूर्य्यः॑ । सूर्य्यः॑ । ज्योतिः॑ । स्वाहा॑ ॥९॥

स॒जूरिति॑स॒ जूः । दे॒वेन॑ । स॒वि॒त्रा । स॒जूरिति॑स॒ जूः । रात्र्या॑ । इन्द्र॑व॒त्येतीन्द्र॑ ऽवत्या । जु॒षा॒णः । अ॒ग्निः । वे॒तु॒ । स्वाहा॑ ॥ उ॒षसा॑ । सूर्य्यः॑ ॥१०॥

उ॒प॒प्र॒यन्त॒ऽइत्यु॑प प्र॒यन्तः॑ । अ॒ध्व॒रम् । मन्त्र॑म् । वो॒चे॒म॒ । अ॒ग्नये॑ ॥ आ॒रे । अ॒स्मेऽइत्य॒स्मे । च॒ । शृ॒ण्व॒ते ॥११॥

अ॒ग्निः । अ॒ग्निः । अ॒ग्निः ॥९॥

स॒वि॒त्रा । रात्र्या॑ । इन्द्र॑व॒त्येतीन्द्र॑ ऽवत्या । अ॒ग्निः ॥१०॥

उ॒प॒प्र॒यन्त॒ऽइत्यु॑प प्र॒यन्तः॑ । अ॒ध्व॒रम् । अ॒ग्नये॑ । अ॒स्मेऽइत्य॒स्मे ॥११॥

---

[1]ज्योतिः॑ । [1]ज्योतिः॑ । सूर्य्यः॑ । [1]ज्योतिः॑ । [1]ज्योतिः॑ । सूर्य्यः॑ । [1]ज्योतिः॑ । सूर्य्यः॑ । [1]ज्योतिः॑ । [1]ज्योतिः॑ । सूर्य्यः॑ । सूर्य्यः॑ । [1]ज्योतिः॑ ॥९॥

सूर्य्यः॑ ॥१०॥

उ॒प॒प्र॒यन्त॒ऽइत्यु॑प प्र॒यन्तः॑ । अ॒ग्नये॑ ॥११॥

---

१. यकारस्य जकारोच्चारणजोऽपपाठः ।

अग्निः । मूर्द्धा । दिवः । ककुत् । पतिः । पृथिव्याः । अयम् ॥ अपाम् । रेताᳫँसि । जिन्वति ॥१२॥

उभा । वाम् । इन्द्राग्नीऽइतीन्द्राग्नी । आहुवद्ध्याऽइत्याहुवद्ध्यै । उभा । राधसः । सह । मादयद्ध्यै ॥ उभा । दातारौ । इषाम् । रयीणाम् । उभा । वाजस्य । सातये । हुवे । वाम् ॥१३॥

अयम् । ते । योनिः । ऋत्वियः । यतः । जातः । अरोचथाः ॥ तम् । जानन् । अग्ने । आ । रोह । अथ । नः । वर्द्धय । रयिम् ॥१४॥

अयम् । इह । प्रथमः । धायि । धातृभिरितिधातृभिः । होता । यजिष्ट्ठः । अद्धरेषु । ईड्यः ॥ यम् ।

अग्निः । पृथिव्याः । जिन्वति ॥१२॥

इन्द्राग्नीऽइतीन्द्राग्नी । आहुवध्याऽइत्या हुवध्यै । मादयध्यै ॥१३॥

ऋत्वियः । अग्ने ॥१४॥

यजिष्ठः । अध्वरेषु । ईड्यः । अप्नवानः । चित्रम् ॥१५॥

अय्यम् ॥१२॥

मादय्यध्यै । रय्यीणाम् । सातय्यै ॥१३॥

अय्यम् । य्योनिः । ऋत्विय्यः । य्यतः । व्वद्‌र्धय्य । राय्यिम् ॥१४॥

अय्यम् । धाय्यि । य्यजिष्ठः । य्यम् । भृगव्वः[1] । व्विरुरुचुरितिवि[2]

---

१. मूलपत्रनाशात् पुनर्लिखितोऽस्वरोऽपपाठः ।

२. 'व्वि' इत्येवं पाठेन भाष्यम् ।

अप्स्ववानः । भृगवः । विरुरुचुरितिवि रुरुचुः[1] । वनेषु । चित्रम् । विभ्वमितिवि भ्वम् । विशेविशऽइतिविशे विशे ॥१५॥

अस्य । प्रत्नाम् । अनु । द्युतम् । शुक्रम् । दुदुह्रे । अह्रयः ॥ पयः । सहस्रसामितिसहस्र साम् । ऋषिम् ॥१६॥

तनूपाऽइतितनू पाः । अग्ने । असि । तन्वम् । मे । पाहि । आयुर्दाऽइत्यायुः दाः । अग्ने । असि । आयुः । मे । देहि । वर्चोदाऽइतिवर्चः दाः । अग्ने । असि । वर्चः । मे । देहि ॥ अग्ने । यत् । मे । तन्वाः । ऊनम् । तत् । मे । आ । पृण ॥१७॥

इन्धानाः । त्वा । शतम् । हिमाः । द्युमन्तमितिद्यु मन्तम् । सम् । इधीमहि ॥ वयस्वन्तः । वयस्कृतम् । वयः-

---

प्रत्नाम् । शुक्रम् ॥१६॥

अग्ने । तन्वम् । अग्ने । अग्ने । अग्ने । तन्वाः ॥१७॥

द्युमन्तमितिद्यु मन्तम् । अग्ने । सपत्नदम्भनमितिसपत्न दम्भनम् ।

रुरुचुः । विभ्वमितिवि भ्वम् । [2]विशोविशऽइतिविशे [3]विशे ॥१५॥

अह्रयः । पयः ॥१६॥

आयुर्दाऽइत्यायु दाः । वर्चोदाऽइतिवर्चः दाः । यत् । तत्[4] । वा…॥१७॥

[4]वयस्वतः । वयस्कृतम् । वयःकृतमितिवयः कृतम् ।

---

१. 'रुरुचुः' इति काशिकः पाठः ।

२. 'विशोविशः' इत्येवं पाठेन भाव्यम् ।

३. 'विशे' इति पाठेन भाव्यम् ।

४. मूलपत्रस्य नाशात् पुनर्लिखितोऽस्वरोऽपपाठः ।

कृतमितिवयद्ं कृतम् । सहस्वन्तद्ं । सहस्कृतम् । सहद्ं-कृतमितिसहद्ं कृतम् ॥ अग्ने । [1]सपत्त्नदम्भनमितिसपत्त्न दम्भनम् । अदब्धासद्ं । अदाब्भ्यम् ॥ चित्त्रावसो । चित्त्रवसोऽइतिचित्त्र वसो । स्वस्ति । ते । पारम् । अशीय ॥१८॥

सम् । त्वम् । अग्ने । सूर्य्यस्य । वर्च्चसा । अगथाद्ं । ऋषीणाम् । स्तुतेन ॥ प्प्रियेण । धाम्न्ना । अहम् । आयुषा । वर्च्चसा । प्रजयेतिप्प्र जया । रायः । पोषेण । ग्मिषीय ॥१९॥

अन्धः । स्थ । अन्धः । वुद्ं । भक्क्षीय । महः । स्थ । महः । वुद्ं । भक्क्षीय । ऊर्ज्जः । स्थ । ऊर्ज्जम् । वुद्ं । भक्क्षीय । रायः । पोषः । स्थ । रायः । पोषम् । वुद्ं । भक्क्षीय ॥२०॥

अदब्धासः । अदाब्भ्यम् ॥ चित्त्रावसो । चित्त्रवसोऽइतिचित्त्र वसो ॥१८॥

अग्ने । धाम्ना । प्रजयेतिप्र जया ॥१९॥

भक्षीय । भक्षीय । भक्षीय । भक्षीय ॥२०॥

चित्त्राव्वसो[2] । चित्त्रव्वसो[2]ऽइतिचित्त्र [2]व्वसो । अशीय्य ॥१८॥

सूर्य्यस्य । प्रिय्येण । आयुषा । प्रजय्येतिप्र जय्या । राय्य? । ग्मिषीय्य ॥१९॥

भक्षीय्य । भक्षीय्य । भक्षीय्य । [3]राय्यस्पोषः । राय्य? । भक्षीय्य ॥२०॥

---

१. 'सपत्क्नदम्भनम्' इति वेङ्कटेश्वरमुद्रणालयमुद्रितः मन्त्रपाठः । पञ्चमस्य समानवर्गीयेऽक्षरे परतः द्वित्वस्य प्रतिषेधादपपाठोऽयम् ।

२. द्वित्वकारपाठो लेखकप्रमादजः ।

३. मूलपत्रस्य नाशात् पुनर्लिखितोऽपपाठः ।

रेवतीः । रमध्वम् । अस्मिन् । योनौ । गोष्ठे । गोस्थऽइतिगो स्थे । लोके । क्षये ॥ इह । एव । स्त । मा । अप । गात ॥२१॥

सश्हितेतिसम् हिता । असि । विश्ववरूपीतिविश्व रूपी । ऊर्जा । मा । आ । विश । गौपत्येन ॥ उप । त्वा । अग्ने । दिवेदिवऽइतिदिवे दिवे । दोषावस्तरितिदोषा वस्तः । धिया । वयम् ॥ नमः । भरन्तः । आ । इमसि ॥२२॥

राजन्तम् । अध्वराणाम् । गोपाम् । ऋतस्य । दीदिविम् ॥ वर्द्धमानम् । स्वे । दमे ॥२३॥

सः । नः । पितेवेतिपिता इव । सूनवे । अग्ने ।

रमध्वम् । अस्मिन् । गोष्ठे । गोस्थऽइतिगो स्थे । विश्ववरूपीतिविश्व रूपी । गौपत्येन । अग्ने । दोषावस्तरितिदोषा वस्तः ॥२२॥

अध्वराणाम् ॥२३॥

क्षये ॥२१॥

विश्ववरूपीतिविश्व रूपी । [1]दोषावस्तरितिदोषा वस्तः । धिया । वयम् ॥२२॥

दीदिव्यम्[2] ॥२३॥

---

१. 'व्वस्त' इति द्विवकारः पाठः प्रमादजः ।

२. लेखकप्रमादजोऽपपाठः ।

सूपायनऽइतिसु [1]उपायनः । भव ॥ सचस्व । नः । स्वस्तये ॥२४॥

अग्ने । त्वम् । नः । अन्तमः । उत । त्राता । शिवः । भव । वरूत्थ्यः ॥ वसुः । अग्निः । वसुश्रवाऽइतिवसुश्रवाः । अच्छ । नक्षि । द्युमत्तममितिद्युमत्तमम् । रयिम् । दाः ॥२५॥

तम् । त्वा । शोचिष्ठ । दीदिवऽइतिदीदिवः । सुम्नाय । नूनम् । ईमहे । सखिभ्यऽइतिसखिभ्यः ॥ सः । नः । बोधि । श्रुधि । हवम् । उरुष्य । नः । अघायतः । अघयतऽइत्यघयतः । समस्मात् ॥२६॥

इडे । आ । इहि । अदिते । आ । इहि । काम्याः ।

अग्ने । स्वस्तये ॥२४॥

अग्ने । वरूथ्यः । अग्निः । वसुश्रवाऽइतिवसु श्रवाः । अछ[2] । नाक्षि । द्युमत्तममितिद्युमत् तमम् ॥२५॥

शोचिष्ठ । सुम्नाय । साखिभ्यऽइतिसाखि भ्यः ॥ उरुष्य । अघयतऽ-इत्यघ यतः । समस्मात् ॥२६॥

काम्याः ॥२७॥

सूपायनऽइतिसु उपायनः । स्वस्तये ॥२४॥

वसुश्रवाऽइतिवसु श्रवाः । रयिम् ॥२५॥

सुम्नाय । अघायतः । अघयतऽइत्यघ [3]यतः ॥२६॥

---

१. 'उपायनः' इति पाठान्तरम् ।

२. क्वचित् कोशेषु 'अछा' क्वचित् 'अछ' इत्युपलभ्यते ।

३ कपाठशैल्यनुसारमवग्रहे 'यतः' इति शुद्धः पाठो ज्ञेयः ।

आ । इत ॥ मयि । बुं । कामधरणमितिकाम धरणम् । भूयात् ॥२७॥

सोमानम् । स्वरणम् । कृणुहि । ब्रह्मणं । पते ॥ कक्क्षीवन्तम् । यः । औशिजः ॥२८॥

यः । रेवान् । यः । अमीवहेत्त्यमीव हा । व्वसुविदिति-वसु वित् । पुष्ट्टिवर्द्धनऽइतिपुष्ट्टि वर्द्धनं ॥ सः । नं । सिषक्क्तु । सिसक्क्तित्वर्तिसिसक्क्तु । यः । तुरः ॥२९॥

मा । नं । शंसं । अररुषं । धूर्त्तिः । प्रणक् । मर्त्त्यस्य ॥ रक्ष । नं । ब्रह्मणः । पते ॥३०॥

ब्रह्मणं । पते । कुक्षीवन्तम् ॥२८॥

अमीवहेत्यमीव हा । पुष्टिवर्द्धनऽइतिपुष्टि वर्द्धनः । सिषक्तु । सिसक्तित्वर्तिसिसक्तु ॥२९॥

धूर्तिः[1] । मर्त्यस्य[1] । रक्ष । ब्रह्मणं ॥३०॥

मय्नि । [3]व्वं । भूय्रात् ॥२७॥

य्यः ॥२८॥

य्यः । य्यः । [2]अमीवहइत्यमी वहा । व्वसुविदितिव्वसु वित् । [4]पुष्टिव्वर्द्धनइतिपुष्टि वर्द्धनं । य्यः ॥२९॥

मानः ॥ मा । धूर्त्तिः । मर्त्यस्य ॥३०॥

---

१. 'धूर्त्तिः' 'मर्त्त्यस्य' इत्येव साधीयान् पाठः, रेफोत्तरस्य सर्वत्र द्विः पाठात् ।

२. मूलपत्रांशस्य नाशात् पुनर्लिखितोऽस्वरोऽपपाठः ।

३. कपाठशैल्यनुसारात् 'वं' इत्येकवकार एव युक्तः ।

४. 'व्वर्द्धन' इति साधीयान् पाठः ।

महि । त्रीणाम् । अवः । अस्तु । द्युक्षम् । मित्रस्य । अर्य्यम्णः ॥ दुराधर्षमितिदुः आधर्षम् । वरुणस्य ॥३१॥

नहि । तेषाम् । अमा । चन । न । अद्धास्वित्त्यद्ध्व सु । वारणेषु ॥ ईशे । रिपुः । अघशंꣳसऽइत्त्यघ शꣳसः ॥३२॥

ते । हि । पुत्रासः । अदितेः । प्र । जीवसे । मर्त्त्याय ॥ ज्योतिः । यच्छन्ति । अजस्रम् ॥३३॥

कदा । चन । स्तरीः । असि । न । इन्द्र । सश्चसि । दाशुषे ॥ उपोपेत्त्युप उप । इत् । नु । मघवन्निति मघ वन् । भूयः । इत् । नु । ते । दानम् । देवस्य । पृच्यते ॥३४॥

तत् । सवितुः । वरेण्ण्यम् । भर्ग्गः । देवस्य । धीमहि ॥ धियः । यः । नः । प्रचोदयादितिप्र चोदयात् ॥३५॥

अस्तु । द्युक्षम् । मित्रस्य ॥३१॥

अध्वस्वित्त्यध्व सु । अघशंꣳसऽइत्यघ शꣳसः ॥३२॥

पुत्रासः । [1]मर्त्याय । यच्छन्ति ॥३३॥

सश्चसि । उपोपेत्युप उप । पृच्यते ॥३४॥

वरेण्यम् । भर्गः । प्रचोदयादितिप्र चोदयात् ॥३५॥

महित्रीणाम् ॥ महि । अर्य्यम्णः ॥३१॥

नहितेषाम् ॥ नहि ॥३२॥

मर्त्त्यीय । य्यच्छन्ति ॥३३॥

मघवन्नितिमघ वन् । [2]भूयः ॥३४॥

भर्गः । धिय्यः । य्यः । प्रचोदय्यादितिप्र चोदय्यात् ॥३५॥

---

१. 'मर्त्त्याय' द्र० पृ० ३५ टि० १ ।

२. 'भूय्यः' इति शुद्धः पाठो ज्ञेयः ।

परि । ते । दूडभः । दुर्दभऽइतिदुः दभः । रथः । अस्म्मान् । अश्नोतु । विश्श्वतः ॥ येन । रक्क्षांसि । दाशुषः ॥३६॥

स्वरितिस्वः । सुप्प्रजाऽइतिसु प्रजाः । प्रजाभिरितिप्प्र जाभिः । स्याम् । सुवीरऽइतिसु वीरः । वीरैः । सुपोषऽइतिसु पोषः । पोषैः ॥ नर्य्य । प्रजामितिप्प्र जाम् । मे । पाहि । शꣳस्य । पशून् । अथर्य्य । पितुम् ॥३७॥

आ । अगन्म्म । व्विश्श्ववेदसमितिविश्श्व वेदसम् । अस्म्मभ्यम् । व्वसुवित्तममितिवसुवित् तमम् ॥ अग्ने । सम्म्राडितिसम् राट् । अभि । द्युम्म्नम् । अभि । सहः । आ । यच्छस्व ॥३८॥

अयम् । अग्निः । गृहपतिरितिगृह पतिः । गार्हपत्त्यऽइतिगार्ह पत्त्यः । प्रजायाऽइतिप्प्र जायाः । व्वसुवित्तम-

---

अस्मान् । अश्नोतु । विश्वतः । रक्षांसि ॥३६॥

सुप्रजाऽइतिसु प्रजाः । प्रजाभिरितिप्र जाभिः । प्रजामितिप्र जाम् ॥३७॥

अगन्म । विश्ववेदसमितिविश्व वेदसम् । अस्मभ्यम् । अग्ने । सम्राडितिसम् राट् । द्युम्नम् । यच्छस्व ॥३८॥

श्येन ॥३६॥

नर्य्य । पशून् । अथर्य्य ॥३७॥

व्विश्ववेदसमितिव्विश्व वेदसम् । व्वसुवित्तममितिव्वसुवित् तमम् । [1]सम्म्राडितिसम् राट् । य्यच्छस्व ॥३८॥

---

१. एतादृशस्थलेष्वेकमकारवान् पाठो युक्तः ।

ऽइतिवसुवित् तमः ॥ अग्ने । गृहपतऽइतिगृह पते । पुरी-ष्य॒ । रयिमानितिरयि मान् । पुष्टिवर्द्धनऽइतिपुष्टि वर्द्धनः ॥ अग्ने । पुरीष्य ॥३९॥

गृहाः । मा । बिभीत । मा । वेपद्ध्वम् । ऊर्जम् । बिभ्रतः । आ । इमसि ॥ ऊर्जम् । बिभ्रत् । वः । सुमनाऽइतिसु मनाः । सुमेधाऽइतिसु मेधाः । गृहान् । आ । एमि । मनसा । मोदमानः ॥४०॥

येषाम् । अद्ध्येतीत्यधि एति । प्रवसन्नितिप्र वसन् । येषु । सौमनसः । बहुः ॥ गृहान् । उप । ह्वयामहे । ते । नः । जानन्तु । जानतः ॥४१॥

उपहूताऽइत्युप हूताः । इह । गावः । उपहूताऽइत्युप

अग्निः । गार्हपत्यऽइतिगार्ह पत्यः । प्रजायाऽइतिप्र जायाः । अग्ने । पुरीष्य॒ । पुष्टिवर्द्धनऽइतिपुष्टि वर्धनः । अग्ने । पुरीष्य ॥३९॥

वेपध्वम् । बिभ्रतः । बिभ्रत् ॥४०॥

अध्येतीत्यधि एति । प्रवसन्नितिप्र वसन् ॥४१॥

उपहूताऽइत्युप हूताः । उपहूताऽइत्युप हूताः । अथोऽइत्यथो ।

अग्नमग्निः । अग्नम् । प्रजाग्नाऽइतिप्र जाग्नाः । वसुवित्तमऽइतिवसु-वित् तमः ॥३९॥

वः[1] ॥४०॥

य्येषाम् । प्रवसन्नितिप्र वसन् । य्येषु । हुय्यामहे ॥४१॥

अजावय॒ । क्षेमाग्न । [2]शंय्योरितिशम् योः । [2]शंय्योरितिशम्

---

१. कपाठशैल्यनुसारमिह 'वः' इति शुद्धः पाठो ज्ञेयः ।
२. अपपाठोऽयम्, 'शंयो०' इति शुद्धः पाठो ज्ञेयः ।

हूताः । अजावयः ॥ अथोऽइत्यथो । अन्नस्य । कीलालः । उपहूतऽइत्युप हूताः । गृहेषु । नः ॥ क्षेमाय । वः । शान्त्यै । प्र । पद्ये । शिवम् । शग्मम् । शंय्योरितिशम् योः । शंय्योरितिशम् योः ॥४२॥

प्रघासिनऽइतिप्र घासिनः । हवामहे । मरुतः । च । रिशादसः ॥ करम्भेण । सजोषसऽइतिस जोषसः ॥४३॥

यत् । ग्रामे । अरण्ये । सभायाम् । इन्द्रिये ॥ एनः । चकृम । वयम् । इदम् । तत् । अव । यजामहे । स्वाहा ॥४४॥

मोऽइतिमो । सु । नः । इन्द्र । अत्र । पृत्स्वितिपृत् सु । देवैः । अस्ति । हि । स्म । ते । शुष्मिन् । अवयाऽइत्यव याः ॥ महः । चित् । यस्य । मीढुषः । यव्या । हविष्मतः । मरुतः । वन्दते । गीः ॥४५॥

अक्रन् । कर्म्म । कर्म्मकृतऽइतिकर्म्म कृतः । सह । वाचा । मयोभुवेतिमयः भुवा ॥ देवेभ्यः । कर्म्म ।

उपहूतऽइत्युप हूतः । पद्ये । शग्मम् ॥४२॥

प्रघासिनऽइतिप्र घासिनः ॥४३॥

अरण्ये ॥४४॥

अत्र । अस्ति । स्म । शुष्मिन् । अवयाऽइत्यव याः । यव्या । हविष्मतः ॥४५॥

अक्रन् । देवेभ्यः । कृत्वा । अस्तम् ॥४६॥

योः ॥४२॥

य्यत् । सभाय्याम् । इन्द्रिय्ये । वय्यम् । य्यजामहे ॥४४॥

अवय्याऽइत्यव [1]य्याः । य्यस्य । य्यव्या । मय्योभुवेतिमय्यः

---

१. कपाठशैल्यनुसारमवग्रहादौ द्वित्वाभावात् 'य्या' इत्येव शुद्धः पाठः स्यात् ।

कृत्त्वा[1] । अस्त्तम् । प्र । इत । सचाभुवऽइतिसचा भुवः ॥४६॥

अवभृथेत्यव भृथ । निचुम्पुणेतिनि चुम्पुण । निचेरुरितिनि चेरुः । असि । निचुम्पुणऽइतिनि चुम्पुणः ॥ अव । देवैः । देवकृतमितिदेव कृतम् । एनः । अयासिषम् । अव । मर्त्यैः । मर्त्यकृतमितिमर्त्य कृतम् । पुरुराव्णऽइति-पुरु राव्णः । देव । रिषः । पाहि ॥४७॥

पूर्णा । दर्वि । परा । पत । सुपूर्णेतिसु पूर्णा । पुनः । आ । पत ॥ वस्नेवेतिवस्ना इव । वि । क्रीणावहै । इषम् । ऊर्जम् । शतक्रतोऽइतिशत क्रतो ॥४८॥

देहि । मे । ददामि । ते । नि । मे । धेहि । नि । ते । दधे ॥ निहारमितिनि हारम् । च । हरासि । मे । निहारमितिनि हारम् । नि । हराणि । ते । स्वाहा ॥४९॥

अवभृथेत्यव भृथ । पुरुराव्णऽइतिपुरु राव्णः ॥४७॥

पूर्णा । सुपूर्णेतिसु पूर्णा । वस्नेवेतिवस्ना इव । शतक्रतोऽइतिशत क्रतो ॥४८॥

भुवः ॥४६॥

अयासिषम् ॥४७॥

पूर्णा । सुपूर्णेतिसु पूर्णा ॥४९॥

---

१. इह सर्वपुस्तकेषु (लिखितेषु मुद्रितेषु च) 'कृत्वा' इत्येकतकारवानेव पाठ उपलभ्यते, तथाऽपान्यत्र 'कृत्त्वा, कृत्त्वाय, भूत्त्वा' आदिषु पदेषु द्वितकारवतः पाठादिहापि तथैव युक्तः पाठो ज्ञेयः ।

अक्क्षन्न् । अमीमदन्त । हि । अव । प्रियाः । अधूषत ॥ अस्तोषत । स्वभानवऽइतिस्व भानवः । विप्राः । नविष्ठया । मती । योज । नु । इन्द्र । ते । हरीऽइतिहरी ॥५०॥

सुसन्दृशमितिसु सन्दृशम् । त्वा । वयम् । मघवन्नितिमघ वन् । वन्दिषीमहि ॥ प्र । नूनम् । पूर्णबन्धुरऽइतिपूर्ण बन्धुरः । स्तुतः । यासि । वशान् । अनु ॥५१॥

मनः । नु । आ । ह्वामहे । नाराशंसेन । स्तोमेन ॥ पितृणाम् । च । मन्मभिरितिमन्म भिः ॥५२॥

आ । नः । एतु । मनः । पुनरितिपुनः । क्रत्वे । दक्क्षाय । जीवसे ॥ ज्योक् । च । सूर्यम् । दृशे ॥५३॥

पुनः । नः । पितरः । मनः । ददातु । दैव्यः । जनः ॥ जीवम् । व्रातम् । सचेमहि ॥५४॥

अक्षन् । अस्तोषत । विप्राः । नविष्ठया ॥५०॥
पूर्णबन्धुरऽइतिपूर्ण बन्धुरः ॥५१॥
ह्वामहे । मन्माभिरितिमन्म भिः ॥५२॥
क्रत्वे । दक्षाय ॥५३॥
दैव्यः ॥५४॥

प्रिया? । नविष्ठया । योज ॥५०॥
व्ययम् । मघवन्नितिमघ वन् ॥ पूर्णबन्धुरऽइतिपूर्ण बन्धुरः ।
यासि । [1]वशान् ॥५१॥
[2]पितुणाम् ॥५२॥
दक्षाय । सूर्यम् ॥५३॥

---

१. अपपाठः, 'वशान्' इति साधुः ।
२. अपपाठः, 'पितृणाम्' इति साधुः ।

व्वयम् । सोम । व्व्रते । तव । मनः । तनूषु । बिभ्रतः ॥ प्रजावन्तऽइतिप्रजा व्वन्तः । सचेमहि ॥५५॥

एषः । ते । रुद्र । भागः । सह । स्वस्रा । अम्बिकया । तम् । जुषस्व । स्वाहा । आखुः । ते । पशुः ॥५६॥

अव । रुद्रम् । अदीमहि । अव । देवम् । त्र्यम्बक-मितित्रि अम्बकम् ॥ यथा । नः । व्वस्यसः । करत् । श्रेयसः । व्यवसाययादितिवि [1]अवसाययात् ॥५७॥

भेषजम् । असि । भेषजम् । गवे । अश्वाय । पुरुषाय । भेषजम् ॥ सुखमितिसु खम् । मेषाय । मेष्यै ॥५८॥

बिभ्रतः । प्रजावन्तऽइतिप्रजा व्वन्तः ॥५५॥

रुद्र ॥५६॥

रुद्रम् । त्र्यम्बकमितित्रि अम्बकम्[2] ॥५७॥

अश्वाय । मेष्यै ॥५८॥

व्वयम् । प्रजावन्तऽइतिप्रजा वन्तः ॥५५॥

अम्बिकया ॥५६॥

यथा । श्रेयसः । व्यवसाययादितिवि[3] अवसाययात् ॥५७॥

अश्वाय । पुरुषाय । मेषाय ॥५८॥

---

१. 'अवसायात्' इति काशिकः पाठः ।

२. 'त्र्यम्बकमितित्रि अम्बकम्' इति बम्बईमुद्रिते द्वयोर्हस्तलेखयोश्च पाठ उपलभ्यते, सोऽपपाठः । तथा सति 'मिति' स्वरितेन भाव्यम् । अपि च तत्रैव ग्रन्थेऽुत्तरमन्त्रे (५८ संख्याके) यथामुद्रितः साधुपाठ एवोपलभ्यते ।

३. कपाठशैल्यनुसारमिह '०व्वि' इति शुद्धः पाठो ज्ञेयः ।

त्र्यम्बकमितित्रि अम्बकम् । यजामहे । सुगन्धिमितिसु गन्धिम् । पुष्टिवर्द्धनमितिपुष्टि वर्द्धनम् ॥ उर्व्वारुकमिवेत्युर्व्वारुकम् इव । बन्धनात् । मृत्योः । मुक्षीय । मा । अमृतात् ॥ पतिवेदनमितिपति वेदनम् । इतः । मुक्षीय । मा । अमुतः ॥५९॥

एतत् । ते । रुद्र । अवसम् । तेन । परः । मूजवतःइतिमूज वतः । अति । इहि ॥ अवततधन्वेत्यवतत धन्वा । पिनाकावसऽइतिपिनाक अवसः । कृत्तिवासाऽइतिकृत्ति वासाः । अहिंसन् । नः । शिवः । अति । इहि ॥६०॥

त्र्यायुषमितित्रि [1]आयुषम् । जमदग्नेरितिजमत् अग्नेः । कश्यपस्य । त्र्यायुषमितित्रि [1]आयुषम् ॥ यत् । देवेषु ।

त्र्यम्बकमितित्रि अम्बकम् । पुष्टिवर्द्धनमितिपुष्टि वर्द्धनम् । उर्व्वारुकमिवेत्युर्व्वारुकम् इव । मृत्योः । मुक्षीय । मुक्षीय ॥५९॥

रुद्र । अवततधन्वेत्यवतत धन्वा ॥६०॥

त्र्यायुषमितित्रि आयुषम् । जमदग्नेरितिजमत् अग्नेः । कश्यपस्य ।

त्र्यम्बकमिति [2]त्री अम्बकम् । य्यजामहे । पुष्टिर्व्वर्द्धनमितिपुष्टि [4]व्वर्द्धनम् । उर्व्वारुकमिवेत्युर्व्वा [2]रुकम् इव । मुर्क्षाय । पतिर्वेदनमितिपति वेदनम् । [5]मुक्षीय । [5]मा । [5]मुतः ॥५९॥

मूजवतऽइतिमूज वतः । कृत्तिवासाऽइतिकृत्ति वासाः ॥६०॥

त्र्यायुषमितित्रि आयुषम् । त्र्यायुषमितित्रि आयुषम् । त्र्यायुष-

---

१. 'आयुषम्' इति काशिकः पाठः ।

२. पत्रांशनाशात् पुनर्लिखितोऽपपाठः ।

३. अपपाठः, '०वर्द्धन०' इति साधुः ।

४. 'कपाठानुसारं 'वर्द्धनम्' इति युक्तः पाठः ।

५. पत्रांशस्य नाशात् पुनर्लिखितोऽपपाठः ।

त्र्यायुषमितित्रि आयुषम् । तत् । नः । अस्तु । त्र्यायुषमितित्रि आयुषम् ॥६१॥

शिवः । नाम । असि । स्वधितिरितिस्व धितिः । ते । पिता । नमः । ते । अस्तु । मा । मा । हिंसीः ॥ नि । वर्त्तयामि । आयुषे । अन्नाद्यायेत्यन्न अद्याय । प्रजननायेतिप्र जननाय । रायः । पोषाय । सुप्रजास्त्वायेतिसुप्रजाः त्वाय । सुवीर्य्यायेतिसु वीर्य्याय ॥६२॥

॥ इति वाजसनेयिसंहितापदे तृतीयोऽध्यायः ॥

त्र्यायुषमितित्रि आयुषम् । त्र्यायुषमितित्रि आयुषम् । अस्तु । त्र्यायुषमितित्रि आयुषम् ॥६१॥

अस्तु । अन्नाद्यायेत्यन्न अद्याय । प्रजननायेतिप्र जननाय । सुप्रजास्त्वायेतिसुप्रजाः त्वाय ॥६२॥

मितित्रि[२] आयुषम् । त्र्यायुषमितित्रि आयुषम् ॥६१॥

वर्त्तयामि । आयुषे । अन्नाद्यायेत्यन्न अद्याय । प्रजननायेतिप्र जननाय । रायः । पोषाय । सुप्रजास्त्वायेतिसुप्रजाः त्वाय । सुवीर्य्यायेतिसु वीर्य्याय ॥६३॥[२]

॥ इति श्री वाजसनेयिसंहितापदे तृतीयोऽध्यायः ॥

---

१. 'आयुषम्' इति काशिकः पाठः ।

२. पत्रांशस्य नाशात् पुनर्लिखितोऽस्वरोऽपपाठः ।

२. इह ६२ संख्यास्थाने ६३ संख्या निर्दिष्टा । अस्मिन् पाठे गलितानां पदानां मन्त्रांशानां च पुनः पाठः क्रियते । तेन नेहान्यग्रन्थवत् ४० चत्वारिंशत्तमस्य मन्त्रस्य पदपाठ एकोनचत्वारिंशन्मन्त्रपदपाठ एव एकीकृतः । समग्रपाठे सत्यपीह ४० तममन्त्रस्य पदपाठान्ते ४० संख्यास्थाने पुनः ३९ संख्यैव निर्दिष्टा, अत इयमेकस्याः संख्याया न्यूनता इह ६२ स्थाने ६३ संख्या निर्दिश्य पूरिता ।

चतुर्थोऽध्यायः

आ । इ॒दम् । अ॒ग॒न्म॒ । दे॒व॒यज॑न॒मिति॑दे॒व॒ य॒जन॑म् । पृ॒थि॒व्याः । यत्र॑ । दे॒वासः॑ । अजु॑षन्त । विश्वे॑ ॥ ऋ॒क्सा॒मा॒भ्या॒मित्यृ॑क् सा॒मा॒भ्या॑म् । स॒न्तर॑न्त॒ऽइति॑स॒म् तर॑न्तः । य॒जु॒र्भि॒रिति॒यजुः॑ भिः । रा॒यः । पोषे॑ण । सम् । इ॒षा । म॒दे॒म॒ ॥ इ॒माः । आपः॑ । शम् । ऊँ॒ऽइत्यूँ॑ । मे॒ । स॒न्तु॒ । दे॒वीः । ओष॑धे । त्राय॑स्व । स्वधि॑त॒ऽइति॒स्व धि॑ते । मा । ए॒न॒म् । हि॒ꣳसीः ॥१॥

आपः॑ । अ॒स्मान् । मा॒तरः॑ । शु॒न्ध॒य॒न्तु॒ । घृ॒तेन॑ । नः । घृ॒त॒प्व॒ऽइति॑घृ॒त प्वः॑ । पु॒न॒न्तु॒ ॥ विश्व॑म् । हि । रि॒प्रम् । प्र॒व॒हन्तीति॑प्र व॒हन्ति । दे॒वीः । उत् । इत् ।

अ॒ग॒न्म॒ । पृ॒थि॒व्याः । विश्वे॑ । ऋ॒क्सा॒मा॒भ्या॒मित्यृ॑क् सा॒मा॒भ्या॑म् । ऊँ॒ऽइत्यूँ॑ ॥१॥

अ॒स्मान् । घृ॒त॒प्व॒ऽइति॑घृ॒त प्वः॑ । विश्व॑म् । रि॒प्रम् । प्र॒व॒हन्तीति॑प्र

देव॒य्य॒जन॒मिति॑दे॒व [1]य्यजन॑म् । य्यत्र॑ । [2]ऋ॒ख्सा॒मा॒भ्या॒मित्यृ॑क् सा॒मा॒भ्या॑म् । य्य॒जु॒र्भि॒रिति॒य्यजुः॑ भिः । रा॒य्यः । त्राय्य॑स्व ॥१॥

शु॒न्ध॒य्य॒न्तु॒ । घृ॒त॒प्व॒ऽइति॑घृ॒त प्वः॑ । प्र॒व॒हन्तीति॑प्र व॒हन्ति ॥२॥

---

१. 'य्यजनम्' इति शुद्धः पाठो ज्ञेयः ।

२. सकारे परतः प्रथमस्य द्वितीयापत्तिरस्य विशिष्टा शैली । तैत्तिरीयपाठेऽपीयं शैली दृश्यते ।

आब्भ्यः । शुचिः । आ । पूतः । एमि ॥ दीक्क्षातपसोः । तनूः । असि । ताम् । त्वा । शिवाम् । शग्ग्माम् । परि । दधे । भद्रम् । वर्ण्णम् । पुष्ष्यन् ॥२॥

व्वृत्त्रस्य । असि । कनीनकः । चक्क्षुर्द्दाऽइतिचक्क्षुः दाः । असि । चक्क्षुः । मे । देहि ॥३॥

चित्त्पतिरितिचित् पतिः । मा । पुनातु । व्वाक्क्पतिरितिवाक् पतिः । देवः । सविता ॥ तस्य । ते । पवित्त्रपतेऽइतिपवित्त्र पते । पवित्त्रपूतस्येतिपवित्त्र पूतस्य । यत्त्कामऽइतियत् कामः । पुने । तत् । शकेयम् ॥४॥

आ । वः । देवासः । ईमहे । व्वामम् । प्रयतीतिप्र यति । अद्ध्वरे ॥ आ । वः । देवासः । आशिषऽइत्त्या शिषः । यज्ज्ञियासः । हवामहे ॥५॥

व्वहन्ति । आभ्यः । दीक्षातपसोः । शग्माम् । भद्रम् । व्वर्णम् । पुष्यन् ॥२॥

व्वृत्रस्य । चक्षुर्दाऽइतिचक्षुः दाः । चक्षुः ॥३॥

चित्पतिरितिचित् पतिः । व्वाक्पतिरितिवाक् पतिः । पवित्रपतेऽइतिपवित्र पते । पवित्रपूतस्येतिपवित्र पूतस्य । यत्कामऽइतियत् कामः ॥४॥

प्रयतीतिप्र यति । अध्वरे । आशिषऽइत्या शिषः । यज्ञियासः ॥५॥

वृत्रस्य ॥३॥

व्वाक्पतिरितिव्वाक पतिः । य्यत्कामऽइतिय्यत् कामः । शके-य्यम् ॥४॥

प्रय्यतीतिप्र [1]य्यति । य्यज्ञिय्यासः ॥५॥

---

१. 'य्यति' इति शुद्धः पाठो ज्ञेयः ।

स्वाहा । सुज्ज्जम् । मनसः । उरोः । अन्तरिक्क्षात् । द्यावापृथिवीभ्याम् । वातात् । आ । रभे । स्वाहा ॥६॥

आकूत्त्याऽइत्त्या कूत्त्यै । प्रयुजऽइतिप्र युजे । अग्नये । स्वाहा । मेधायै । मनसे । दीक्क्षायै । तपसे । सरस्वत्त्यै । पूष्ण्णे । अग्नये । स्वाहा ॥ आपः । देवीः । बृहतीः । विश्वशम्भुवऽइतिविश्श्व शम्भुवः । द्यावापृथिवीऽइतिद्यावा-पृथिवी । उरोऽइत्त्युरो । अन्तरिक्क्ष ॥ बृहस्प्पतये । हविषा । विधेम । स्वाहा ॥७॥

विश्श्वः । देवस्य । नेतुः । मर्त्तः ॥ वुरीत । सक्ख्यम् ॥ विश्श्वः । राये । इषुद्ध्यति । द्युम्न्नम् । वृणीत । पुष्यसे । स्वाहा ॥८॥

आकूत्याऽइत्या कूत्यै । प्रयुजऽइतिप्र युजे । अग्नये । दीक्षायै । सरस्वत्यै । पूष्णे । अग्नये । विश्वशम्भुवऽइतिविश्व शम्भुवः । द्यावापृथिवी-ऽइतिद्यावापृथिवी । उरोऽइत्युरो । अन्तरिक्ष । बृहस्पतये ॥७॥

विश्वः । सख्यम् । विश्वः । इषुध्यति । द्युम्नम् । पुष्यसे ॥८॥

य्युज्ञम् ॥६॥

प्रयुजऽइतिप्र य्युजे[1] । अग्नये । मेधायै । [2]द्यावापृथिवीऽइतिद्यावा-पृथिवी । बृहस्पतये ॥७॥

विश्वोदेवस्य । विश्वः । राये ॥८॥

---

१. 'युजे' इति साधुः पाठ इह द्रष्टव्यः।

२. मन्त्रपाठेऽन्यपदकोशेषु च 'द्यावापृथिवी' इत्याद्युदात्त पदं दृश्यते ।

ऋक्क्सामयोरित्त्यृक् सामयोः । शिल्प्पेऽइतिशिल्प्पे । स्थः । तेऽइतिते । व्वाम् । आ । रभे । तेऽइतिते । मा । पातम् । आ । अस्य । यज्ज्ञस्य । उदृचऽइत्युत् ऋचः ॥ शर्म्म । असि । शर्म्म । मे । यच्छ ॥९॥

ऊर्क्क् । असि । आङ्गिरसी । ऊर्णम्म्रदाऽइत्यूर्ण म्रदाः । ऊर्ज्जम् । मयि । धेहि ॥ सोमस्य । नीविः । असि । विष्ण्णोः । शर्म्म । असिः । शर्म्म । यजमानस्य । इन्द्रस्य । योनिः । असि । सुसस्याऽइतिसु सस्याः । कृषीः कृधि ॥ उत् । श्रयस्व । व्वनस्प्पते । ऊर्द्ध्वः । मा । पाहि । अꣳहसः ॥१०॥

व्व्रतम् । कृणुत । व्व्रतम् । कृणुत । अग्निः । ब्रह्म । अग्निः । यज्ज्ञः । व्वनस्प्पतिः । यज्ज्ञियः ॥ दैवीम् ।

ऋक्सामयोरित्यृक् सामयोः । शिल्पेऽइतिशिल्पे । यज्ञस्य । उदृच-ऽइत्युत ऋचः ॥९॥

आङ्गिरसी । ऊर्णम्म्रदाऽइत्यूर्ण [2]म्रदाः । विष्णोः । व्वनस्पते । ऊर्ध्वः ॥१०॥

अग्निः । ब्रह्म । अग्निः । यज्ञः । व्वनस्पतिः । यज्ञियः ।

---

[3]ऋख्सामय्योरित्यृक् सामय्योः । य्यज्ञस्य । यछ ॥९॥

मय्यि । य्यजमानस्य । य्योनिः । [4]ऋषीः । [4]स्कृधि । श्रय्यस्व ॥१०॥

य्यज्ञः । य्युज्ञियः । धिय्यम् । अभिद्द्ये । व्वर्चोधामितिव्वर्च्चः

---

१. 'आङ्गिरसि' इति सम्बुद्ध्यन्तमिति दयानन्दः । उभयथाऽपि पदच्छेदस्य संभवः स्वरदोषाभावात् ।

२. द्र० 'ऊर्णम्म्रदसम्' पदम् । अ० २।२, ५; तथा २१।३३,५७ ।

३. द्रष्टव्यम् 'ऋख्सामाभ्याम्' पदम् । अ० ४ मं० १ ॥

४. अपपाठोऽयं लेखकप्रमादजः ।

धियम् । मनामहे । सुमृडीकामितिसु मृडीकाम् । अभिष्टये । वर्चोधामितिवर्च्चः धाम् । यज्ञवाहसमितियज्ञ वाहसम् । सुतीर्थेतिसु तीर्था । नः । असत् । वशे ॥ ये । देवाः । मनोजाताऽइतिमनः जाताः । मनोयुजाऽइतिमनः युजः । दक्षक्रतवऽइतिदक्ष क्रतवः । ते । नः । अवन्तु । ते । नः । पान्तु । तेभ्यः । स्वाहा ॥११॥

श्वात्राः । पीताः । भवत । यूयम् । आपः । अस्माकम् । अन्तः । उदरे । सुशेवाऽइतिसु शेवाः ॥ ताः । अस्मभ्यम् । अयक्ष्माः । अनमीवाः । अनागसः । स्वदन्तु । देवीः । अमृताः । ऋतावृधः । ऋतवृधऽइत्यृत वृधः ॥१२॥

इयम् । ते । यज्ञिया । तनूः । अपः । मुञ्चामि । न । प्रजामितिप्र जाम् ॥ अंहोमुचऽइत्यंहः मुचः ।

सुमृडीकामितिसु मृडीकाम् । अभिष्टये । यज्ञवाहसमितियज्ञ वाहसम् । सुतीर्थेतिसु तीर्था । दक्षक्रतवऽइतिदक्ष क्रतवः । तेभ्यः ॥११॥

श्वात्राः । अस्माकम् । अस्मभ्यम् । ऋतवृधऽइत्यृत वृधः ॥१२॥

यज्ञिया । प्रजामितिप्र जाम् । अंहोमुचऽइत्यंहः मुचः ।

धाम् । य्यज्ञवाहसमितिय्यज्ञ वाहसम् । [1]वशे । य्ये । मनोयुजइतिमनः [2]य्युजः ॥११॥

य्यूयम् । अयक्ष्माः । ऋतवृधइत्यृत वृधः ॥१२॥

इयम् । य्यज्ञिया ॥१३॥

---

१. अपपाठोऽयम्, 'व्वशे' इति साधुः पाठो ज्ञेयः।

२. 'युजः' इति शुद्धः पाठो द्रष्टव्यः।

स्वाहाकृताऽइतिस्वाहा कृताः । पृथिवीम् । आ । विशत । पृथिव्या । सम् । भव ॥१३॥

अग्ने । त्वम् । सु । जागृहि । वयम् । सु । मन्दिषीमहि ॥ रक्ष । नः । अप्रयुच्छन्नित्यप्र युच्छन् । प्रबुधऽइतिप्र बुधे । नः । पुनरितिपुनः । कृधि ॥१४॥

पुनः । मनः । पुनः । आयुः । मे । आ । अगन् । पुनरितिपुनः । प्राणः । पुनः । आत्मा[1] । मे । आ । अगन् । पुनरितिपुनः । चक्षुः । पुनरितिपुनः । श्रोत्रम् । मे । आ । अगन् ॥ वैश्वानरः । अदब्धः । तनूपाऽइतितनू पाः । अग्निः । नः । पातु । दुरितादितिदुः इतात् । अवद्यात् ॥१५॥

त्वम् । अग्ने । व्रतपाऽइतिव्रत पाः । असि । देवः । आ । मर्त्येषु । आ ॥ त्वम् । यज्ञेषु । ईड्यः ॥ रास्व । इयत् । सोम । आ । भूयः । भर । देवः । नः । सविता । वसोः । दाता । वसु । अदात् ॥१६॥

एषा । ते । शुक्र । तनूः । एतत् । वर्चः । तया ।

पृथिव्या ॥१३॥

अग्ने । रक्ष । अप्रयुच्छन्नित्यप्र युच्छन् । प्रबुधऽइतिप्र बुधे ॥१४॥

आत्मा । चक्षुः । श्रोत्रम् । वैश्वानरः । अग्निः । अवद्यात् ॥१५॥

अग्ने । यज्ञेषु । रास्व ॥१६॥

व्वयम् । अप्रयुछन्नित्यप्र युच्छन् ॥१४॥

आयुः ॥१५॥

व्व्रतपाइतिव्व्रत पाः । य्यज्ञेषु । इयत् । भूयः ॥१६॥

१. 'आत्मा' इति केचन लिखन्ति । यमस्वरूपविचारो ग्रन्थान्ते द्रष्टव्यः ।

सम् । भव । भ्राजम् । गच्छ ॥ जूः । असि । धृता । मनसा । जुष्टा । विष्णवे ॥१७॥

तस्याः । ते । सत्यसवसऽइतिसत्य संवसः । प्रसवऽइतिप्र सवे । तन्वः । यन्त्रम् । अशीय । स्वाहा ॥ शुक्रम् । असि । चन्द्रम् । अमृतम् । वैश्वदेवमितिवैश्व देवम् ॥१८॥

चित् । मना । धीः । दक्षिणा । क्षत्रिया । यज्ञिया । उभयतःशीर्ष्णीत्युभयतः शीर्ष्णी ॥ सा । नः । सुप्राचीतिसु प्राची । सुप्रतीचीतिसु प्रतीची । एधि । मित्रः । त्वा । पदि । बध्नीताम् । पूषा । अध्वनः । पातु । इन्द्राय । अध्यक्षायेत्यधि अक्षाय ॥१९॥

शुक्र । [1]गछ । जुष्टा । विष्णवे ॥१७॥

सत्यसंवसऽइतिसत्य संवसः । प्रसवऽइतिप्र सवे । तन्वः । शुक्रम् । वैश्वदेवमितिवैश्व देवम् ॥१८॥

दाक्षिणा । क्षत्रिया । यज्ञिया । उभयतःशीर्ष्णीत्युभयतः शीर्ष्णी । सुप्राचीतिसु प्राची । सुप्रतीचीतिसु प्रतीची । मित्रः । बध्नीताम् । अध्वनः । अध्यक्षायेत्यधि अक्षाय ॥१९॥

तस्ना । गछ ॥१७॥

य्यन्तम् । अशीय ॥ वैश्वदेवमितिवैश्व देवम् ॥१८॥

दाक्षिणा । आ[2] । क्षत्रिया । य्यज्ञिया । उभयतःशीर्ष्णीत्युभयतः शीर्ष्णी । इन्द्राय । अध्यक्षायेत्यधि अक्षाय ॥१९॥

---

१. मुम्बईमुद्रिते सचकारः 'गच्छ' इति पाठः ।

२. 'आ' पदमन्यकोशेषु नोपलभ्यते । स्वरदोषाच्चेदं पदं न संभवति ।

अनु । त्वा । माता । मन्न्यताम् । पिता । भ्राता । सगर्भ्भ्य्ऽइतिस गर्भ्भ्यंः । सखा । सयूत्थ्यऽइतिस यूत्थ्यंः ॥ सा । देवि । देवम् । अच्छ । इहि । इन्द्राय । सोमम् । रुद्रः । त्वा । आ । वर्त्तयतु । स्वस्ति । सोम-सखेतिसोम सखा । पुनः । आ । इहि ॥२०॥

वस्वी । असि । अदितिः । आदित्त्या । रुद्रा । चन्द्रा ॥ बृहस्प्पतिः । त्वा । सुम्म्ने । रम्म्णातु । रुद्रः । वसुभिरिति-वसु भिः । आ । चक्के ॥२१॥

अदित्त्याः । त्वा । मूर्द्धन् । आ । जिघर्म्मि । देवयजन-ऽइतिदेव यजने । पृथिव्याः । इडायाः । पदम् । असि । घृतवदितिघृत वत् । स्वाहा ॥ अस्म्मेऽइत्त्यस्म्मे । रमस्व । अस्म्मेऽइत्त्यस्म्मे । ते । बन्धुः । त्वेऽइतित्त्वे । रायः ।

मन्यताम् । सगर्भ्यऽइतिस गर्भ्यः । सयूथ्यऽइतिस यूथ्यः । [1]अछ । रुद्रः । स्वस्ति ॥२०॥

आदित्या । रुद्रा । बृहस्पतिः । सुम्ने । रम्णातु । रुद्रः ॥२१॥

अदित्याः । पृथिव्याः । अस्मेऽइत्यस्मे । अस्मेऽइत्यस्मे । त्वेऽइतित्वे ।

सयूथ्यइतिस । [2]स्यूथ्यः । इन्द्राय । वर्त्तयतु ॥२०॥

वसुभिरितिवसु भिः ॥२१॥

देवयजनऽइतिदेव [3]स्यजने । इडायाः । घृतवदितिघृत वत् । रायः ।

---

१. मुम्बईमुद्रिते 'अच्छ' इति सचकारः पाठः ।

२. 'यूथ्यः' इति शुद्धः पाठोऽत्र ज्ञेयः ।

३. 'यजने' इति शुद्धः पाठो द्रष्टव्यः ।

मेऽइतिमे । रायः । मा । वयम् । रायः । पोषेण । वि । यौष्म । तोताः । रायः ॥२२॥

सम् । अख्ये । देव्या । धिया । सम् । दक्षिणया । उरुचक्षसेत्युरु चक्षसा ॥ मा । मे । आयुः । प्र । मोषीः । मोऽइतिमो । अहम् । तव । वीरम् । विदेय । तव । देवि । सन्दृशीतिसम् दृशि ॥२३॥

एषः । ते । गायत्रः । भागः । इति । मे । सोमाय । ब्रूतात् । त्रैष्टुभः । त्रैस्तुभऽइतित्रैस्तुभः । जागतः । छन्दोनामानामितिच्छन्दः नामानाम् । साम्राज्यमितिसाम् राज्यम् । गच्छ । आस्माकः । असि । शुक्रः । ते । ग्रह्यः । विचितऽइतिवि चितः । त्वा । वि । चिन्वन्तु ॥२४॥

अभि । त्यम् । देवम् । सवितारम् । ओण्योः । कविक्रतुमितिकवि क्रतुम् । अर्चामि । सत्यसवमितिसत्य

यौष्म ॥२२॥

अख्ये । देव्या । दक्षिणया । उरुचक्षसेत्युरु चक्षसा ॥२३॥

गायत्रः । त्रैष्टुभः । त्रैस्तुभऽइतित्रैस्तुभः । साम्राज्यमितिसाम् राज्यम् । गच्छ । आस्माकः । शुक्रः । चिन्वन्तु ॥२४॥

कविक्रतुमितिकवि क्रतुम् । सत्यसवमितिसत्य सवम् । रत्नधामिति-

रायः । वयम् । रायः । यौष्म । रायः ॥२२॥

धिया । दक्षिणया । आयुः । विदेय ॥२३॥

गायत्रः । सोमाय । विचितऽइतिवि चितः ॥२४॥

संवम् । रत्नधामितिरत्न धाम् । अभि । प्रियम् । मतिम् । कविम् ॥ ऊर्द्ध्वा । यस्यं । अमतिः । भाः । अदिद्युतत् । सवींमनि । हिरण्यपाणिरितिहिरण्य पाणिः । अमिमीत । सुक्रतुरितिसु क्रतुः । कृपा । स्वरितिस्वः ॥ प्रजाभ्यऽइतिप्र जाभ्यंः । त्वा । प्रजाऽइतिप्र जाः । त्वा । अनुप्राणन्त्वित्यनु प्राणन्तु । प्रजाऽइतिप्र जाः । त्वम् । अनुप्राणिहीत्यनु प्राणिहि ॥२५॥

शुक्रम् । त्वा । शुक्रेण । क्रीणामि । चन्द्रम् । चन्द्रेण । अमृतम् । अमृतेन ॥ सग्मे । ते । गोः । अस्मेऽइत्यस्मे । ते । चन्द्राणि । तपसः । तनूः । असि । प्रजापतेरितिप्रजा पतेः । वर्णः । परमेण । पशुना । क्रीयसे । सहस्रपोषमितिसहस्र पोषम् । पुषेयम् ॥२६॥

मित्रः । नः । आ । इहि । सुमित्रधऽइतिसु मित्रधः । इन्द्रस्य । उरुम् । आ । विश । दक्षिणम् । उशन् ।

रत्न धाम् । ऊर्ध्वा । अदिद्युतत् । सुक्रतुरितिसु क्रतुः । प्रजाभ्यऽइतिप्र जाभ्यंः । प्रजाऽइतिप्र जाः । अनुप्राणन्त्वित्यनु प्राणन्तु । प्रजाऽइतिप्र जाः । अनुप्राणिहीत्यनु प्राणिहि ॥२५॥

शुक्रम् । शुक्रेण । सग्मे । अस्मेऽइत्यस्मे । प्रजापतेरितिप्रजा पतेः ॥२६॥

मित्रः । सुमित्रधऽइतिसु मित्रधः । दाक्षिणम् । हस्तं । सुहस्तेतिसु

प्रियम् । य्यस्यं ॥२५॥

व्वर्णः । क्रीयसे । पुषेयम् ॥२६॥

उशन्तम् । स्योनः । स्योनम् ॥ स्वानं । भ्राजं । अङ्घारे । बम्भारे । हस्त । सुहस्तेतिसु हस्त । कृशानोऽइति कृशानो । एते । वः । सोमक्रयणाऽइतिसोम क्रयणाः । तान् । रक्षध्वम् । मा । वः । दभन् ॥२७॥

परि । मा । अग्ने । दुश्चरितादितिदुः चरितात् । बाधस्व । आ । मा । सुचरितऽइतिसु चरिते । भज ॥ उत् । आयुषा । स्वायुषेतिसु आयुषा । उत् । अस्थाम् । अमृतान् । अनु ॥२८॥

प्रति । पन्थाम् । अपद्महि । स्वस्तिगामितिस्वस्ति गाम् । अनेहसम् ॥ येन । विश्वाः । परि । द्विषः । वृणक्ति । विन्दते । वसु ॥२९॥

अदित्याः । त्वक् । असि । अदित्यै । सदः । आ । सीद ॥ अस्तभ्नात् । द्याम् । वृषभः । अन्तरिक्षम् । अमिमीत । वरिमाणम् । पृथिव्याः ॥ आ । असीदत् । विश्वा ।

हस्त । सोमक्रयणाऽइतिसोम क्रयणाः । रक्षध्वम् ॥२७॥

अग्ने । दुश्चरितादितिदुः चरितात् । अस्थाम् ॥२८॥

अपद्महि । स्वस्तिगामितिस्वस्ति गाम् । विश्वाः ॥२९॥

अदित्याः । अदित्यै । अस्तभ्नात् । अन्तरिक्षम् । पृथिव्याः । विश्वा ।

सोमक्रयणाऽइतिसोम क्रयणाः ॥२७॥

आयुषा । स्वायुषेतिसु आयुषा ॥२८॥

येन ॥२९॥

भुवनानि । सम्म्राडितिसम् राट् । विश्श्वा । इत् । तानि । वरुणस्य । व्व्रतानि ॥३०॥

वनेषु । वि । अन्तरिक्क्षम् । ततान । वाजम् । अर्व्वत्स्वित्त्यर्व्वत् सु । पयः । उस्रियासु ॥ हृत्त्स्वितिहृत् सु । क्रतुम् । वरुणः । विक्क्षु । अग्निम् । दिवि । सूर्य्यम् । अदधात् । सोमम् । अद्रौ ॥३१॥

सूर्य्यस्य । चक्क्षुः । आ । रोह । अग्नेः । अक्क्ष्णः । कनीनकम् ॥ यत्र । एतशेभिः । ईयसे । भ्राजमानः । विपश्श्चितेतिविपः चिता ॥३२॥

उस्रौ । आ । इतम् । धूर्षाहौ । धूःसहावितिधूः सहौ । युज्ज्येथाम् । अनश्श्रूऽइत्त्यनश्श्रू । अवीरहणौ । अवीरह-

सम्राडितिसम् राट् । विश्वा ॥३०॥

अन्तरिक्षम् । अर्व्वत्स्वित्यर्व्वत् सु । हृत्स्वितिहृत् सु । विक्षु । अग्निम् । अद्रौ ॥३१॥

चक्षुः । अग्नेः । अक्ष्णः । विपश्चितेतिविपः चिता ॥३२॥

युज्येथाम् । अनश्रूऽइत्यनश्रू । अवीरहनावित्यवीर हनौ । ब्रह्मचोदना-

[1]सम्म्राडितिसम् राट् ॥३०॥

[2]अर्व्वत्स्वित्यर्व्वत् सु । पयः । उस्रियासु । [2]हृत्स्वितिहृत् सु । सूर्य्यम् ॥३१॥

सूर्य्यस्य । यत्र । ईयसे । विपश्चितेतिविपः चिता ॥३२॥

१. द्र० पूर्वत्र अ० ३ । मं० ३८ ।
२. द्र० पूर्वत्र अ०४ । मं० १ ।

नावित्त्यवीर हनौ । ब्रह्ममचोदनाविर्तिब्रह्म चोदनौ ॥ स्वस्ति । यजमानस्य । गृहान् । गच्छतम् ॥३३॥

भद्रः । मे । असि । प्र । च्यवस्व । भुवः । पते । विश्वानि ॥ अभि । धामानि । मा । त्वा । परिपरिणऽइर्तिपरि परिणः । विदन् । परिपन्थिनऽइर्तिपरि पन्थिनः । वृकाः । अघायवः । अघयवऽइत्यंघ यवः ॥ श्येनः । भूत्वा । परां । पत । यजमानस्य । गृहान् । गच्छ । तत । नौ । सँस्कृतम् ॥३४॥

नमः । मित्त्रस्य । वरुणस्य । चक्क्षसे । महः । देवाय । तत् । ऋतम् । सपर्य्यत ॥ दूरेदृशऽइर्तिदूरे दृशे । देवजातायेर्तिदेव जाताय । केतवे । दिवः । पुत्त्राय । सूर्य्याय । शंसत ॥३५॥

विर्तिब्रह्म चोदनौ । स्वस्ति । गछतम् ॥३३॥

भद्र? । विश्वानि । अघयवऽइत्यंघ यवः । भूत्वा । गछ । सँस्कृतम् ॥३४॥

मित्रस्य । चक्षसे । पुत्राय ॥३५॥

व्युज्येथाम् । व्यजमानस्य ॥३३॥

[1]वृकाः । अघाय्यवः । अघय्यवऽइत्यंघ [2]य्यवः । व्यजमानस्य ॥३४॥

देवाय्य । सपर्य्यत । देवजाताय्येतिदेव जाताय्य । पुत्राय्य । सूर्य्याय्य ॥३५

---

१. ककोशशैल्यनुसारम् ऋकारोत्तरो वकारो न गुरुर्भवति । तेनेह 'वृकाः' इति शुद्धः पाठो ज्ञेयः ।

२. ककोशशैल्यनुसारमिह 'य्रवः' इति शुद्धः पाठो ज्ञेयः ।

वरुणस्य । उत्तम्भनम् । असि । स्कम्भसर्जनीऽइतिस्कम्भ सर्जनी । स्थः । ऋतसदनीत्यृत सदनी । ऋतसदनमित्यृत सदनम् । आ । सीद ॥३६॥

या । ते । धामानि । हविषा । यजन्ति । ता । ते । विश्वा । परिभूरितिपरि भूः । अस्तु । यज्ञम् ॥ गयस्फानऽइतिगय स्फानः । प्रतरणऽइतिप्र तरणः । सुवीरऽइतिसु वीरः । अवीरहेत्यवीर हा । प्र । चर । सोम । दुर्यान् ॥३७॥

॥ इति वाजसनेयिसंहितापदे चतुर्थोऽध्यायः ॥

उत्तम्भनम् । ऋतसदनीत्यृत सदनी । ऋतसदनमित्यृत सदनम् ॥३६॥

विश्वा । अस्तु । यज्ञम् । गयस्फानऽइतिगय स्फानः । प्रतरणऽइतिप्र तरणः । अवीरहेत्यवीर हा ॥३७॥

ऋतसदनीत्यृत सदनी । ऋतसदनमित्यृत सदनम् ॥३६॥

य्या । य्यजन्ति । य्यज्ञम् । गय्यस्फानऽइतिगय्य स्फानः । सुवीरऽइतिसु वीरः । दुर्य्यान् ॥३७॥

॥ इति श्रीवाजसनेयिसंहितायां पदपाठेन चतुर्थोऽध्यायः ॥

पञ्चमोऽध्यायः

अग्ग्ने३ । तनू३ । असि । व्विष्ण्णवे । त्वा । सोमस्य । अतिथेर्ं । आतित्थ्यम् । श्येनाय । सोमभृतऽइतिसोम भृते । अग्ग्नये । रायस्प्पोषदऽइतिरायस्प्पोष दे ॥१॥

अग्ग्ने३ । जनित्त्रम् । असि । वृषणौ । स्थर्ं । उर्व्वशी । आयु३ । पुरूरवाः । मन्थामि ॥२॥

भवतम् । नर्ं । समनसावितिस मनसौ । सचेतसावितिस चेतसौ । अरेपसौ ॥ मा । यज्ञ्ञम् । हिंरसिष्टम् । मा । यज्ञ्ञपतिमितियज्ञ्ञ पतिम् । जातवेदसावितिजात वेदसौ । शिवौ । भवतम् । अद्य । नर्ं ॥३॥

अग्ग्नौ । अग्ग्नि३ । चरति । प्रविष्टऽइतिप्प्र विष्टर्ं । ऋषीणाम् । पुत्त्र३ । अभिशस्त्तिपावेत्त्यभिशस्त्ति पावा ॥

अग्ने? । व्विष्णवे । आतिथ्यम् । अग्नये । रायस्पोषदऽइतिरायस्पोष दे ॥१॥ अग्ने? । जनित्रम् ॥२॥

यज्ञम् । हिंरसिष्टम् । यज्ञपतिमितियज्ञ पतिम् । अद्य ॥३॥

अग्नौ । अग्नि? । प्रविष्टऽइतिप्र विष्टर्ं । पुत्र? । अभिशस्तिपावेत्य-

---

श्येनाय । अग्नये । रायस्पोषदऽइतिरायस्पोष दे ॥१॥

वृषणौ । आयु? ॥२॥

य्यज्ञम् । य्यज्ञपतिमितिय्यज्ञ पतिम् । जातवेदसावितिजात वेदसौ ॥३॥

प्रविष्टऽइतिप्र विष्टर्ं । सुयजेतिसु [1]य्यजा । य्यज । अप्रयुच्छ-

---

१. कक्कोशशैल्यनुसारमिह 'य्यजा' इति शुद्धः पाठो द्रष्टव्यः ।

सः । नः । स्योनः । सुयजेतिसु यजा । यज । इह । देवेभ्यः । हव्यम् । सदम् । अप्रयुच्छन्नित्यप्र युच्छन् । स्वाहा ॥४॥

आपतयऽइत्या पतये । त्वा । परिपतयऽइतिपरि पतये । गृह्णामि । तनूनप्त्रऽइतितनू नप्त्रे । शाक्कराय । शक्कने । ओजिष्ठाय ॥ अनाधृष्टम् । असि । अनाधृष्यम् । देवानाम् । ओजः । अनभिशस्तीत्यनभि शस्ति । अभिशस्तिपाऽइत्यभिशस्ति पाः । अनभिशस्तेन्यमित्यनभि शस्तेन्यम् । अञ्जसा । सत्यम् । उप । गेषम् । स्वितऽइतिसु इते । मा । धाः ॥५॥

अग्ने । व्रतपाऽइतिव्रत[1] पाः । त्वेऽइतित्वे । व्रतपाऽइतिव्रत[1] पाः । या । तव । तनूः । इयम् । सा । मयि ।

भिशस्ति पावा । देवेभ्यः । हव्यम् । अप्रयुछन्नित्यप्र युछन् ॥४॥

आपतयऽइत्या पतये । गृह्णामि । तनूनप्त्रऽइतितनू नप्त्रे । शाक्वराय । शक्कने । ओजिष्ठाय । अनाधृष्टम् । अनाधृष्यम् । अनभिशस्तीत्यनभि शस्ति । अभिशस्तिपाऽइत्यभिशस्ति पाः । अनभिशस्तेन्यमित्यनभि शस्तेन्यम् । सत्यम् ॥५॥

अग्ने । त्वेऽइतित्वे । दीक्षाम् । दीक्षापतिरितिदीक्षा पतिः ।

न्नित्यप्र युछन् ॥४॥

आपतयऽइत्या पतये । परिपतयऽइतिपरि पतये । शाक्वराय । ओजिष्ठाय ॥५॥

व्रतपाऽइतिव्रत पाः । व्रतपाऽइतिव्रत पाः । या । इयम् ।

---

१. 'इतिव्रत' इति कव्यतिरिक्तेष्वपि हस्तलेखेषु पाठः । स च अपपाठः । ककोशे तु युक्तस्तादृशः पाठः, नान्यकोशीयः ।

योऽइतियो[1] । मम । तनूः । एषा । सा । त्वयि ॥ सह । नौ । व्रतपतऽइतिव्रत पते । व्रतानि । अनु । मे । दीक्षाम् । दीक्षापतिरितिदीक्षा पतिः । मन्यताम् । अनु । तपः । तपस्पतिः । तपःपतिरितितपः पतिः ॥६॥

अंशुरंशुरित्यंशुः अंशुः । ते । देव । सोम । आ । प्यायताम् । इन्द्राय । एकधनविदऽइत्येकधन विदे ॥ आ । तुभ्यम् । इन्द्रः । प्यायताम् । आ । त्वम् । इन्द्राय । प्यायस्व ॥ आ । प्यायय । अस्मान् । सखीन् । सन्या । मेधया । स्वस्ति । ते । देव । सोम । सुत्याम् । अशीय ॥ एष्टाऽइत्या इष्टाः । रायः । प्र । इषे । भगाय । ऋतम् । ऋतवादिभ्यऽइत्यृतवादि भ्यः । नमः । द्यावापृथिवी-भ्याम् ॥७॥

मन्यताम् ॥६॥

अंशुरंशुरित्यंशुः अंशुः । एकधनविदऽइत्येकधन विदे । तुभ्यम् । अस्मान् । सन्या । स्वस्ति । सुत्याम् । एष्टाऽइत्या इष्टाः । ऋत-वादिभ्यऽइत्यृतवादि भ्यः । द्यावापृथिवीभ्याम् ॥७॥

मयि । य्योऽइतिय्यो । त्वयि । व्रतपतऽइतिव्रत पते ॥६॥

प्यायताम् । इन्द्राय । एकधनविदऽइत्येकधन विदे । आप्यायताम्[2] । इन्द्राय । प्यायस्व । प्यायय । मेधया । अशीय । रायः । भगाय । ऋतवादिभ्यऽइत्यृतवादि भ्यः ॥७॥

१. 'यो या उ या च' इति महीधरः । 'या चैषा मम' इत्युव्वटः । अत्राह दयानन्दस्वामी—'(यो) या । अत्र महीधरेण या उ इत्यशुद्ध व्याख्यातम्, ओदन्तोऽयं निपातः ।' यजुर्भाष्ये ५।६ ॥

२. इह मन्त्रे 'प्यायताम्' इत्येव श्रूयते । तस्मादिह 'आप्यायताम्' इति पदच्छेदः, स्वरश्च चिन्त्यः ।

या । ते । अग्ने । अयऽशयेत्यंयः शया । तनूः । वर्षिष्ठा । गह्वरेष्ठा । गह्वरेस्थेतिगह्वरे स्था ॥ उग्रम् । वचः । अपं । अवधीत् । त्वेषम् । वचः । अपं । अवधीत् । स्वाहा ॥ रजःशयेतिरजः शया । हरिशयेतिहरि शया ॥८॥

तप्तायनीतितप्त अयनी । मे । असि । वित्तायनीतिवित्त अयनी । मे । असि । अवतात् । मा । नाथितात् । अवतात् । मा । व्यथितात् ॥ विदेत् । अग्निः । नभः । नाम । अग्ने । अङ्गिरः । आयुना । नाम्ना । आ । इहि । यः । अस्याम् । पृथिव्याम् । असि । यत् । ते । अनाधृष्टम् । नाम । यज्ञियम् । तेन । त्वा । आ । दधे । द्वितीयस्याम् । तृतीयस्याम् ॥ अनु । त्वा । देववीतयऽइतिदेव वीतये ॥९॥

सिंही । असि । सपत्नसाही । सपत्नसहीतिसपत्न सही । देवेभ्यः । कल्पस्व । शुन्धस्व । शुम्भस्व ॥१०॥

अग्ने । अयःशयेत्यंयः शया । वर्षिष्ठा । गह्वरेष्ठा । गह्वरेस्थेतिगह्वरे स्था । उग्रम् ॥८॥

तप्तायनीतितप्त अयनी । अग्निः । अग्ने । अङ्गिरः । नाम्ना । पृथिव्याम् । अनाधृष्टम् । यज्ञियम् । ९॥

सपत्नसाही । सपत्नसहीतिसपत्न सही । देवेभ्यः । कल्पस्व ॥१०॥

य्या । अय्रःशय्रेत्यंय्रः शय्रा । रजःशय्रेतिरजः शय्रा । हरिशय्रेतिहरि शय्रा ॥८॥

तप्ताय्रनीतितप्त अय्रनी । वित्ताय्रनीतिवित्त अय्रनी । आय्रुना । य्यः । य्यत् । य्यज्ञिय्रम् । द्वितीय्रस्याम् । तृतीय्रस्याम् । देववीतय्रऽइतिदेव वीतय्रे ॥९॥

इन्द्रघोषऽइतीन्द्र घोषः । त्वा । वसुभिरितिवसु भिः । पुरस्तात् । पातु । प्रचेताऽइतिप्र चेताः । रुद्रैः । पश्चात् । मनोजवाऽइतिमनः जवाः । पितृभिरितिपितृ भिः । दक्षिणतः । विश्वकर्म्मेतिविश्व कर्म्मा । आदित्यैः । उत्तरतः । इदम् । अहम् । तप्तम् । वाः । बहिर्द्धेतिबहिः धा । सज्ज्ञात् । निः । सृजामि ॥११॥

सिꣳही । असि । स्वाहा । आदित्यवनिरित्यादित्य वनिः । ब्रह्मवनिरितिब्रह्म वनिः । क्षत्त्रवनिरितिक्षत्त्र वनिः । सुप्रजावनिरितिसुप्रजा वनिः । रायस्पोषवनिरितिरायस्पोष वनिः । आ । वह । देवान् । यजमानाय । स्वाहा । भूतेभ्यः । त्वा ॥१२॥

ध्रुवः । असि । पृथिवीम् । दृꣳह । ध्रुवक्षिदितिध्रुव क्षित् । अन्तरिक्षम् । अच्युतक्षिदित्यच्युत क्षित् । दिवम् । अग्नेः । पुरीषम् । असि ॥१३॥

पुरस्तात् । प्रचेताऽइतिप्र चेताः । रुद्रैः । पश्चात् । दक्षिणतः । विश्वकर्म्मेतिविश्व कर्म्मा । आदित्यैः । तप्तम् । सज्ज्ञात् ॥११॥

आदित्यवनिरित्यादित्य वनिः । ब्रह्मवनिरितिब्रह्म वनिः । क्षत्र-वनिरितिक्षत्र वनिः । सुप्रजावनिरिसुप्रजा वनिः । रायस्पोषवनिरिति-रायस्पोष वनिः । भूतेभ्यः ॥१२॥

ध्रुवक्षिदितिध्रुव क्षित् । अन्तरिक्षम् । अच्युतक्षिदित्यच्युत क्षित । अग्नेः ॥१३॥

वसुभिरितिवसु भिः । विश्वकर्म्मेतिविश्व कर्म्मा । स्यज्ञात् ॥११॥

आदित्यवनिरित्यादित्य वनिः । ब्रह्मवनिरितिब्रह्म वनिः । क्षत्र-वनिरितिक्षत्र वनिः । सुप्रजावनिरितिसुप्रजा वनिः । रायस्पोषवनिरिति-रायस्पोष वनिः । य्यजमानाय ॥१२॥

युञ्जते । मनः । उत । युञ्जते[1] । धियः । विप्राः ।
विप्रस्य । बृहतः । विपश्चित इति विपः चितः ॥ वि ।
होत्राः । दधे । वयुनावित् । वयुनविदिति वयुन वित् ।
एकः । इत् । मही । देवस्य । सवितुः । परिष्टुतिः ।
परिस्तुतिरितिपरि स्तुतिः । स्वाहा ॥१४॥

इदम् । विष्णुः । वि । चक्रमे । त्रेधा । नि । दधे ।
पदम् । समूढमितिसम् ऊढम् । अस्य । पाᳫसुरे । स्वाहा ॥१५॥

इरावतीऽइतीरा वती । धेनुमतीऽइतिधेनु मती । हि ।
भूतम् । सूयवसिनी । सुयवसिनीऽइतिसु [2]यवसिनी । मनवे ।
दशस्या ॥ वि । अस्कभ्नाः । रोदसीऽइतिरोदसी । विष्णो-
ऽइतिविष्णो । एतेऽइत्येते । दाधर्थ । पृथिवीम् । अभितः ।
मयूखैः । स्वाहा ॥१६॥

विप्राः । विप्रस्य । विपश्चितऽइतिविपः चितः । होत्राः । परि-
ष्टुतिः । परिस्तुतिरितिपरि स्तुतिः ॥१४॥

विष्णुः । चक्रमे ॥१५॥

अस्कभ्नाः । विष्णोऽइतिविष्णो । एतेऽइत्येते ॥१६॥

य्युञ्जते । य्युञ्जते । धियः । विपश्चितऽइतिविपः चितः ।
वयुनावित् । वयुनविदितिवयुन वित् ॥१४॥

इरावतीऽइतीरा वती । [3]सूयवसिनीऽइतिसु य्यवसिनी । विष्णो-
ऽइतिविष्णो । मयूखैः ॥१६॥

---

१. क्वचित् 'युञ्जते' इत्यपपाठः, मन्त्रे सर्वनिघातस्य दर्शनात् ।

२. 'सवसिनी' इति काशिकः पाठः ।

३. अत्र पाठभ्रंशः प्रतीयते । 'सूयवसिनी । सुयवसिनीऽइतिसु यवसिनी' एवं पाठेन भाव्यम् ।

देवश्श्रुताविर्तिदेव श्रुतौ । देवेषु । आ । घोषतम् । प्राचीऽइतिप्प्राचीं । प्र । इतम् । अध्वरम् । कल्प्पयन्ती-ऽइर्तिकल्प्पयन्ती । उर्द्धम् । यज्ञम् । नयतम् । मा । जिह्वरतम् ॥ स्वम् । गोष्ठम् । गोस्त्थमितिंगो स्थम् । आ । वृदतम् । देवीऽइर्तिदेवी । दुर्य्येऽइर्तिदुर्य्ये । आर्यु÷ । मा । नि? । व्वादिष्ट्टम् । प्रजामितिंप्प्र जाम् । मा । नि? । व्वादिष्ट्टम् । अत्त्रे । रमेथाम् । वर्ष्मन् । पृथिव्या? ॥१७॥

विष्णोर्ं । नु । कम् । व्वीर्य्याणि । प्र । व्वोचम् । य? । पार्थिवानि । व्विममऽइर्तिवि ममे । रजांॅसि ॥ य? । अस्कंभायत् । उत्त्तरमित्त्युत् तरम् । सधस्त्थमितिंसध स्थम् । व्विचक्क्रमाणऽइर्तिवि [1]चक्क्रमाण? । त्रेधा । उरुगाय-ऽइत्त्युरु गाय? । विष्ण्णवे । त्वा ॥१८॥

देवश्रुताविर्तिदेव श्रुतौ । प्राचीऽइतिप्राचीं । अध्वरम् । कल्पयन्ती-ऽइतिं कल्पयन्ती । यज्ञम् । जिह्वरतम् । गोष्ठम् । गोस्थमितिंगो स्थम् । व्वादिष्टम् । प्रजामितिंप्र जाम् । व्वादिष्टम् । अत्रे । पृथिव्या? ॥१७॥

विष्णोर्ं । पार्थिवानि । अस्कंभायत् । उत्तरमित्युत् तरम् । व्विच-क्रमाणऽइर्तिवि चक्रमाण? । उरुगायऽइत्युरु गाय? । विष्णवे ॥१८॥

कल्पय्यन्तीऽइतिंकल्पय्यन्ती । य्यज्ञम् । नय्यतम् । दुर्य्येऽइर्तिदुर्य्ये । आर्यु÷ । [2]वादिष्टम् ॥१७॥

व्वीर्य्याणि । य्य? । व्विममऽइर्तिवि ममे । य्य? । अस्कंभाय्यत्[3] । व्विचक्रमाणऽइर्तिवि चक्रमाण? । उरुगाय्यऽइत्युरु गाय्य? ॥१८॥

---

१. 'चक्क्रमाण?' इति काशिकः पाठः ।

२. 'व्वादिष्टम्' इति शुद्धः पाठो ज्ञेयः ।

३. अपपाठः, 'अस्कंभाय्यत्' इत्येवं पाठेन भाव्यम् ।

दिवः । वा । विष्णोऽइतिविष्णो । उत । वा । पृथिव्याः । महः । वा । विष्णोऽइतिविष्णो । उरोः । अन्तरिक्षात् ॥ उभा । हि । हस्ता । वसुना । पृणस्व । आ । प्र । यच्छ । दक्षिणात् । आ । उत । सव्यात् । विष्णवे । त्वा ॥१९॥

प्र । तत् । विष्णुः । स्तवते । वीर्येण । मृगः । न । भीमः । कुचरः । गिरिष्ठाः । गिरिस्थाऽइतिगिरि स्थाः ॥ यस्य । उरुषु । त्रिषु । विक्रमणेष्वितिवि क्रमणेषु । अधिक्षियन्तीत्यधि क्षियन्ति । भुवनानि । विश्वा ॥२०॥

विष्णोः । रराटम् । असि । श्नप्त्रेऽइतिश्नप्त्रे । स्थः । स्यूः । ध्रुवः । वैष्णवम् । विष्णवे । त्वा ॥२१॥

विष्णोऽइतिविष्णो । पृथिव्याः । विष्णोऽइतिविष्णो । अन्तरिक्षात् । हस्ता । दक्षिणात् । सव्यात् । विष्णवे ॥१९॥

विष्णुः । गिरिष्ठाः । गिरिस्थाऽइतिगिरि स्थाः । विक्रमणेष्वितिवि क्रमणेषु । अधिक्षियन्तीत्यधि क्षियन्ति । विश्वा ॥२०॥

विष्णोः । श्नप्त्रेऽइतिश्नप्त्रे । वैष्णवम् । विष्णवे ॥२१॥

विष्णोऽइतिविष्णो । [1]वा । महः । [1]वा । विष्णोऽइतिविष्णो । यच्छ ॥१९॥

वीर्येण । यस्य । विक्रमणेष्वितिवि[2] क्रमणेषु । अधिक्षियन्तीत्यधि क्षियन्ति ॥२०॥

[3]स्युः ॥२१॥

---

१. कपाठे 'वा' पदे वकारः संहितावन्न गुरुर्भवति ।

२. कपाठानुसारमिह 'व्वि' इत्येवं पाठः साधुः ।

३. अपपाठोऽयम्, 'स्यूः' इत्येवं साधुः ।

नारीं[1] । असि । इदम् । अहम् । रक्क्षसाम् । ग्रीवाः । अपि । कृन्तामि ॥ बृहन् । असि । बृहद्र्वा ऽइतिबृहत् रवाः । बृहतीम् । इन्द्राय । वाचम् । वद ॥२२॥

रक्क्षोहणम् । रक्क्षोहनमितिरक्क्षः हनम् । वलगहनमितिवलग हनम्[2] । वैष्णवीम् । इदम् । अहम् । तम् । वलगम् । उत् । किरामि । यम् । मे । निष्ट्यः । यम् । अमात्यः । निचखानेतिनि चखान । समानः । असमानः । सबन्धुरितिस बन्धुः । असबन्धुरित्यस बन्धुः । सजातऽइतिस जातः । असजातः । उत् । कृत्याम् । किरामि ॥२३॥

रक्षसाम् । बृहद्र्वाऽइतिबृहत् रवाः ॥२२॥

रक्षोहणम् । रक्षोहनमितिरक्षःहनम् । वैष्णवीम् । निष्ट्यः । अमात्यः । कृत्याम् ॥२३॥

इन्द्राय ॥२२॥

वलगहनमितिवलग हनम् । यम् । यम् ॥२३॥

---

१. 'नारि' इति संबुद्ध्यन्तमिति स्वामिदयानन्दः । स्वरदोषाभावात् वाक्यस्य चोभयथा सामञ्जस्याद् उभयथापि पदच्छेदः संभवति । अत्र ४८ पृष्ठस्था प्रथमा टिप्पण्यप्यनुसंधेया ।

२. 'बलगहनऽइति बलगऽहनः, बलगहनाविति बलगऽहनौ' (५।२३, २५) इति स्वामिदयानन्दस्वीकृतः बकारवान् पाठः । अपि चात्र 'बलानि गाहते' 'बलानि गाहेये' इति भाष्यानुसारं 'गाहनः' 'गाहनौ' इत्युत्तरपदे स्वीकृते इति प्रतीयते । स्वरदोषाभावात् तादृशश्छेदोऽपीह संभवति । तथा ह्युक्तं भगवता महाभाष्यकृता—'न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यम्' (३।१।१०९ तथा ८।२।१६) उभयत्रापि 'अवग्रहदोष' समाधानायेदमुक्तम् । तेन पदकारविहितादवग्रहादन्यत्रापि लक्षणानुसारं प्राप्नुवन्नवग्रहो न दोषावह इति सूच्यते ।

स्वराडितिस्व राट् । असि । सपत्नहेतिसपत्न हा । सत्त्रराडितिसत्त्र राट् । अभिमातिहेत्त्यभिमाति हा । जनराडितिजन राट् । रक्क्षोहेतिरक्क्षः हा । सर्व्वराडितिसर्व्व राट् । अमित्रहेत्त्यमित्र हा ॥२४॥

रक्क्षोहणः । रक्क्षोहनऽइतिरक्क्षः हनः । व्वः । व्वलगहनऽइतिवलग हनः । प्र । उक्क्षामि । व्वैष्णवान् । अव । नयामि । अव । स्तृणामि । रक्क्षोहणौ । रक्क्षोहनावितिरक्क्षः हनौ । वाम् । व्वलगहनावितिवलग हनौ । उप । दधामि । व्वैष्णवीऽइतिवैष्णवी । परि । ऊहामि । व्वैष्णवीऽइतिवैष्णवी । व्वैष्णवम् । असि । व्वैष्णवाः । स्थ ॥२५॥

यवः । असि । यवय । अस्मत् । द्वेषः । यवय । अरातीः । दिवे । त्वा । अन्तरिक्क्षाय । पृथिव्यै ।

सपत्नहेतिसपत्न हा । सत्रराडितिसत्र राट् । अभिमातिहेत्यभिमाति हा । रक्षोहेतिरक्षः हा । अमित्रहेत्यमित्र हा ॥२४॥

रक्षोहणः । रक्षोहनऽइतिरक्षः हनः । उक्षामि । वैष्णवान् । रक्षोहणौ । रक्षोहनावितिरक्षः हनौ । व्वैष्णवीऽइतिवैष्णवी । व्वैष्णवीऽइति-वैष्णवी । व्वैष्णवम् । व्वैष्णवाः ॥२५॥

अस्मत् । अन्तरिक्षाय । पृथिव्यै ॥२६॥

---

[२]व्वः । व्वलगहनऽइतिवलग हनः । नयामि । वाम् । व्वलगहना-वितिवलग हनौ ॥२५॥

य्यवः । य्यवय । य्यवय । अन्तरिक्षाय ॥२६॥

---

१. अत्र ६७ पृष्ठाङ्किता २३ मन्त्रस्था द्वितीया टिप्पणी द्रष्टव्या ।

२. कपाठशैल्यनुसारमिह ‘वः’ इति शुद्धः पाठो ज्ञेयः ।

शुन्धन्ताम् । लोकाः । पितृषदनाः । पितृसदनाऽइतिपितृ सदनाः । पितृषदनम् । पितृसदनमितिपितृ सदनम् । असि ॥२६॥

उत् । दिवम् । स्तभान । आ । अन्तरिक्क्षम् । पृण । दृꣳहस्व । पृथिव्याम् । द्युतानः । त्वा । मारुतः । मिनोतु । मित्रावरुणौ । ध्रुवेण । धर्म्मणा ॥ ब्रह्मवनीतिब्रह्म वनि । त्वा । क्षत्रवनीतिक्क्षत्र वनि । रायस्पोषवनीतिरायस्पोष वनि । परि । ऊहामि ॥ ब्रह्म । दृꣳह । क्षत्रम् । आयुः । प्रजामितिप्र जाम् ॥२७॥

ध्रुवा । असि । ध्रुवः । अयम् । यजमानः । अस्मिन् । आयतनऽइत्या यतने । प्रजयेतिप्र जया । पशुभिरितिपशु भिः । भूयात् ॥ घृतेन । द्यावापृथिवीऽइतिद्यावापृथिवी । पूर्य्येथाम् । इन्द्रस्य । छदिः । असि । विश्वजनस्येतिविश्व जनस्य । छाया ॥२८॥

अन्तरिक्षम् । पृथिव्याम् । मित्रावरुणौ । ब्रह्मवनीतिब्रह्म वनि । क्षत्रवनीतिक्षत्र वनि । रायस्पोषवनीतिरायस्पोष वनि । ब्रह्म । क्षत्रम् । प्रजामितिप्र जाम् ॥२७॥

अस्मिन् । आयतनऽइत्या यतने । प्रजयेतिप्र जया । द्यावापृथिवीऽइतिद्यावापृथिवी । विश्वजनस्येतिविश्व जनस्य ॥२८॥

रायस्पोषवनीतिरायस्पोष वनि ॥२७॥

अयम् । य्यजमानः । आयतनइत्या [1]य्यतने । प्रजयेतिप्र जया । भूयात् । विश्वजनस्येतिविश्व जनस्य । छाया ॥२८॥

---

१. 'यतने' इति शुद्धः पाठो ज्ञेयः ।

परि । त्वा । गिर्वणः । गिरः । इमाः । भवन्तु । विश्वतः । वृद्धायुमितिवृद्ध आयुम् । अनु । वृद्धयः । जुष्टाः । भवन्तु । जुष्टयः ॥२९॥

इन्द्रस्य । स्यूः । असि । ध्रुवः । ऐन्द्रम् । वैश्वदेवमितिवैश्व देवम् ॥३०॥

विभूरितिवि भूः । असि । प्रवाहणः । प्रवाहन इतिप्र वाहनः । वह्निः । हव्यवाहन इतिहव्य वाहनः । श्वात्रः । प्रचेता इतिप्र चेताः । तुथः । विश्ववेदा इतिविश्व वेदाः ॥३१॥

उशिक् । कविः । अङ्घारिः । बम्भारिः । अवस्यूः । दुवस्वान् । शुन्ध्यूः । मार्जालीयः । सम्म्राडितिसम् राट् ।

विश्वतः । वृद्धायुमितिवृद्ध आयुम् । वृद्धयः । जुष्टाः । जुष्टयः ॥२९॥

वैश्वदेवमितिवैश्व देवम् ॥३०॥

प्रवाहन इतिप्र वाहनः । वह्निः । हव्यवाहन इतिहव्य वाहनः । श्वात्रः । प्रचेता इतिप्र चेताः । विश्ववेदा इतिविश्व वेदाः ॥३१॥

सम्राडितिसम् राट् । परिषद्यः । परिसद्य इतिपरि सद्यः ।

वृद्धायुमितिवृद्ध आयुम् । [1]वृद्धयः । जुष्टयः ॥२९॥

वैश्वदेवमितिवैश्व देवम् ॥३०॥

विभूरसि । विभूरितिवि भूः । प्रवाहन इतिप्र वाहनः । हव्यवाहन इतिहव्य वाहनः । विश्ववेदा इतिविश्व वेदाः ॥३१॥

[2]सम्राडितिसम् राट् ॥३२॥

---

१. ऋकारपरो वकारोऽस्मिन् पाठे न गुरुर्भवति ।

२. 'सम्म्राडितिसम् राट्' इति पूर्वत्र (अ० ३।३८) पाठः ।

कृशानुः । परिषद्यः । परिसद्यऽइतिपरि सद्यः । पवमानः । नभः । प्रतक्केतिप्र तक्का । मृष्टः । हव्यसूदनऽइतिहव्य सूदनः । ऋतधामेत्यृत धामा । स्वर्ज्योतिरितिस्वः ज्योतिः ॥३२॥

समुद्रः । विश्वव्यचाऽइतिविश्व व्यचाः । अजः । एकपादित्येक पात् । अहिः । बुध्न्यः । वाक् । ऐन्द्रम् । सदः । ऋतस्य । द्वारौ । मा । मा । सम् । ताप्तम् । अर्ध्वनाम् । अध्वपतऽइत्यध्व पते । प्र । मा । तिर । स्वस्ति । मे । अस्मिन् । पथि । देवयानऽइतिदेव यानेे । भूयात् ॥३३॥

मित्त्रस्य । मा । चक्क्षुषा । ईक्क्षध्वम् । अग्ग्नयः । सगराः । सगराः । स्थ । सगरेण । नाम्ना । रौद्रेण । अनीकेन । पात । मा । अग्ग्नयः । पिपृत । गोपायत । नमः । वः । अस्तु । मा । मा । हिꣳसिष्ट ॥३४॥

प्रतक्केतिप्र तक्का । मृष्टः । हव्यसूदनऽइतिहव्य सूदनः । ऋतधामेत्यृत धामा ॥३२॥

समुद्रः । विश्वव्यचाऽइतिविश्व व्यचाः । एकपादित्येक पात् । बुध्न्यः । ताप्तम् । अध्वनाम् । अध्वपतऽइत्यध्व पते । स्वस्ति । अस्मिन् ॥३३॥

मित्रस्य । चक्षुषा । ईक्षध्वम् । अग्नयः । नाम्ना । रौद्रेण । अग्नयः । अस्तु । हिꣳसिष्ट ॥३४॥

देवयानऽइतिदेव [1]यानेे । भूयात् ॥३३॥

अग्नयः । अग्नयः । अग्नयः । गोपायत । वः ॥३४॥

---

१. 'यानेे' इति शुद्धः पाठो ज्ञेयः ।

ज्योतिः । असि । विश्वरूपमितिविश्व रूपम् । विश्वेषाम् । देवानाम् । समिदितिसम् इत् ॥ त्वम् । सोम । तनूकृद्भ्यऽइतितनूकृत् भ्यः । द्वेषोभ्यऽइतिद्वेषः भ्यः । अन्यकृतेभ्यऽइत्यन्य कृतेभ्यः । उरु । यन्ता । असि । वरूथम् । स्वाहा । जुषाणः । अप्तुः । आज्यस्य । वेतु । स्वाहा ॥३५॥

अग्ने । नय । सुपथेतिसु पथा । राये । अस्मान् । विश्वानि । देव । वयुनानि । विद्वान् ॥ युयोधि । अस्मत् । जुहुराणम् । एनः । भूयिष्ठाम् । ते । नमऽउक्तिमितिनमः उक्तिम् । विधेम ॥३६॥

अयम् । नः । अग्निः । वरिवः । कृणोतु । अयम् । मृधः । पुरः । एतु । प्रभिन्दन्निति प्र भिन्दन् ॥ अयम् ।

विश्वरूपमितिविश्व रूपम् । विश्वेषाम् । तनूकृद्भ्यऽइतितनूकृत् भ्यः । द्वेषोभ्यऽइतिद्वेषः भ्यः । अन्यकृतेभ्यऽइत्यन्य कृतेभ्यः । अप्तुः । आज्यस्य ॥३५॥

अग्ने । अस्मान् । विश्वानि । अस्मत् । भूयिष्ठाम् । नमऽउक्तिमितिनमः उक्तिम् ॥३६॥

अग्निः । प्रभिन्दन्नितिप्र भिन्दन् । शत्रून् ॥३७॥

---

[1]ज्योतिः । विश्वरूपमितिविश्व रूपम् । यन्ता ॥३५॥

नय । राये । वयुनानि । [2]युयोधि । भूयिष्ठाम् [3]नमः उक्तिमितिनमः उक्तिम् ॥३६॥

अयम् । अयम् । अयम् । जयतु । वाजसाताविति वाज सातौ ।

---

१. जकारोच्चारणजोऽपपाठः ।

२. अपपाठोऽयम् । ककोशेऽस्य मन्त्रस्य पुनः पाठे (अ० ७ मं० ४३) 'युयोधि' इति शुद्धः पाठो दृश्यते ।

३. अपपाठोऽयम् । अ० ७ मं० ४३ इत्यत्रापीत्थमेवापपाठः ।

वाजान् । जयतु । वाजसाताविति वाज सातौ । अयम् । शत्रून् । जयतु । जर्हृषाणः । स्वाहा ॥३७॥

उरु । विष्णोऽइतिविष्णो । वि । क्रमस्व । उरु । क्षयाय । नः । कृधि । घृतम् । घृतयोनऽइतिघृत योने । पिब । प्रप्रेतिप्र प्र । यज्ञपतिमितियज्ञ पतिम् । तिर । स्वाहा ॥३८॥

देव । सवितः । एषः । ते । सोमः । तम् । रक्षस्व । मा । त्वा । दभन् ॥ एतत् । त्वम् । देव । सोम । देवः । देवान् । उप । अगाः । इदम् । अहम् । मनुष्यान् । सह । रायः । पोषेण । स्वाहा । निः । वरुणस्य । पाशात् । मुच्ये ॥ अभूत् । यथायथमितियथा यथम् । अमंस्त ॥३९॥

विष्णोऽइतिविष्णो । प्रप्रेतिप्र प्र । यज्ञपतिमितियज्ञ पतिम् ॥३८॥

रक्षस्व । मनुष्यान् । मुच्ये ॥३९॥

अयम् । जयतु ॥३७॥

विष्णोऽइतिविष्णो । क्षयाय । घृतयोनऽइतिघृत योने । [1]यज्ञ-पतिमितियज्ञ पतिम् ॥३८॥

छन्दसम् । त्रिस्तुप्छन्दसमितित्रिस्तुप् छन्दसम् । विश्वेभ्यः । देवेभ्यः । अनुष्टुप् । अनुस्तुबित्यनु स्तुप् । अभिगरऽइत्यभि गरः ॥४१॥

पत्मन् । शुक्रम् । शुक्रे । अह्नः । रश्मिषु ॥४२॥

शुक्रः । शुक्रस्य । गृह्णामि ॥४३॥

अस्मत्सखेत्यस्मत् सखा ॥४४॥

सूर्यस्य ॥४२॥

[1]वुशी ॥४४॥

---

१. अपपाठोऽयम्, 'व्रुशी' इत्येवं शुद्धः पाठो ज्ञेयः ।

इह । रतिः । रमद्ध्वम् । धृतिः । स्वधृतिरितिस्व धृतिः । स्वाहा ॥ उपसृजन्नित्त्युप सृजन् । धरुणम् । मात्त्रे । धरुणः । मातरम् । धयन् ॥ रायः । पोषम् । अस्म्मासु । दीधरत् । स्वाहा ॥४५॥

सत्त्रस्य । ऋद्धिः । असि । अगन्म । ज्योतिः । अमृताः । अभूम ॥ दिवम् । पृथिव्याः । अधि । आ । अरुहाम । अविदाम । देवान् । स्वः । ज्योतिः ॥४६॥

युवम् । तम् । इन्द्रापर्व्वता । पुरोयुधेतिपुरः युधा । यः । नः । पृतन्यात् । अप । तन्तमितितम् तम् । इत् । हतम् । वज्रेण । तन्तमितितम् तम् । इत् । हतम् ॥ दूरे । चत्ताय । छन्त्सत् । गहनम् । यत् । इनक्क्षत् ॥ अस्म्माकम् । शत्त्रून् । परि । शूर । विश्श्वतः । दर्म्मा । दर्षीष्ट !

रमध्वम् । उपसृजन्नित्युप सृजन् । मात्रे । अस्मासु ॥४५॥

सत्रस्य । अगन्म । पृथिव्याः ॥४६॥

पृतन्यात् । इनक्षत् ॥ अस्माकम् । शत्रून् । विश्वतः । दर्षीष्ट ।

[1]उपसृजमित्त्युप सृजान् । [2]धरुणं । धयन् । रायः ॥४५॥

[3]अ । [3]विदाम ॥४६॥

य्युवम् । पुरोयुधेतिपुरः [4][युधा] । य्यः । चत्ताय । य्यत् । सुवीरा-

१. अपपाठोऽयम्, 'उपसृजन्नित्युप सृजन्' इति शुद्धः पाठो ज्ञेयः ।

२. अपपाठोऽयम्, 'धरुणः' इति शुद्धः पाठः ।

३. अपपाठोऽयम्, 'अविदाम' इत्येवं शुद्धः पाठो ज्ञेयः ।

४. कोष्ठान्तर्गतः पाठो लेखकप्रमादान्नष्टः ।

व्रिश्वतं॑ः ॥ स्याम । सुवीरा॒ऽइति॑सु वीरा॑ः । व्रीरैः । सुपोषा॒ऽइति॑सु पोषा॑ः । पोषैः ॥४७॥

परमेष्ठी । परमेस्थीति॑परमे स्थी । अभिधीत॒ऽइत्यभि धीत॑ः । प्रजाप॑तिरिति॑प्रजा प॑तिः । वाचि । व्याहृ॑तायामिति॑वि आहृ॑तायाम् । अन्ध॑ः । अच्छैत॒ऽइत्यच्छ इत॑ः । सविता । सन्याम् । विश्वकर्म्मेति॑विश्व कर्म्मा । दीक्षायाम् । पूषा । सोमक्रय॑ण्यामिति॑सोम क्रय॑ण्याम् ॥४८॥

इन्द्र॑ः । च । मरुत॑ः । च । क्रयाय॑ । उपोत्थित॒ऽइत्युप उत्थित॑ः । असुर॑ः । पण्यमान॑ः । मित्रः । क्रीतः । विष्णु॑ः । शिपिविष्ट॒ऽइति॑शिपि विष्टः । ऊरौ । आसन्न॒ऽइत्या सन्न॑ः । विष्णु॑ः । नरन्धिष॑ः ॥४९॥

व्रिश्वतं॑ः ॥४७॥

परमेष्ठी । परमेस्थीति॑परमे स्थी । अभिधीत॒ऽइत्यभि धीत॑ः । प्रजाप॑तिरिति॑प्रजा प॑तिः । अछैत॒ऽइत्यछ इत॑ः । सन्याम् । विश्वकर्म्मेति॑विश्व कर्म्मा । दीक्षायाम् । सोमक्रय॑ण्यामिति॑सोम क्रय॑ण्याम् ॥४८॥

उपोत्थित॒ऽइत्युप उत्थित॑ः । पण्यमान॑ः । मित्र? । विष्णु॑ः । शिपिविष्ट॒ऽइति॑शिपि विष्ट? । आसन्न॒ऽइत्या सन्न॑ः । विष्णु॑ः ॥४९॥

ऽइति॑सु वीरा॑ः ॥४७॥

व्याहृ॑ताय्यामिति॑वि[1] आहृ॑ताय्याम् । विश्वकर्म्मेति॑विश्व कर्म्मा । दीक्षाय्याम् । सोमक्रय्य॑ण्यामिति॑सोम क्रय्य॑ण्याम् ॥४८॥

क्रय्याय॑ । शिविविष्ट॒ऽइति॑शिपि विष्ट? । [2]उरौ ॥४९॥

---

१. ककोशशैल्यनुसारम् इह 'वि' इत्येवं पाठेन भाव्यम् ।

२. क्वचिदन्यत्रापि अयमेव पाठ उपलभ्यते ।

प्रोह्यमाणꣳ । प्रोह्यमानऽइतिप्र उह्यमानꣳ । सोमः । आगतऽइत्या गतꣳ । वरुणꣳ । आसन्द्यामित्या सन्द्याम् । आसन्नऽइत्या सन्नꣳ । अग्निः । आग्नीध्रे । इन्द्रः । हविर्द्धानऽइतिहविः धाने । अथर्वा । उपावह्रियमाणऽइत्युप [1]अवह्रियमाणꣳ ॥५०॥

विश्वे । देवाः । अꣳशुषु । न्युप्तऽइतिनि उप्तꣳ । विष्णुः । आप्रीतपाऽइत्याप्रीत पाः । आप्याय्यमानऽइत्या प्याय्यमानꣳ । यमः । सूयमानꣳ । विष्णुः । सम्भ्रियमाणऽइतिसम् भ्रियमाणꣳ । वायुः । पूयमानꣳ । शुक्रः । पूतः । शुक्रः । क्षीरश्रीरितिक्षीर श्रीः । मन्थी । सक्तुश्रीरितिसक्तु श्रीः ॥५१॥

विश्वे । देवाः । चमसेषु । उन्नीतऽइत्युत् नीतꣳ ।

प्रोह्यमाणꣳ । प्रोह्यमानऽइतिप्र उह्यमानꣳ । आगतऽइत्या गतꣳ । आसन्द्यामित्या सन्द्याम् । आसन्नऽइत्या सन्नꣳ । अग्निः । आग्नीध्रे । उपावह्रियमाणऽइत्युप अवह्रियमाणꣳ ॥५०॥

विश्वे । न्युप्तऽइतिनि उप्तꣳ । विष्णुः । आप्रीतपाऽइत्याप्रीत पाः । आप्याय्यमानऽइत्या प्याय्यमानꣳ । विष्णुः । शुक्रः । शुक्रः । क्षीरश्रीरितिक्षीर श्रीः । सक्तुश्रीरितिसक्तु श्रीः ॥५१॥

विश्वे । उन्नीतऽइत्युत् नीतꣳ । उद्यतऽइत्युत् यतꣳ । रुद्रः ।

प्रोह्यमाणꣳ । उपावह्रियमाणऽइत्युप अवह्रियमाणꣳ ॥५०॥

आप्याय्यमानऽइत्या प्याय्यमानꣳ । यमः । सूयमानꣳ । सम्भ्रियमाणऽइतिसम् भ्रियमाणꣳ । वायुः । पूयमानꣳ ॥५१॥

---

१. 'अवह्रियमाणꣳ' इति काशिकः पाठः ।

असु॑ः । होमा॑य । उद्य॑त॒ऽइत्यु॑त् य॑तꣳ । रु॒द्रः॑ । हू॒यमा॑नꣳ । वात॑ः । अ॒भ्यावृ॑त्त॒ऽइत्य॑भि आवृ॑त्तꣳ । नृ॒चक्ष॒ऽइति॑नृ चक्षा॑ꣳ । प्रति॑ख्यात॒ऽइति॒प्रति॑ ख्यातꣳ । भ॒क्षः॑ । भ॒क्ष्यमा॑णꣳ । पि॒तर॑ः । ना॒रा॒श॒ꣳसः ॥५२॥

स॒न्नः । सिन्धु॑ः । अ॒व॒भृ॒थायेत्य॑व भृ॒थाय॑ । उद्य॑त॒ऽइत्यु॑त् य॑तꣳ । स॒मु॒द्रः । अ॒भ्य॒व॒ह्रि॒यमा॑ण॒ऽइत्य॑भि अ॒व॒ह्रि॒यमा॑णꣳ । स॒लि॒लः । प्रप्लु॑त॒ऽइति॒प्र प्लु॑तꣳ । य॒योः । ओज॑सा । स्क॒भि॒ता । रजा॑ꣳसि । वी॒र्ये॑भिः । वी॒रत॒मेति॑वी॒र त॑मा । शवि॑ष्ठा । या । पत्ये॑ते॒ऽइति॒पत्ये॑ते । अप्र॑ती॒तेत्यप्र॑ति इता । सहो॑भि॒रिति॒सहः॑ भिः । विष्णू॒ऽइति॒विष्णू॑ । अ॒ग॒न् । वरु॑णा । पू॒र्वहू॑ता॒विति॑पू॒र्व हू॑तौ ॥५३॥

अ॒भ्यावृ॑त्त॒ऽइत्य॑भि आवृ॑त्तꣳ । नृ॒चक्षा॒ऽइति॑नृ चक्षा॑ꣳ । प्रति॑ख्यात॒ऽइति॒प्रति॑ ख्यातꣳ । भ॒क्षः । भ॒क्ष्यमा॑णꣳ ॥५२॥

अ॒व॒भृ॒थायेत्य॑व भृ॒थाय॑ । उद्य॑त॒ऽइत्यु॑त् य॑तꣳ । स॒मु॒द्रः । अ॒भ्य॒व॒ह्रि॒यमा॑ण॒ऽइत्य॑भि अ॒व॒ह्रि॒यमा॑णꣳ । प्रप्लु॑त॒ऽइति॒प्र प्लु॑तꣳ । शवि॑ष्ठा । पत्ये॑ते॒ऽइति॒पत्ये॑ते । अप्र॑ती॒तेत्यप्र॑ति इता । विष्णू॒ऽइति॒विष्णू॑ ॥५३॥

हो॒माय॑ । उद्य॑त॒ऽइत्यु॑त् [2]य्य॑तꣳ । हू॒य्यमा॑नꣳ ॥५२॥

स॒न्नः । अ॒व॒भृ॒थाय्येत्य॑व भृ॒थाय्य॑ । उद्य॑त॒ऽइत्यु॑त् [2]य्य॑तꣳ । अ॒भ्य॒व॒ह्रि॒य्यमा॑ण॒ऽइत्य॑भि अ॒व॒ह्रि॒य्यमा॑णꣳ । य्यय्योः । वी॒रत॒मेति॑वी॒र त॑मा । य्या ॥५३॥

---

१. 'अवह्रियमा॑णꣳ' इति काशिकः पाठः ।

२. ककोशशैल्यनुसारमिह 'य्य' इत्येवं शुद्धः पाठो ज्ञेयः ।

देवान् । दिवम् । अगन् । यज्ञः । ततः । मा । द्रविणम् । अष्टु । मनुष्यान् । अन्तरिक्षम् । पितॄन् । पृथिवीम् । यम् । कम् । च । लोकम् । अगन् । यज्ञः । ततः । मे । भद्रम् । अभूत् ॥५४॥

चतुस्त्रिंशदितिचतुः त्रिंशत् । तन्तवः । ये । वितत्निरइतिवि [1]तत्निरे । ये । इमम् । यज्ञम् । स्वधया । ददन्ते ॥ तेषाम् । छिन्नम् । सम् । ॐऽइत्यूँ । एतत् । दधामि । स्वाहा । घर्म्मः । अपि । एतु । देवान् ॥५५॥

यज्ञस्य । दोहः । विततऽइतिवि ततः । पुरुत्रेतिपुरु त्रा । सः । अष्टधा । दिवम् । अन्वाततानेत्यनु आततान ॥ सः । यज्ञ । धुक्ष्व । महि । मे । प्रजायामितिप्र

यज्ञः । अष्टु । मनुष्यान् । अन्तरिक्षम् । यज्ञः । भद्रम् ॥५४॥

चतुस्त्रिंशदितिचतुः त्रिंशत् । वितत्निरऽइतिवि तत्निरे । यज्ञम् । ॐऽइत्यूँ ॥५५॥

यज्ञस्य । पुरुत्रेतिपुरु त्रा । अष्टधा । अन्वाततानेत्यनु आततान । यज्ञ ।

य्यज्ञः । य्यम् । य्यज्ञः ॥५४॥

य्ये । वितत्निरऽइतिवि[2] तत्निरे । य्ये । य्यज्ञम् । स्वधया । [3]उंऽइत्युम् ॥५५॥

य्यज्ञस्य । विततऽइतिवि ततः । य्यज्ञ । प्रजाय्यामितिप्र जाय्याम् ।

---

१. 'तत्निरे' इति काशिकः पाठः ।

२. ककोशपाठशैल्यनुसारमिह 'व्वि' इति द्विर्वकारेण भाव्यम् ।

३. अपपाठोऽयम् ।

जायाम् । रायः । पोषम् । विश्वम् । आयुः । अशीय । स्वाहा ॥५६॥

आ । पवस्व । हिरण्यवदितिहिरण्य वत् । अश्ववदित्यश्व वत् । सोम । वीरवदितिवीर वत् ॥ वाजम् । गोमन्तमितिगो मन्तम् । आ । भर । स्वाहा ॥५७॥

॥ इति वाजसनेयिसंहितापदेऽष्टमोऽध्यायः ॥

धुक्ष्व । प्रजायामितिप्र जायाम् । विश्वम् ॥५६॥

हिरण्यवदितिहिरण्य वत् । अश्ववदित्यश्व वत् ॥५७॥

रायः । आयुः । अशीय ॥५६॥

हिरण्यवदितिहिरण्य वत् । अश्ववदित्यश्व वत् । वीरवदितिवीर वत् ॥५७॥

॥ इति श्री वाजसनेयिसंहितापदेऽष्टमोऽध्यायः ॥

नवमोऽध्यायः

देव । सवितरितिसवितः । प्र । सुव । यज्ञम् । प्र । सुव । यज्ञपतिमितियज्ञ पतिम् । भगाय ॥ दिव्यः । गन्धर्वः । केतपूरितिकेत पूः । केतम् । नः । पुनातु । वाचः । पतिः । वाजम् । नः । स्वदतु । स्वाहा ॥१॥

ध्रुवसदमितिध्रुव सदम् । त्वा । नृषदम् । नृसदमितिनृ सदम् । मनःसदमितिमनः सदम् । इन्द्राय । त्वा । जुष्टम् । गृह्णामि । जुष्टतममितिजुष्ट तमम् ॥ अप्सुषदम् । अप्सुसदमित्यप्सु सदम् । घृतसदमितिघृत सदम् । व्योमसदमितिव्योम सदम् ॥ पृथिविसदमितिपृथिवि सदम् । अन्तरिक्षसदमित्यन्तरिक्ष सदम् । दिविसदमितिदिवि सदम् । देवसदमितिदेव सदम् । नाकसदमितिनाक सदम् ॥२॥

यज्ञम् । यज्ञपतिमितियज्ञ पतिम् । दिव्यः ॥१॥

ध्रुवसदमितिध्रुव सदम् । जुष्टम् । गृह्णामि । जुष्टतममितिजुष्ट तमम् । अप्सुषदम् । अप्सुसदमित्यप्सु सदम् । अन्तरिक्षसदमित्यन्तरिक्ष सदम् ॥२॥

य्यज्ञम् । य्यज्ञपतिमितिय्यज्ञ पतिम् । भगाय ॥१॥

इन्द्राय । व्योमसदमितिव्योम सदम् ॥२॥

अपाम् । रसम् । उद्द्वयसमित्युत् वयसम् । सूर्ये । सन्तम् । समाहितमितिसम् आहितम् ॥ अपाम् । रसस्य । यः । रसः । तम् । वः । गृह्णामि । उत्तममित्युत् तमम् ॥३॥

ग्रहाः । ऊर्ज्जाहुतयऽइत्यूर्ज्जा आहुतयः । इयन्तः । विप्राय । मतिम् ॥ तेषाम् । विशिप्रियाणामितिवि शिप्रियाणाम् । वः । अहम् । इषम् । ऊर्ज्जम् । सम् । अग्रभम् ॥ सम्पृचावितिसम् पृचौ । स्थः । सम् । मा । भद्रेण । पृङ्क्तम् । विपृचावितिवि पृचौ । स्थः । वि । मा । पाप्मना । पृङ्क्तम् ॥४॥

इन्द्रस्य । वज्रः । असि । वाजसाऽइतिवाज साः । त्वया । अयम् । वाजम् । सेत् ॥ वाजस्य । नु । प्रसवऽइतिप्र

उद्वयसमित्युत् वयसम् । गृह्णामि । उत्तममित्युत् तमम् ॥३॥

विप्राय । विशिप्रियाणामितिवि शिप्रियाणाम् । अग्रभम् । भद्रेण । पृङ्क्तम् । पाप्मना । पृङ्क्तम् ॥४॥

वज्रः । प्रसवऽइतिप्र सवे । विश्वम् । आविवेशेत्या

उद्वयसमित्युत् वयसम् । सूर्ये । यः । [1]वः ॥३॥

ऊर्ज्जाहुतयऽइत्यूर्ज्जा आहुतयः । विप्राय । [2]विशिप्रियाणामितिवि[3] शिप्रियाणाम् । वः[1] ॥४॥

वाजसाऽइतिवाज साः । त्वया । अयम् । [4]अनु । यस्याम् ।

---

१. ककोशशैल्यनुसारम् 'वः' इत्येवं पाठेन भाव्यम् ।

२. 'वि' इति शुद्धः पाठो ज्ञेयः ।

३. ककोशशैल्यनुसारमितिपदात् परं 'वि' इत्येवं द्विर्वकारेण भाव्यम् ।

४. 'नु' इति शुद्धः पाठः, मन्त्रे तथा दर्शनात् ।

सवे । मातरम् । महीम् । अदितिम् । नाम वचसा । करामहे ॥
यस्याम् । इदम् । विश्वम् । भुवनम् । आविवेशेत्याविवेश ।
तस्याम् । नः । देवः । सविता । धर्म्म । साविषत् ॥५॥

अप्स्वित्यप्सु । अन्तः । अमृतम् । अप्स्वित्यप्सु । भेषजम् । अपाम् । उत । प्रशस्तिष्विति प्रशस्तिषु । अश्वाः । भवत । वाजिनः ॥ देवीः । आपः । यः । वः । ऊर्म्मिः । प्रतूर्त्तिरिति प्रतूर्त्तिः । ककुन्मानिति ककुत्मान् । वाजसा इति वाजसाः । तेन । अयम् । वाजम् । सेत् ॥६॥

वातः । वा । मनः । वा । गन्धर्वाः । सप्तविंशतिरिति सप्तविंशतिः ॥ ते । अग्रे । अश्वम् । अयुञ्जन् । ते । अस्मिन् । जवम् । आ । अदधुः ॥७॥

वातरंहा इति वातरंहाः । भव । वाजिन् । युज्यमानः । इन्द्रस्येवेतीन्द्रस्य इव । दक्षिणः । श्रिया ।

विवेश ॥५॥

अप्स्वित्यप् सु । अप्स्वित्यप् सु । प्रशस्तिष्विति प्र शस्तिषु । अश्वाः । प्रतूर्त्तिरिति प्र तूर्त्तिः । ककुन्मानिति ककुत् मान् ॥६॥

सप्तविंशतिरिति सप्त विंशतिः । अग्रे । अश्वम् । अस्मिन् ॥७॥

युज्यमानः । दक्षिणः । विश्ववेदस इति विश्व वेदसः । त्वष्टा ।

आविवेशेत्या विवेश ॥५॥

अप्स्वित्यप् सु । यः । वः । वाजसा इति वाज साः । अश्वम् ॥६॥

वा । वा । अयुञ्जन् ॥७॥

युज्यमानः । श्रिया । युञ्जन्तु । विश्ववेदस इति विश्व वेदसः ।

एधि । युञ्जन्तु । त्वा । मरुतः । विश्ववेदसऽइतिविश्व वेदसः । आ । ते । त्वष्टा । पत्स्वितिपत् सु । जवम् दधातु ॥८॥

जवः । यः । ते । वाजिन् । निहितऽइतिनि हितः । गुहा । यः । श्येने । परीत्तः । अचरत् । च । वाते ॥ तेन । नः । वाजिन् । बलवानितिबल वान् । बलेन । वाजजिदितिवाज जित् । च । भव । समने । च । पार-यिष्णुः ॥ वाजिनः । वाजजितऽइतिवाज जितः । वाजम् । सरिष्यन्तः । बृहस्पतेः । भागम् । अव । जिघ्रत ॥९॥

देवस्य । अहम् । सवितुः । सवे । सत्त्यसवसऽइतिसत्त्य सवसः । बृहस्पतेः । उत्तममित्युत् तमम् । नाकम् । रुहेयम् ॥ इन्द्रस्य । सत्त्यप्प्रसवसऽइतिसत्त्य प्रसवसः । अरुहम् ॥१०॥

पत्स्वितिपत् सु ॥८॥

जवः । पारयिष्णुः । सरिष्यन्तः । बृहस्पतेः । जिघ्रत ॥९॥

सत्यसवसऽइतिसत्य सवसः । बृहस्पतेः । उत्तमामित्युत् तमम् । सत्यप्रसवसऽइतिसत्य प्रसवसः ॥१०॥

---

[1]पथ्स्वितिपत् सु ॥८॥

बलवानितिबल वान् । वाजजिदितिवाज जित् । पारयिष्णुः । वाजजितऽइतिवाज जितः ॥९॥

रुहेयम् ॥१०॥

---

१. द्र० पूर्वत्र पृष्ठ ४४ टि० २ ।

बृहस्प्पते । वाजम् । जय । बृहस्प्पतये । वाचम् । वदत । बृहस्प्पतिम् । वाजम् । जापयत ॥ इन्द्रं । इन्द्राय । इन्द्रम् ॥११॥

एषा । वं । सा । सत्त्या । सँव्वागितिसम् वाक् । अभूत् । यया । बृहस्प्पतिम् । वाजम् । अजीजपत । अजीजपत । बृहस्प्पतिम् । वाजम् । वनस्पतयं । वि । मुच्यद्धम् ॥ इन्द्रम् । वाजजितऽइतिवाज जितं÷ । वाजम् । जेषम् ॥ वाजिनं । वाजजितऽइतिवाज जितं । अद्ध्वनं । स्कब्भुवन्तं÷ । योजना । मिमानां । काष्ठाम् । गच्छत ॥१२॥

एष॒ । स्य॒ । वाजी । क्षिपणिम् । तुरण्यति । ग्रीवा-यांम् । बद्द्ध॒ । अपिकक्क्षऽइत्त्यपि कक्क्षे । आसनि ।

बृहस्पते । बृहस्पतये । बृहस्पतिम् ॥११॥

सत्या । बृहस्पतिम् । बृहस्पतिम् । वनस्पतयं । मुच्यध्वम् । अध्वनं । स्कम्नुवन्तं÷ । काष्ठाम् । गछत ॥१२॥

तुरण्यति । बद्ध॒ । अपिकक्षऽइत्यपि कक्षे । दधिक्राऽइतिदधि क्रा॒ ।

जय्य । बृहस्पतय्ये । जापय्यत । इन्द्राय्य ॥११॥

वं । [1]सम्वागितिसम् वाक् । यय्या । वनस्पतय्यं । [2]वाजजित-ऽइतिवाज जितं÷ । वाजम् । जेषम् । वाजिनं । वाजजितऽइतिवाज जितं । अध्वनं ॥१२॥

ग्रीवाय्याम् ॥१३॥

---

१. अपपाठोऽयम्, 'सँव्वागितिसम् वाक्' इति पाठो ज्ञेयः ।

२. इत आरभ्य आकण्डिकान्तो भागोऽन्यकोशेषु पूर्वकण्डिकायामेव पठ्यते । अतः ककोश एकस्याः कण्डिकासंख्याया भेदो जायते ।

क्रतुम् । दधिक्राऽइतिदधि क्राः । अनु । सꣳसनिष्यदत् । सꣳसनिस्यदादितिसम् सनिस्यदत् । पथाम् । अङ्क्षाꣳसि । अनु । आपनीफणादित्या पनीफणत् । स्वाहा ॥१३॥

उत । स्म । अस्य । द्रवतः । तुरण्यतः । पर्णम् । न । वेः । अनु । वाति । प्रगर्द्धिनऽइतिप्र गर्द्धिनः ॥ श्येनस्येवेतिश्येनस्य इव । ध्रजतः । अङ्कसम् । परि । दधिक्राव्णऽइतिदधि क्राव्णः । सह । ऊर्जा । तरित्रतः । स्वाहा ॥१४॥

शम् । नः । भवन्तु । वाजिनः । हवेषु । देवतातेति-देव ताता । मितद्रवऽइतिमित द्रवः । स्वर्काऽइतिसु अर्काः ॥ जम्भयन्तः । अहिम् । वृकम् । रक्षाꣳसि ॥ सनेमि । अस्मत् । युयवन् । अमीवाः ॥१५॥

सꣳसनिष्यदत् । अङ्क्षाꣳसि । आपनीफणदित्या पनीफणत् ॥१३॥

तुरण्यतः । पर्णम् । प्रगर्धिनऽइतिप्र गर्धिनः । श्येनस्येवेतिश्येनस्य इव । अङ्कसम् । दधिक्राव्णऽइतिदधि क्राव्णः । तरित्रतः ॥१४॥

मितद्रवऽइतिमित द्रवः । रक्षाꣳसि । अस्मत् ॥१५॥

---

[1]तुरण्यतः । [2]वेः । [3]वाति । प्रगर्द्धिनऽइतिप्र गर्द्धिनः ॥१४॥

[4]जम्भयन्तः । युयवन् ॥१५॥

---

१. अपपाठोऽयम्, रेफस्योपरि अनुस्वारो नेष्यते ।

२. 'वेः' इति शुद्धः पाठो ज्ञेयः ।

३. 'वाति' इति शुद्धः पाठो द्रष्टव्यः ।

४. अत्र 'जम्भयन्तः' इत्यस्य स्थाने 'जम्भयन्त' इत्येवं पाठेन भाव्यम् ।

ते । नः । अर्वन्तः । हवनश्श्रुतऽइतिहवन श्रुतः । हवम् । विश्वे । शृण्वन्तु । वाजिनः । मितद्रवऽइतिमित द्रवः । सहस्रसाऽइतिसहस्र साः । मेधसातेतिमेध साता । सनिष्यवः । महः । ये । धनम् । समिथेष्विति सम् इथेषु । जभ्रिरे ॥१६॥

वाजेवाजऽइतिवाजे वाजे । अवत । वाजिनः । नः । धनेषु । विप्राः । अमृताः । ऋतज्ज्ञाऽइत्यृत ज्ञाः ॥ अस्य । मद्ध्वः । पिबत । मादयद्ध्वम् । तृप्ताः । यात । पथिभिरितिपथि भिः । देवयानैरितिदेव यानैः ॥१७॥

आ । मा । वाजस्य । प्रसवऽइतिप्र सवः । जगम्यात् । आ । इमेऽइतीमे । द्यावापृथिवीऽइतिद्यावापृथिवी ।

हवनश्रुतऽइतिहवन श्रुतः । विश्वे । शृण्वन्तु । मितद्रवऽइतिमित द्रवः । सनिष्यवः । समिथेष्वितिसम् इथेषु । जभ्रिरे ॥१६॥

विप्राः । ऋतज्ञाऽइत्यृत ज्ञाः । मध्वः । मादयध्वम् । तृप्ताः ॥१७॥

प्रसवऽइतिप्र सवः । जगम्यात् । द्यावापृथिवीऽइतिद्यावापृथिवी ।

ग्ये ॥१६॥

वाजेवाजऽइतिवाजे [1]वाजे । [2]ऋतग्न्याऽइत्यृत [2]ग्न्याः । मादयध्वम् । ग्यात । [3]देवय्यानैरितिदेव [3]य्यानैः ॥१७॥

---

१. 'वाजे' इति शुद्धः पाठः कपाठानुसारम् ।

२. अपपाठोऽयमुच्चारणदोषजः ।

३. 'य्या' अपपाठोऽयम् 'या' इत्येवेष्यते ।

विश्वरूपेऽइतिविश्व रूपे ॥ आ । मा । गन्ताम् । [1]पितरा । [1]मातरा । च । आ । मा । सोमः । अमृतत्त्वेनेत्यमृत त्त्वेन । गम्म्यात् । ससुवाथंसऽइतिससुवाथंसः । निमृजाना-इतिनि [2]मृजानाः ॥१८॥

आपये । स्वाहा । स्वापयऽइतिसु आपये । अपिजाये-त्यपि जाय । क्रतवे । वसवे । अहर्प्पतये । अहःपतय-ऽइत्यहः पतये । अह्ने । मुग्ग्धाय । मुग्ग्धाय । वैनंशिनाय । विनंशिनऽइतिवि नंशिने । आन्त्यायनाये-त्यान्त्य [3]आयनाय । अन्त्याय । भौवनाय । भुवनस्य । पतये । [4]अधिपतयऽइत्यधि पतये ॥१९॥

विश्वरूपेऽइतिविश्व रूपे । अमृतत्वेनेत्यमृत त्वेन । गम्यात् ॥१८॥

अपिजायेत्यपि जाय । अहःपतयऽइत्यहः पतये । अह्ने । मुग्धाय । मुग्धाय । आन्त्यायनायेत्यान्त्य आयनाय । अधिपतयऽइत्यधि पतये ॥१९॥

विश्वरूपेऽइतिविश्व रूपे ॥१८॥

आपय्रे । स्वापय्रऽइतिसु आपय्रे । अपिजाय्रेत्यपि जाय्र । अहर्प्पतय्रे । अहःपतय्रऽइत्यहः पतय्रे । मुग्धाय्र । मुग्धाय्र । वैनंशिनाय्र । विनंशिनऽइतिवि नंशिने । आन्त्याय्रनायेत्यान्त्य आयनाय्र । अन्त्याय्र । भौवनाय्र । भौवनाय्र । पतय्रे । अधिपतय्रऽइत्यधि पतय्रे ॥१९॥

---

१. अत्राह नागेशः—'यद्यपि तैत्तिरीये माध्यन्दिनशाखायां च पितरे-त्यादिभिन्नपदत्वेन पदपाठे पठन्ति, तथापि शाखान्तरे ऐकपद्येन पाठो भाष्य-प्रामाण्याद् द्रष्टव्यः । यद्वा पदच्छेदपाठो भ्रान्त्येति बोध्यम्, तत्र तत्रावग्रहवत् । आधुनिकानां वा सम्प्रदायभ्रंश इति कल्प्यम् ।।' महाभाष्यप्रदीपोद्योते ६।३।३३ ।

२. मृजानाः' इति काशिकः पाठः ।

३. 'आयनाय' इति काशिकः पाठः ।

४. 'अधिपतयऽइत्यधि पतये' इति काशिकः पाठो मन्त्रस्वरविपरीतः ।

आयुः । यज्ञेन । कल्पताम् । प्राणः । चक्षुः । श्रोत्रम् । पृष्ठम् । यज्ञः । यज्ञेन । कल्पताम् । प्रजापतेरितिप्रजा पतेः । प्रजाऽइतिप्र जाः । अभूम । स्वः । देवाः । अगन्म । अमृताः । अभूम ॥२०॥

अस्मेऽइत्यस्मे । वः । अस्तु । इन्द्रियम् । अस्मेऽइत्यस्मे । नृम्णम् । उत । क्रतुः । अस्मेऽइत्यस्मे । वर्चांसि । सन्तु । वः ॥ नमः । मात्रे । पृथिव्यै । नमः । मात्रे । पृथिव्यै । इयम् । ते । राट् । यन्ता । असि । यमनः । ध्रुवः । धरुणः ॥ कृष्यै । त्वा । क्षेमाय । रय्यै । पोषाय ॥२१॥

वाजस्य । इमम् । प्रसवऽइतिप्र सवः । सुषुवे । सुसुवऽइतिसुसुवे । अग्रे । सोमम् । राजानम् । ओषधीषु । अप्स्वित्यप् सु ॥ ताः । अस्मभ्यम् । मधुमतीरितिमधु मतीः । भवन्तु । वयम् । राष्ट्रे । जागृयाम । पुरोहिताऽइतिपुरः हिताः । स्वाहा ॥२२॥

यज्ञेन । कल्पताम् । चक्षुः । श्रोत्रम् । पृष्ठम् । यज्ञः । यज्ञेन । कल्पताम् । प्रजापतेरितिप्रजा पतेः । प्रजाऽइतिप्र जाः । अगन्म ॥२०॥

अस्मेऽइत्यस्मे । अस्मेऽइत्यस्मे । नृम्णम् । अस्मेऽइत्यस्मे । मात्रे । पृथिव्यै । मात्रे । पृथिव्यै । कृष्यै ॥२१॥

प्रसवऽइतिप्र सवः । अग्रे । अप्स्वित्यप् सु ॥ अस्मभ्यम् । राष्ट्रे ॥२२॥

आयुः । य्यज्ञेन । य्यज्ञः । य्यज्ञेन ॥२०॥

वः । इन्द्रिय्यम् । वः । इय्यम् । य्यन्ता । य्यमनः । क्षेमाय्य । रय्यै । पोषाय्य ॥२१॥

व्वय्यम् । जागृय्याम ॥२२॥

वाजस्य । इमाम् । प्रसवऽइतिप्र सवः । शिश्रिये । दिवम् । इमा । च । विश्वा । भुवनानि । सम्म्राडितिसम् राट् ॥ अदित्सन्तम् । दापयति । प्रजानन्निति प्र जानन् । सः । नः । रयिम् । सर्ववीरमितिसर्व वीरम् । नि । यच्छतु । स्वाहा ॥२३॥

वाजस्य । नु । प्रसवऽइतिप्र सवः । आ । बभूव । इमा । च । विश्वा । भुवनानि । सर्वतः । सनेमि । राजा । परि । याति । विद्वान् । प्रजामितिप्र जाम् । पुष्टिम् । वर्द्धयमानः । अस्मेऽइत्यस्मे । स्वाहा ॥२४॥

सोमम् । राजानम् । अवसे । अग्निम् । अन्वारभामहऽइत्यनु आरभामहे ॥ आदित्यान् । विष्णुम् । सूर्यम् । ब्रह्माणम् । च । बृहस्पतिम् । स्वाहा ॥२५॥

प्रसवऽइतिप्र सव? । शिश्रिये । विश्वा । सम्राडितिसम् राट् । अदित्सन्तम् । प्रजानन्निति प्र जानन् । यच्छतु ॥२३॥

प्रसवऽइतिप्र सव? । विश्वा । विद्वान् । प्रजामितिप्र जाम् । पुष्टिम् । अस्मेऽइत्यस्मे ॥२४॥

अग्निम् । अन्वारभामहऽइत्यनु आरभामहे । आदित्यान् । विष्णुम् । ब्रह्माणम् । बृहस्पतिम् ॥२५॥

शिश्रिये । [1]सम्म्राडितिसम् राट् । दापयति । रयिम् । सर्ववीरमितिसर्व वीरम् । यच्छतु ॥२३॥

याति । वर्द्धयमानः ॥२४॥

सूर्य्यम् ॥२५॥

---

१. द्र० पूर्वत्र पृष्ठ ३७ टि० १ ।

अर्य्यमणम् । बृहस्प्पतिम् । इन्द्रम् । दानाय । चोदय ॥ वाचम् । विष्ण्णुम् । सरस्वतीम् । सवितारम् । च । वाजिनम् । स्वाहा ॥२६॥

अग्ने । अच्छ । वद । इह । नः । प्रति । नः । सुमनाऽइतिसु मनाः । भव ॥ प्र । नः । यच्छ । सहस्रजिदितिसहस्र जित् । त्वम् । हि । धनदाऽइतिधन दाः । असि । स्वाहा ॥२७॥

प्र । नः । यच्छतु । अर्य्यमा । पूषा । बृहस्प्पतिः ॥ वाक् । देवी । ददातु । नः । स्वाहा ॥२८॥

सरस्वत्यै । वाचः । यन्तुः । यन्त्रियें । दधामि । बृहस्प्पतेः । त्वा ! साम्म्राज्ज्येनेतिसाम् राज्ज्येन । अभि । सिञ्चामि । असौ ॥२९॥

बृहस्पतिम् । विष्णुम् ॥२६॥
अग्ने । अछ । यछ ॥२७॥
यछतु । बृहस्पतिः ॥२८॥
सरस्वत्यै । बृहस्पतेः । साम्राज्येनेतिसाम् राज्येन ॥२९॥

अर्य्यमणम् । दानाय । चोदय ॥२६॥
अग्ने । अछ । य्यछ ॥२७॥
य्यछतु । अर्य्यमा ॥२८॥
य्यन्तुः । य्यन्त्रियें । [1]साम्म्राज्येनेतिसाम् राज्येन ॥२९॥

---

१. द्र० पूर्वत्र पृष्ठ ३७ टि० १ ।

अग्निः । एकाक्क्षरेणेत्त्येकं अक्क्षरेण । प्राणम् । उत् । अजयत् । तम् । उत् । जेषम् । अश्श्विनौ । द्व्य्यक्क्षरेणेतिद्द्वि अक्क्षरेण । द्विपदऽइतिद्द्वि पदः । मनुष्ष्यान् । उत् । अजयताम् । तान् । विष्ष्णुः । त्र्यक्क्षरेणेतित्त्रि अक्क्षरेण । त्रीन् । लोकान् । सोमः । चतुरक्क्षरेणेतिचतुः अक्क्षरेण । चतुष्प्पदः । चतुःपदऽइतिचतुः पदः । पशून् ॥३०॥

पूषा । पञ्चाक्क्षरेणेतिपञ्च अक्क्षरेण । पञ्च । दिशः । ताः । सविता । षडक्क्षरेणेतिषट् अक्क्षरेण । षट् । ऋतून् । मरुतः । सप्ताक्क्षरेणेतिसप्त अक्षरेण । सप्त । ग्राम्म्यान् । अजयन् । बृहस्प्पतिः । अष्टाक्क्षरेणेत्त्यष्ट अक्क्षरेण । गायत्त्रीम् । ताम् ॥३१॥

मित्त्रः । नवाक्क्षरेणेतिनव अक्क्षरेण । त्रिवृतमितित्त्रि वृतम् । स्तोमम् । वरुणः । दशाक्क्षरेणेतिदश अक्क्षरेण ।

अग्निः । एकाक्षरेणेत्येकं अक्षरेण । अश्विनौ । द्व्यक्षरेणेतिद्वि अक्षरेण । द्विपदऽइतिद्वि पदः । मनुष्यान् । विष्णुः । त्र्यक्षरेणेतित्रि अक्षरेण । चतुरक्षरेणेतिचतुः अक्षरेण । चतुष्पदः ॥३०॥

पञ्चाक्षरेणेतिपञ्च अक्षरेण । षडक्षरेणेतिषट् अक्षरेण । सप्ताक्षरेणेति-सप्त अक्षरेण । सप्त । ग्राम्यान् । बृहस्पतिः । अष्टाक्षरेणेत्यष्ट अक्षरेण । गायत्रीम् ॥३१॥

मित्रः । नवाक्षरेणेतिनव अक्षरेण । त्रिवृतमितित्रि वृतम् । दशा-

---

अजयत । अजयताम् ॥३०॥

गायत्रीम् ॥३१॥

व्विराजमितिंवि राजम् । इन्द्रं॑ । एका॑दशाक्क्षरे॑णेत्त्येका॑दश अक्क्षरेण । त्रिष्टुभम् । त्रिस्तुभमितिंत्त्रि स्तुभम् । व्विश्श्वे॑ । देवाः॑ । द्वाद॑शाक्षरे॑णेतिद्द्वाद॑श अक्क्षरेण । जग॑तीम् ॥३२॥

व्वसंवः॑ । त्रयो॑दशाक्क्षरे॑णेतित्त्रयो॑दश अक्क्षरेण । त्रयोदशमितिंत्त्रयः॑ दशम् । रुद्राः॑ । चतु॑र्दशाक्क्षरे॑णेतिचतु॑र्दश अक्क्षरेण । चतुर्दशमितिंचतुः॑ दशम् । आदित्त्याः॑ । पञ्च॑-दशाक्क्षरे॑णेतिपञ्च॑दश अक्क्षरेण । पञ्चदशमितिंपञ्च दशम् । अदि॑तिः॑ । षोड॑शाक्क्षरे॑णेतिषोड॑श अक्क्षरेण । षोडशम् । प्रजाप॑तिरितिंप्प्रजा प॑तिः॑ । सप्तद॑शाक्क्षरे॑णेतिं-सप्तद॑श अक्क्षरेण । सप्तदशमितिंसप्त दशम् ॥३३॥

क्षरे॑णेतिदश॑ अक्षरेण । एका॑दशाक्षरे॑णेत्येका॑दश अक्षरेण । त्रिष्टुभम् । त्रिस्तुभ-मितिंत्रि स्तुभम् । व्विश्वे॑ । द्वाद॑शाक्षरे॑णेतिद्वाद॑श अक्षरेण ॥३२॥

त्रयो॑दशाक्षरे॑णेतित्रयो॑दश अक्षरेण । त्रयोदशमितिंत्रयः॑ दशम् । रुद्राः॑ । चतु॑र्दशाक्षरे॑णेतिचतु॑र्दश अक्षरेण । चतुर्दशमितिंचतुः॑ दशम् । आदित्याः॑ । पञ्च॑दशाक्षरे॑णेतिपञ्च॑दश अक्षरेण । पञ्चदशमितिंपञ्च दशम् । षोड॑शाक्षरे॑णेतिषोड॑श अक्षरेण । प्रजाप॑तिरितिंप्रजा प॑तिः॑ । सप्तद॑शाक्षरे॑णेतिं-सप्तद॑श अक्षरेण । सप्तदशमितिंसप्त दशम् ॥३३॥

व्विराजमितिंव्वि राजम् ॥३२॥

त्रयो॑दशाक्षरे॑णेति त्रयो॑दश अक्षरेण । त्रयोदशमितिंत्रयः॑ दशम् । [1]पञ्च॑दशमितिंपञ्च दशम् । [2]षोड॑शमितिंषोडशम् ॥३३॥

---

१. अपपाठोऽयम् ।

२. इतिना पुनरावृत्तिरन्यकोशेषु नोपलभ्यते, स्वरदोषश्चापि दृश्यते ।

एषः । ते । निर्ऋतऽइतिनिःऽऋते । भागः । तम् । जुषस्व । स्वाहा । अग्निनेत्त्रेभ्यऽइत्यग्नि नेत्त्रेभ्यः । देवेभ्यः । पुरःसद्भ्यऽइतिपुरःसत् भ्यः । स्वाहा ॥ य्यमनेत्त्रेभ्यऽइतिय्यम नेत्त्रेभ्यः । दक्क्षिणासद्भ्यऽइति-दक्क्षिणासत् भ्यः । विश्श्वदेवनेत्त्रेभ्यऽइतिविश्श्वदेव नेत्त्रे-भ्यः । पश्श्चात्त्सद्भ्यऽइतिपश्श्चात्त्सत् भ्यः । मित्त्रावरुण-नेत्त्रेभ्यऽइतिमित्त्रावरुण नेत्त्रेभ्यः । व्वा । मरुन्नेत्त्रेभ्य-ऽइतिमरुत् नेत्त्रेभ्यः । व्वा । उत्त्तरासद्भ्यऽइत्युत्त्तरासत् भ्यः । सोमनेत्त्रेभ्यऽइतिसोम नेत्त्रेभ्यः । उपरिसद्भ्य-ऽइत्युपरिसत् भ्यः । दुवस्वद्भ्यऽइतिदुवस्वत् भ्यः ॥३४॥

य्ये । देवाः । अग्निनेत्त्राऽइत्यग्नि नेत्त्राः । पुरःसद-ऽइतिपुरः सदः । तेभ्यः । य्यमनेत्त्राऽइतिय्यम नेत्त्राः । दक्क्षिणासदऽइतिदक्क्षिणा सदः । विश्श्वदेवनेत्त्राऽइति-

---

अग्निनेत्रेभ्यऽइत्यग्नि नेत्रेभ्यः । देवेभ्यः । यमनेत्रेभ्यऽइतियम नेत्रेभ्यः । दक्षिणासद्भ्यऽइतिदक्षिणासत् भ्यः । विश्वदेवनेत्रेभ्यऽइतिविश्वदेव नेत्रेभ्यः । पश्चात्सद्भ्यऽइतिपश्चात्सत् भ्यः । मित्रावरुणनेत्रेभ्यऽइतिमित्रावरुण नेत्रेभ्यः । मरुन्नेत्रेभ्यऽइतिमरुत् नेत्रेभ्यः । उत्तरासद्भ्यऽइत्युत्तरासत् भ्यः । सोमनेत्रेभ्यऽइतिसोम नेत्रेभ्यः । उपरिसद्भ्यऽइत्युपरिसत् भ्यः ॥३४॥

अग्निनेत्राऽइत्यग्नि नेत्राः । तेभ्यः । यमनेत्राऽइतियम नेत्राः । दक्षिणासदऽइतिदक्षिणा सदः । विश्वदेवनेत्राऽइतिविश्वदेव नेत्राः ।

य्यमनेत्रेभ्यऽइतिय्यम नेत्रेभ्यः । वा । वा ॥३४॥

य्ये । य्यमनेत्राऽइतिय्यम नेत्राः । [1]पश्चात्सदऽइतिपश्चात्

---

१. द्र० पूर्वत्र पृष्ठ ४५ टि० २ ।

विश्वदेव नेत्राः । पश्चात्सदऽइतिपश्चात् सदः । मित्रावरुणनेत्राऽइतिमित्रावरुण नेत्राः । मरुन्नेत्राऽइतिमरुत् नेत्राः । उत्तरासदऽइत्युत्तरा सदः । सोमनेत्राऽइतिसोम नेत्राः । उपरिसदऽइत्युपरि सदः । दुवस्वन्तः ॥३५॥

अग्ने । सहस्व । पृतनाः । अभिमातीरित्यभि मातीः । अप । अस्य ॥ दुष्टरः । दुस्तरऽइतिदुस्तरः । तरन् । अरातीः । वर्चः । धाः । यज्ञवाहसीतियज्ञ वाहसि ॥३६॥

उपांशोरित्युप अंशोः । वीर्येण । जुहोमि । हृतम् । रक्षः । स्वाहा । रक्षसाम् । त्वा । वधाय । अवधिष्म । रक्षः । अवधिष्म । अमुम् । असौ । हतः ॥३७॥

पश्चात्सदऽइतिपश्चात् सदः । मित्रावरुणनेत्राऽइतिमित्रावरुण नेत्राः । मरुन्नेत्राऽइतिमरुत् नेत्राः । उत्तरासदऽइत्युत्तरा सदः । सोमनेत्राऽइतिसोम नेत्राः । उपरिसदऽइत्युपरि सदः ॥३५॥

अग्ने । अभिमातारित्यभि मातीः । दुष्टरः । दुस्तरऽइतिदुस्तरः । यज्ञवाहसीतियज्ञ वाहसि ॥३६॥

उपांशोरित्युप अंशोः । रक्षः । रक्षसाम् । अवधिष्म । रक्षः । अवधिष्म ॥३७॥

सदः ॥३५॥

य्यज्ञवाहसीतिय्यज्ञ वाहसि ॥३६॥

उपांशोरित्युप[2] अंशोः । वीर्येण । [3]रक्षसान् । वधाय ॥३७॥

---

१. स्वामिदयानन्दस्य भाष्ये 'दुस्तरऽइतिदुः तरः' इत्येवं पाठ उपलभ्यते ।

२. अपपाठोऽयं लेखकप्रमादजः । '०रित्युप अंशोः' इत्येवं साधुः पाठो द्रष्टव्यः ।

३. अपपाठोऽयं लेखकप्रमादजः । 'रक्षसाम्' इत्येवं पाठो युक्तः ।

सविता । त्वा । सवानाम् । सुवताम् । अग्निः । गृहपतीनामितिगृह पतीनाम् । सोमः । वनस्पतीनाम् ॥ बृहस्पतिः । वाचे । इन्द्रः । ज्यैष्ठ्याय । रुद्रः । पशुभ्यऽइतिपशु भ्यः । मित्रः । सत्यः । वरुणः । धर्मपतीनामितिधर्म पतीनाम् ॥३८॥

इमम् । देवाः । असपत्नम् । सुवध्वम् । महते । क्षत्राय । ज्यैष्ठ्याय । जानराज्यायेतिजान राज्याय । इन्द्रस्य । इन्द्रियाय ॥ इमम् । अमुष्य । पुत्रम् । अमुष्यै । पुत्रम् । अस्यै । विशे । एषः । वः । अमीऽइत्यमी । राजा । सोमः । अस्माकम् । ब्राह्मणानाम् । राजा ॥३९॥

॥ इति वाजसनेयिसंहितापदे नवमोऽध्यायः ॥

अग्निः । वनस्पतीनाम् । बृहस्पतिः । ज्यैष्ठ्याय । रुद्रः । पशुभ्यऽइतिपशु भ्यः । मित्रः । सत्यः ॥३८॥

असपत्नम् । सुवध्वम् । क्षत्राय । ज्यैष्ठ्याय । जानराज्यायेतिजान राज्याय । अमुष्यै । पुत्रम् । अमीऽइत्यमी । अस्माकम् । ब्राह्मणानाम् ॥३९॥

सविता । ज्यैष्ठ्याय ॥३८॥

क्षत्राय । ज्यैष्ठ्याय । जानराज्यायेतिजान राज्याय । इन्द्रियाय । वः ॥३९॥

॥ इति श्री वाजसनेयिसंहितापदे नवमोऽध्यायः ॥

दशमोऽध्यायः

अपः । देवाः । मधुमतीरिति मधुं मतीः । अगृभ्णन् । ऊर्जस्वतीः । राजस्वऽइति राज स्वः । चितानाः ॥ याभिः । मित्रावरुणौ । अभि । असिञ्चन् । याभिः । इन्द्रम् । अनयन् । अति । अरातीः ॥१॥

वृष्णः । ऊर्मिः । असि । राष्ट्रदाऽइति राष्ट्र दाः । राष्ट्रम् । मे । देहि । स्वाहा । अमुष्मै । वृषसेनऽइति वृष सेनः ॥२॥

अगृभ्णन् । मित्रावरुणौ ॥१॥
वृष्णः । राष्ट्रदाऽइति राष्ट्र दाः । राष्ट्रम् । अमुष्मै ॥२॥

---

[2]वितानाः । य्याभिः । [3]असिन्चन् । य्याभिः । अनयन् ॥१॥
[4]वृष्णः । [4]वृषसेनऽइति वृष[4] सेनः ॥२॥

---

१. सर्वकोशेष्वयमेव पाठः । अत्र च 'नाम्येकाक्षरश्च स्वरसन्धेयेऽकृति' इति प्रातिशाखीयं सूत्रं (६।५) प्रमाणम् । पाणिनीयमतानुसारं त्वत्र 'उदात्तवता गतिमता च तिङा' (वार्तिक ८।२।१८) इति नियमेन समासेन भाव्यम् । तथा सति 'अभ्यसिञ्चन्नित्यभि असिञ्चन्' इत्येवमवग्रहेण भाव्यम् । अयं मन्त्रः किञ्चिद्भेदेन तैत्तिरीयसंहितायाम् (१।८।११) अपि पठ्यते । तत्र च—'अभ्यषिञ्चान्नित्यभि असिञ्चन्' इत्येवमवगृह्यते । तैत्तिरीयपदपाठेऽवग्रहात् परमुदात्तमाश्रित्य पूर्वस्मिन्नवगृहीतभागे 'उदात्तस्वरितपरस्य सन्नतरः' (अष्टा० १।२।४०) इति नियमो न प्रवर्तत इति कृत्वा 'भि' इत्यत्रैकश्रुतिर्भवति । वाजसनेयप्रातिशाख्यकारमतेन सह पाणिनीयमत-संगत्यर्थमत्र पाणिनीये मते 'अभे' कर्मप्रवचनीयत्वं व्याख्येयम् ।

२. अपपाठोऽयं लेखकप्रमादजः ।

३. अपपाठोऽयं लेखकप्रमादजः, मन्त्रे तिङ आद्युदात्तत्वदर्शनात् ।

४. ककोशशैल्यनुसारमृकारपरो वकारो न गुरुर्भवति, अतोऽपपाठोऽयम् ।

अर्थेतऽइत्यर्थे इतः । स्थ । दत्त । ओजस्वतीः । आपः । परिवाहिणीः । परिवाहिनीरितिपरि वाहिनीः । अपाम् । पतिः । अपाम् । गर्भः ॥३॥

सूर्य्यत्वचसऽइतिसूर्य्य त्वचसः । सूर्य्यवर्चसऽइतिसूर्य्य वर्चसः । मान्दाः । व्रजक्षितऽइतिव्रज क्षितः । वाशाः । शविष्ठाः । शक्वरीः । जनभृतऽइतिजन भृतः । विश्वभृतऽइतिविश्व भृतः । आपः । स्वराजऽइतिस्व राजः ॥ महि । क्षत्त्रम् । क्षत्त्रियाय । वन्वानाः । अनाधृष्टाः । सीदत । सहौजसऽइतिसह [1]ओजसः । दधतीः ॥४॥

सोमस्य । त्विषिः । असि । तवेवेतितव इव । मे । त्विषिः । भूयात् ॥ अग्नये । स्वाहा । सोमाय । सवित्रे ।

अर्थेतऽइत्यर्थ इतः । गर्भः ॥३॥

सूर्ष्यत्वचसऽइतिसूर्ष्य त्वचसः । व्व्रजक्षितऽइतिव्व्रज क्षितः । शविष्ठाः । शक्करीः । विश्वभृतऽइतिविश्व भृतः । क्षत्रम् । क्षत्रियाय । वन्वानाः । अनाधृष्टाः ॥४॥

अग्नये । सवित्रे । सरस्वत्यै । पूष्णे । बृहस्पतये ॥५॥

सूर्य्यत्वचसऽइतिसूर्य्य त्वचसः । सूर्य्यवर्चसऽइतिसूर्य्य [2]वर्च्चसः । व्व्रजक्षितऽइतिव्व्रज क्षितः । विश्वभृतऽइतिविश्व भृतः । क्षत्रियाय ॥४॥

भूयात् । अग्नये । सोमाय । बृहस्पतये । इन्द्राय । घोषाय ।

---

१. स्वामिदयानन्दः स्वीये यजुर्वेदभाष्ये 'ओजसः' इत्येवं स्वरं स्वीचकार । परन्त्वन्यत्र सर्वत्र 'ओजसः' इत्याद्युदात्तत्वमेवोपलभ्यते । बहुव्रीहौ पूर्वपदप्रकृतिस्वरे 'ओजसः' इति सर्वानुदात्तेन पदेन भाव्यम् । तस्मात् स्वामिदयानन्दनिर्दिष्टः स्वरः पाणिनीयतन्त्रानुकूलः । पदकाराणामुभयपदप्रकृतिस्वरनियमो गवेषणार्हः ।

२. ककोशशैल्यनुसारं 'वर्च्चसः' इत्येकवकारवान् पाठो ज्ञेयः ।

सरस्वत्यै । पूष्णे । बृहस्पतये । इन्द्राय । घोषाय । श्लोकाय । अꣳशाय । भगाय । अर्य्यम्णे ॥५॥

अनिभृष्ट्टमित्यनि भृष्टम् । असि । वाचः । बन्धुः । तपोजाऽइतितपः जाः । सोमस्य । दात्रम् । असि । स्वाहा । राजस्वऽइतिराज स्वः ॥६॥

सधमादऽइतिसध मादः । द्युम्निनीः । आपः । एताः । अनाधृष्टाः । अपस्यः । वसानाः ॥ पस्त्यासु । चक्रे । वरुणः । सधस्थमितिसध स्थम् । अपाम् । शिशुः । मातृतमास्वितिमातृ तमासु । अन्तरिक्ष्यन्तः ॥७॥

क्षत्त्रस्य । उल्बम् । असि । जरायु । योनिः । नाभिः । इन्द्रस्य । वार्त्रघ्नमितिवार्त्र घ्नम् । मित्त्रस्य । वरुणस्य । त्वया । अयम् । वृत्त्रम् । वधेत् ॥ दृवा । रुजा । क्षुमा ॥ पात । एनम् । प्राञ्चम् । प्रत्यञ्चम् । तिर्य्यञ्चम् । दिग्भ्यऽइतिदिक् भ्यः । पात ॥८॥

अनिभृष्टमित्यनि भृष्टम् । दात्रम् ॥६॥

द्युम्निनीः । अनाधृष्टाः । चक्रे । सधस्थमितिसध स्थम् । अन्तरिक्ष्यन्तः ॥७॥

क्षत्रस्य । उल्बम् । वात्रघ्नमितिवात्र घ्नम् । मित्रस्य । वृत्रम् । प्रत्यञ्चम् । दिग्भ्यऽइतिदिक् भ्यः ॥८॥

श्लोकाय । अꣳशाय । भगाय । अर्य्यम्णे ॥५॥

जरायु । य्योनिः । ब्वात्रघ्नमितिब्वात्र घ्नम् । त्वय्या । अय्यम् ॥८॥

आश्विः । मूर्ध्वा । आविंत्तऽइत्त्या विंत्तं । अग्निः । गृहपतिरितिगृह पतिं । आविंत्तऽइत्त्या विंत्तं । इन्द्रः । वृद्धश्रवाऽइतिवृद्ध श्रवाः । आविंत्तावित्त्या विंत्तौ । मित्त्रावरुणौ । धृतव्रतावितिधृत व्रतौ । आविंत्तऽइत्त्या विंत्तं । पूषा । विश्ववेदाऽइतिविश्व वेदाः । आविंत्तेऽइत्त्या विंत्ते । द्यावापृथिवीऽइतिद्यावापृथिवी । विश्वशम्भुवावितिविश्व शम्भुवौ । आवित्तेत्त्या विंत्ता । अदितिः । उरुशर्म्मेत्त्युरु शर्म्मा ॥९॥

अवेष्टाऽइत्त्यव इष्टाः । दन्दशूकाः । प्राचीम् । आ । रोह । गायत्री । त्वा । अवतु । रथन्तरमितिरथम् तरम् । साम । त्रिवृदितित्रि वृत् । स्तोमः । वसन्तः । ऋतुः । ब्रह्म । द्रविणम् ॥१०॥

आविंत्तऽइत्या विंत्तं । अग्निः । आविंत्तऽइत्या विंत्तं । वृद्धश्रवाऽइतिवृद्ध श्रवाः । आविंत्तावित्या विंत्तौ । मित्रावरुणौ । धृतव्रतावितिधृत व्रतौ । आविंत्तऽइत्या विंत्तं । विश्ववेदाऽइतिविश्व वेदाः । आविंत्तेऽइत्या विंत्ते । द्यावापृथिवीऽइतिद्यावापृथिवी । विश्वशम्भुवावितिविश्व शम्भुवौ । आवित्तेत्या विंत्ता । उरुशर्म्मेत्युरु शर्म्मा ॥९॥

अवेष्टाऽइत्यव इष्टाः । गायत्री । त्रिवृदितित्रि वृत् । ब्रह्म ॥१०॥

मूर्ध्वा । आविंत्तऽइत्या विंत्तं । आविंत्तऽइत्या विंत्तं । [1]वृद्धश्रवाऽइतिवृद्ध श्रवाः । आविंत्तावित्या विंत्तौ । [2]धृतव्व्रतावितिधृत व्व्रतौ । आविंत्तऽइत्या विंत्तं । विश्ववेदाऽइतिविश्व वेदाः । आविंत्तेऽइत्या विंत्ते । विश्वशम्भुवावितिविश्व शम्भुवौ । आवित्तेत्या विंत्ता ॥९॥

गायत्री । त्रिवृदितित्रि वृत् ॥१०॥

---

१. कपाठशैल्यनुसारमृकारपरो वकारो न गुरुर्भवति ।

२. अपपाठोऽयम् । कपाठानुसारमत्र 'धृतव्रतावितिधृत व्रतौ' इत्येवं पाठेन भाव्यम् ।

दक्षिणाम् । आ । रोह । त्रिष्टुप् । त्रिस्तुबितित्रि स्तुप् । त्वा । अवतु । बृहत् । साम । पञ्चदशऽइतिपञ्च दुशः । स्तोमः । ग्रीष्मः । ऋतुः । क्षत्रम् । द्रविणम् ॥११॥

प्रतीचीम् । आ । रोह । जगती । त्वा । अवतु । वैरूपम् । साम । सप्तदशऽइतिसप्त दुशः । स्तोमः । वर्षाः । ऋतुः । विट् । द्रविणम् ॥१२॥

उदीचीम् । आ । रोह । अनुष्टुप् । अनुस्तुबित्यनु स्तुप् । त्वा । अवतु । वैराजम् । साम । एकविंशऽइत्येक विंशः । स्तोमः । शरत् । ऋतुः । फलम् । द्रविणम् ॥१३॥

ऊर्ध्वाम् । आ । रोह । पङ्क्तिः । त्वा । अवतु । शाक्वररैवतेऽइतिशाक्वररैवते । सामनीऽइतिसामनी । त्रिणवत्रयस्त्रिंशौ । त्रिनवत्रयस्त्रिंशावितित्रिनवत्रयस्त्रिंशौ । स्तोमौ । हेमन्तशिशिरौ । ऋतूऽइत्यृतू । वर्चः । द्रविणम् ।

दक्षिणाम् । त्रिष्टुप् । त्रिस्तुबितित्रि स्तुप् । ग्रीष्मः । क्षत्रम् ॥११॥

सप्तदशऽइतिसप्त दुशः ॥१२॥

अनुष्टुप् । अनुस्तुबित्यनु स्तुप् एकविंशऽइत्येक विंशः ॥१३॥

पङ्क्तिः । शाक्वररैवतेऽइतिशाक्वररैवते । त्रिनवत्रयस्त्रिंशावितित्रिनवत्रयस्त्रिंशौ । ऋतूऽइत्यृतू । प्रत्यस्तमितिप्रति अस्तम् । मृत्योः ॥१४॥

एकविंशऽइत्येक विंशः ॥१३॥

त्रिणवत्रयस्त्रिंशौ । त्रिनवत्रयस्त्रिंशावितित्रिनवत्रयस्त्रिंशौ ॥१४॥

विरोकऽइतिवि[1] रोके । सूर्यः ॥१५॥

---

१. कपाठशैल्यनुसारमिह 'विरोकऽइतिवि रोके' इत्येवं पाठेन भाव्यम् ।

प्रत्यस्तमितिप्रति अस्तम् । नमुचेः । शिरः ॥ [1]मृत्योः । पाहि । ओजः । असि । सहः । अमृतम् ॥१४॥

हिरण्यरूपावितिहिरण्य रूपौ । उषसः । विरोकऽइतिवि रोके । उभौ । इन्द्रौ । उत् । इथः । सूर्यः । च ॥ आ । रोहतम् । वरुण । मित्र । गर्त्तम् । ततः । चक्षाथाम् । अदितिम् । दितिम् । च । मित्रः । असि । वरुणः । असि ॥१५॥

सोमस्य । त्वा । द्युम्नेन । अभि । सिञ्चामि । अग्नेः । भ्राजसा । सूर्यस्य । वर्चसा । इन्द्रस्य । इन्द्रियेण ॥ क्षत्त्राणाम् । क्षत्त्रपतिरितिक्षत्त्र पतिः । एधि । अति । दिद्यून् । पाहि ॥१६॥

प्र । पर्वतस्य । वृषभस्य । पृष्ठात् । नावः । चरन्ति । स्वसिचऽइतिस्व सिचः । इयानाः । ताः । आ । अववृत्रन् । अधराक् । उदक्ताऽइत्युत अक्ताः । अहिम् ।

हिरण्यरूपावितिहिरण्य रूपौ । मित्र । चक्षाथाम् । मित्रः ॥१५॥
द्युम्नेन । अग्नेः । क्षत्त्राणाम् । क्षत्त्रपतिरितिक्षत्त्र पतिः । दिद्यून् ॥१६॥
पृष्ठात् । अववृत्रन् । उदक्ताऽइत्युत अक्ताः । बुध्न्यम् । विष्णोः ।

सूर्यस्य । इन्द्रियाय ॥१६॥
[2]प्र । पर्वतस्य । इयानाः । [3]अववृत्रत् । रीयमाणाः । विक्रमण-

---

१. संहितापाठानुसारमितः पञ्चदशमन्त्रस्य पदान्येतानि । अत इहारभ्यैकस्याः संख्याया भेदो ज्ञेयः ।

२. इतः पूर्वस्याः कण्डिकायाः पदपाठोऽन्यकोशेषु नोलभ्यते, पूर्वत्र (६।३६) गतार्थत्वात् । तेनेहारभ्य ककोशे द्वयोः संख्ययोः भेदो जायते ।

३. अपपाठोऽयम् । 'अववृत्रन्' इति शुद्ध. पाठो द्रष्टव्यः ।

बुद्ध्न्यम् । अनु । रीयमाणाः । विष्णोः । विक्रमणमितिवि क्रमणम् । असि । विक्रान्तमितिवि क्रान्तम् । क्रान्तम् ॥१७॥

प्रजापतऽइतिप्रजा पते । न । त्वत् । एतानि । अन्यः । विश्वा । रूपाणि । परि । ता । बभूव ॥ यत्कामा-इतियत् कामाः । ते । जुहुमः । तत् । नः । अस्तु । अयम् । अमुष्य । पिता । असौ । अस्य । पिता । वयम् । स्याम । पतयः । रयीणाम् । स्वाहा ॥ रुद्र । यत् । ते । क्रिविं । परम् । नाम । तस्मिन् । हुतम् । असि । अमेष्ट-मित्यमा इष्टम् । असि । स्वाहा ॥१८॥

मित्रावरुणयोः । त्वा । प्रशास्त्रोरितिप्र शास्त्रोः । प्रशिषेतिप्र शिषा । युनज्मि ॥ अव्यथायै । त्वा । स्वधायै ।

विक्रमणमितिवि क्रमणम् । विक्रान्तमितिवि क्रान्तम् ॥१७॥

प्रजापतऽइतिप्रजा पते । अन्यः । विश्वा । यत्कामाऽइतियत् कामाः । अमुष्य । तस्मिन् । अमेष्टमित्यमा इष्टम् ॥१८॥

मित्रावरुणयोः । प्रशास्त्रोरितिप्र शास्त्रोः । प्रशिषेतिप्र शिषा ।

मितिवि[1] क्रमणम् । विक्रान्तमितिवि[2] क्रान्तम् । [3]क्रान्तम् ॥१७॥

यत्कामाऽइतियत् कामाः । अयम् । वयम् । पतयः । रयीणाम् । यत् ॥१८॥

मित्रावरुणयोः । [4]युनज्मि । अव्यथायै । स्वधायै । जय ।

---

१. 'वि' इत्यपपाठः ककोशशैल्यनुसारमितिशब्दात् परो वकारो द्विर्लिख्यते । तस्मात् 'वि' इति शुद्धः पाठो ज्ञेयः ।

२. अपपाठोऽयम्, कपाठशैल्यनुसारं 'वि' इत्येवं पाठेन भाव्यम् ।

३. अपपाठोऽयम्, 'क्रान्तम्' इति शुद्धः पाठोऽत्र द्रष्टव्यः ।

४. अपपाठोऽयम्, 'युनज्मि' इत्येवं शुद्धः पाठो ज्ञेयः ।

त्वा । अरिष्टः । अर्जुनः । मरुताम् । प्रसवेनेति प्र सवेन । जय । [1]आपाम । मनसा । सम् । इन्द्रियेण ॥१९॥

मा । ते । इन्द्र । ते । वयम् । तुराषाट् । अयुक्तासः । अब्रह्मता । वि । दसाम ॥ तिष्ठ । रथम् । अधि । यम् । वज्रहस्तेति वज्र हस्त । आ । रश्मीन् । देव । यमसे । स्वश्वानिति सु अश्वान् ॥२०॥

अग्नये । गृहपतयऽइति गृह पतये । स्वाहा । सोमाय । वनस्पतये । मरुताम् । ओजसे । इन्द्रस्य । इन्द्रियाय ॥ पृथिवि । मातः । मा । मा । हिंसीः । मोऽइति मो । अहम् । त्वाम् ॥२१॥

हंसः । शुचिषत् । शुचिसदिति शुचि सत् । वसुः । अन्तरिक्षसदित्यन्तरिक्ष सत् । होता । वेदिषत् ।

युनज्मि । अव्यथायै । अरिष्टः । प्रसवेनेति प्र सवेन ॥१९॥

अयुक्तासः । अब्रह्मता । तिष्ठ । वज्रहस्तेति वज्र हस्त । रश्मीन् । स्वश्वानिति सु अश्वान् ॥२०॥

अग्नये । वनस्पतये ॥२१॥

अन्तरिक्षसदित्यन्तरिक्ष सत् । ऋतसदित्यृत सत् । व्योमसदिति-

इन्द्रियेण ॥१९॥

वयम् । अयुक्तासः । यम् । वज्रहस्तेति वज्र हस्त । यमसे ॥२०॥

अग्नये । गृहपतयऽइति गृह पतये । सोमाय । वनस्पतये । इन्द्रियाय ॥२१॥

---

१. उव्वटमहीधरयोर्बम्बईमुद्रिते भाष्ये तत्र पठिते कात्यायनश्रौतसूत्रे च 'अपाम' इत्येवं पाठो दृश्यते । स च शतपथ (५।४।३।८) पाठविरोधात् चिन्त्यः ।

वेदिसदितिवेदि सत् । अतिथिः । दुरोणसदितिदुरोण सत् । नृषत् । नृसदितिनृ सत् । वरसदितिवर सत् । ऋतसदित्यृत सत् । व्योमसदितिव्योम सत् । अब्जाऽइत्यप् जाः । गोजाऽइतिगो जाः । ऋतजाऽइत्यृत जाः । अद्रिजाऽइत्यद्रि जाः । ऋतम् । बृहत् ॥२२॥

इयत् । असि । आयुः । असि । आयुः । मयि । धेहि । युङ् । वर्चः । ऊर्क् । ऊर्जम् ॥ इन्द्रस्य । वाम् । वीर्य्यकृतऽइतिवीर्य्य कृतः । बाहूऽइतिबाहू । अभ्युपावहरामीत्यभि उपावहरामि ॥२३॥

स्योना । असि । सुषदा । सुसदेतिसु सदा । क्षत्त्रस्य । योनिः ॥ स्योनाम् । आ । सीद । सुषदाम् । सुसदामितिसु सदाम् । क्षत्त्रस्य । योनिम् ॥२४॥

व्योम सत् । अब्जाऽइत्यप् जाः । ऋतजाऽइत्यृत[1] जाः । अद्रिजाऽइत्यद्रि जाः ॥२२॥

अभ्युपावहरामीत्यभि उपावहरामि ॥२३॥

क्षत्रस्य । क्षत्रस्य ॥२४॥

वेदिसदितिवेदि सत् । [2]वरसदितिवर सत् । ऋतसदित्यृत सत् । ऋतजाऽइत्यृत जाः । [3]अदृजाऽइत्यद्रि जाः ॥२२॥

इयत् । आयुः । आयुः । मयि । युङ् । वीर्य्यकृतऽइतिवीर्य्य कृतः ॥२३॥

योनिः । योनिम् ॥२४॥

---

१. 'इत्यृत' इत्येवमपपाठो बम्बईमुद्रिते ।

२. लेखकप्रमादजोऽयमपपाठः, 'वरसदितिवर सत्' इति कपाठशैल्यनुसारं पाठोऽत्रापेक्षते ।

३. अपपाठोऽयम्, 'अद्रिजा०' इति शुद्धः पाठो ज्ञेयः ।

नि । ससाद । धृतव्रतऽइतिधृत व्रतः । वरुणः । पस्त्यासु । आ ॥ साम्म्राज्ज्यायेतिसाम् राज्ज्याय । सुक्क्रतुरितिसु क्रतुः ॥२५॥

अभिभूरित्त्यभि भूः । असि । एताः । ते । पञ्च । दिशः । कल्प्पन्ताम् । ब्रह्मन् । त्वम् । ब्रह्मा । असि । सविता । सत्त्यप्प्रसवऽइतिसत्यप्रसवः । वरुणः । सत्त्यौजा-इतिसत्त्य ओजाः । इन्द्रः । विशौजाः । रुद्रः । सुशेवऽइतिसु शेवः ॥ बहुकारेतिबहु कार । श्रेयस्कर । श्रेयः करेतिश्रेयः कर । भूयस्कर । भूयः करेतिभूयः कर । तेन । मे । रद्ध्य ॥२६॥

अग्निः । पृथुः । धर्म्मणः । पतिः । जुषाणः । अग्निः । पृथुः । धर्म्मणः । पतिः । आज्ज्यस्य । वेतु । स्वाहा । स्वाहाकृताऽइतिस्वाहा कृताः । सूर्य्यस्य । रश्मिभि-

---

धृतव्रतऽइतिधृत व्रतः । साम्राज्यायेतिसाम् राज्याय । सुक्रतुरितिसु क्रतुः ॥२५॥

अभिभूरित्यभि भूः । कल्पन्ताम् । ब्रह्मन् । ब्रह्मा । सत्यप्रसवऽइति-सत्य प्रसवः । सत्यौजाऽइतिसत्य ओजाः । रुद्रः । श्रेयस्कर । श्रेयः करेति-श्रेयः कर । भूयस्कर । रध्य ॥२६॥

अग्निः । अग्निः । आज्जस्य । रश्मिभिरितिरश्मि भिः । यतध्वम् ।

धृतव्व्रतऽइतिधृत [1]व्व्रतः । साम्राज्यायेतिसाम् राज्याय ॥२५॥
श्रेयस्कर । श्रेयः करेतिश्रेयः कर । भूयस्कर । भूयः करेति भूयः कर ॥२६॥

सूर्य्यस्य । य्यतध्वम् । मध्यमेष्ठ्याय । मध्यमेस्थ्यायेति-

---

१. कपाठशैल्यनुसारं 'व्रतः' इति शुद्धः पाठो ज्ञेयः ।

रितिरश्मि भिः। सतद्धम्। सजातानामितिस जातानाम्। मद्ध्यमेष्ठ्याय। मद्ध्यमेस्त्थ्यायेतिमद्ध्यमे स्थ्याय ॥२७॥

सवित्रा। प्रसवित्त्रेतिप्र [1]सवित्रा। सरस्वत्त्या। व्वाचा। त्वष्ट्रा। रूपैः। पूष्णा। पशुभिरितिपशु भिः। इन्द्रेण। अस्म्मेऽइत्त्यस्म्मे। बृहस्पतिना। ब्रह्मणा। व्वरुणेन। ओजसा। अग्ग्निना। तेजसा। सोमेन। राज्ज्ञा। व्विष्णुना। दशम्म्या। देवतया। प्रसूतऽइतिप्र सूतः। प्र। सप्पामि ॥२८॥

अश्विब्भ्यामित्त्यश्वि भ्याम्। पच्यस्व। सरस्वत्त्यै। इन्द्राय। सुत्राम्मणऽइतिसु त्राम्म्णे॥ व्वायुः। पूतः। पवित्रेण। प्रत्त्यङ्। सोमः। अतिस्रुतऽइत्त्यति स्रुतः॥ इन्द्रस्य। युज्ज्यः। सखा ॥२९॥

कुवित्। अङ्ग। यवमन्तऽइतियव मन्तः। यवम्। चित्। यथा। दान्ति। अनुपूर्वमित्त्यनु पूर्वम्। व्वियूयेतिवि

मध्यमेष्ठ्याय। मध्यमेस्थ्यायेतिमध्यमे स्थ्याय ॥२७॥

सवित्रा। प्रसवित्रेतिप्र सवित्रा। सरस्वत्या। त्वष्ट्रा। पूष्णा। अस्मेऽइत्यस्मे। बृहस्पतिना। ब्रह्मणा। अग्निना। राज्ञा। विष्णुना। दशम्या। प्रसूतऽइतिप्र सूतः ॥२८॥

अश्विभ्यामित्यश्वि भ्याम्। पच्यस्व। सरस्वत्यै। सुत्राम्णऽइतिसु त्राम्णे। पवित्रेण। प्रत्यङ्। अतिस्रुतऽइत्यति स्रुतः। युज्यः ॥२९॥

मध्यमे स्थ्याय ॥२७॥

देवतया ॥२८॥

इन्द्राय। वायुः। य्युज्यः ॥२९॥

य्यवमन्तऽइतिय्यव मन्तः। य्यवम्। य्यथा। वियूय्येतिवि [2]य्यू। य्य।

---

१. 'सवित्त्रा' इति काशिकः पाठः।

२. अपपाठोऽयम्,अस्थानेऽवग्रहात् यकारस्य द्वित्वाच्च। ककोशशैल्यनुसारं 'वियूय्येतिवि यूय्य' इत्येवं पाठेन भाव्यम्।

सूर्य ॥ इहेहेतीह इह । एषाम् । कृणुहि । भोजनानि । ये । बर्हिषः । नमऽउक्क्तिमितिनमः उक्क्तम् । यजन्ति । अश्विभ्यामित्त्यश्वि भ्याम् । त्वा । सरस्वत्त्यै । इन्द्राय । सुत्राम्म्णऽइतिसु त्राम्म्णे ॥३०॥

युवम् । सुरामम् । अश्विना । नमुचौ । आसुरे । सचा ॥ विपिपानेतिवि ¹पिपाना । शुभः । पतीऽइतिपती । इन्द्रम् । कर्म्मस्विति कर्म्मं सु । आवतम् ॥३१॥

पुत्रमिवेतिपुत्रम् इव । पितरौ । अश्विना । उभा । इन्द्र । आवथुः । काव्यैः । दंसनाभिः ॥ यत् । सुरामम् । वि । अपिबः । शचीभिः । सरस्वती । त्वा । मघवन्निति मघ वन् । अभिष्णक् ॥३२॥

॥ इति वाजसनेयिसंहितापदे दशमोऽध्यायः ॥

अनुपूर्वमित्यनु पूर्वम् । नमऽउक्तिमितिनमः उक्तिम् । अश्विभ्यामित्यश्वि भ्याम् । सरस्वत्यै । सुत्राम्णऽइतिसु त्राम्णे ॥३०॥

अश्विना ॥३१॥

पुत्रमिवेतिपुत्रम् इव । अश्विना । काव्यैः ' अभिष्णक् ॥३२॥

य्ये । य्यजन्ति । इन्द्राय ॥३०॥

य्युवम् । [2]व्विपिप्पानेतिवि पिपाना । [3]शुभस्य ॥३१॥

य्यत् । मघवन्निति मघ वन् ॥३२॥

॥ इति श्री वाजसनेयिसंहितापदे दशमोऽध्यायः ॥

●

---

१. 'पिपाना' इति काशिकः पाठः ।

२. अपपाठोऽयम्, 'व्विपिपानेतिव्वि पिपाना' इति शुद्धः पाठः ककोशशैल्यनुसारं ज्ञेयः ।

३. पदमिदं न मन्त्रे दृश्यते, न चान्येषु कोशेषु ।

एकादशोऽध्यायः

युञ्जानः । प्रथमम् । मनः । तत्त्वाय । सविता । धियः ॥ अग्नेः । ज्योतिः । निचाय्येतिनि चाय्यं । पृथिव्याः । अधि । आ । अभरत् ॥१॥

युक्तेन । मनसा । वयम् । देवस्य । सवितुः । सवे ॥ स्वर्ग्यायेतिस्वः ग्याय । शक्त्या ॥२॥

[1]युक्त्वाय । सविता । देवान् । स्वः । यतः । धिया । दिवम् ॥ बृहत् । ज्योतिः । करिष्यतः । सविता । प्र । सुवाति । तान् ॥३॥

युजे । वाम् । ब्रह्म । पूर्व्यम् । नमोभिरितिनमः

तत्वाय । अग्ने? । पृथिव्या? ॥१॥

युक्तेन । शक्त्या ॥२॥

[1]युक्त्वाय । करिष्यत? ॥३॥

य्युञ्जान? । तत्वाय । धिय ॥१॥

य्युक्तेन । व्वयम् । स्वर्ग्यायेतिस्व ग्याय ॥२॥

[1]य्युक्त्वाय । य्यत? । धिया ॥३॥

[2]य्युजे । पूर्व्यम् । य्ये ॥४॥

---

१. वेङ्क० निर्णय० आदिषु बहुषु मुद्रितेषु संहिताग्रन्थेषु पदग्रन्थेषु हस्तलिखितेषु च 'युक्त्वाय' इत्येवं पाठः। शतपथे भाष्यग्रन्थेषु च 'युक्त्वाय' पाठः।

२. इतः पूर्वं च वर्तमानस्य 'युञ्जते मनः' इत्यस्य पदपाठः पूर्वं

भिः । वि । श्लोकः । एतु । पथ्येवेतिपथ्या इव । सूरेः ॥ शृण्वन्तु । विश्वे । अमृतस्य । पुत्राः । आ । ये । धामानि । दिव्यानि । तस्थुः ॥४॥

यस्य । प्रयाणम् । प्रयानमितिप्र यानम् । अनु । अन्ये । इत् । ययुः । देवाः । देवस्य । महिमानम् । ओजसा ॥ यः । पार्थिवानि । विममऽइतिवि ममे । सः । एतशः । रजांसि । देवः । सविता । महित्वनेतिमहि त्वना ॥ [1]वाचः । पतिः । वाचम् । नः । स्वदतु ॥५॥

इमम् । नः । देव । सवितः । यज्ञम् । प्र । नय । देवाव्यमितिदेव अव्यम् । सखिविदमितिसखि विदम् । सत्राजितमितिसत्रा जितम् । धनजितमितिधन जितम् । स्वर्जितमितिस्वः जितम् ॥ ऋचा । स्तोमम् । सम् । अर्द्धय । गाय-

---

ब्रह्म । पथ्येवेतिपथ्या इव । शृण्वन्तु । विश्वे । पुत्राः । दिव्यानि । तस्थुः ॥४॥

प्रयानमितिप्र यानम् । अन्ये । पार्थिवानि । महित्वनेतिमहि त्वना ॥५॥

यज्ञम् । देवाव्यमितिदेव अव्यम् । सत्राजितमितिसत्रा जितम् गाय-

---

य्यस्य । प्रय्याणम् । प्रय्यानमितिप्र य्यानम् । य्ययुः । य्यः । विममऽइतिवि ममे । महित्वनेतिमहि त्वना । [1]व्वाचः ॥५॥

य्यज्ञम् । नय्य । अर्द्धय्य । गाय्यत्रेण । सखिविदमितिसखि विदम् ।

गतत्वान्नेह पदग्रन्थेषु पठ्यते । तेनैकस्याः संख्याया भेदो जायते ककोशे ।

१. उत्तरस्य 'देव सवितः' मन्त्रस्य बहूनां पदानां पूर्वं गतत्वान्नेह पदपाठे पठ्यन्ते, अवशिष्टानि च पञ्च पदानि पञ्चमकण्डिकायां संगृह्यन्ते । अत इत आरभ्य द्वयोः कण्डिकासंख्ययोर्भेदः ककोशे द्रष्टव्यः । इह तु सौकर्यार्थं ककोशीयपाठेऽपि पदपाठानुसारी संख्या प्रदत्ता ।

त्रेण । रथन्तरमिति रथम् तरम् । बृहत् । गायत्रवर्त्तनीति गायत्र वर्त्तनि । स्वाहा ॥६॥

आ । ददे । गायत्रेण । छन्दसा । अङ्गिरस्वत् । पृथिव्याः । सधस्थादिति सध स्थात् । अग्निम् । पुरीष्यम् । अङ्गिरस्वत् । आ । भर । त्रैष्टुभेन । त्रैस्तुभेनेति त्रैस्तुभेन ॥७॥

अभ्रिः । असि । नारी । असि । त्वया । वयम् । अग्निम् । शकेम । खनितुम् । सधस्थऽइति सध स्थे । आ ॥ जागतेन ॥८॥

हस्ते । आधायेत्या धाय । सविता । बिभ्रत् । अभ्रिम् । हिरण्ययीम् । आनुष्टुभेन । आनुस्तुभेनेत्यानु स्तुभेन ॥९॥

त्रेण । गायत्रवर्त्तनीति गायत्र वर्त्तनि ॥६॥

गायत्रेण । पृथिव्याः । सधस्थादिति सध स्थात् । अग्निम् । पुरीष्यम् । त्रैष्टुभेन । त्रैस्तुभेनेति त्रै स्तुभेन ॥७॥

अभ्रिः । अग्निम् । सधस्थऽइति सध स्थे ॥८॥

आधायेत्या धाय । बिभ्रत् । अभ्रिम् । हिरण्ययीम् । आनुष्टुभेन । आनुस्तुभेनेत्यानु स्तुभेन ॥९॥

गायत्रवर्त्तनीति गायत्र वर्त्तनि ॥६॥

गायत्रेण ॥७॥

त्वया । वयम् ॥८॥

आधायेत्या धाय । हिरण्ययीम् ॥९॥

प्रतूर्त्तमितिप्र तूर्त्तम् । वाजिन् । आ । द्रव । वरिष्ठाम् । अनु । संव्वतमितिसम् वतम् ॥ दिवि । ते । जन्म । परमम् । अन्तरिक्षे । तव । नाभिः । पृथिव्याम् । अधि । योनिः । इत् ॥१०॥

युञ्जाथाम् । रासभम् । युवम् । अस्मिन् । यामे । वृषण्वसूऽइतिवृषण् वसू ॥ अग्निम् । भरन्तम् । अस्मयु- मित्यस्म युम् ॥११॥

योगेयोगऽइतियोगे योगे । तवस्तरमितितवः तरम् । वाजेवाजऽइतिवाजे वाजे । हवामहे ॥ सखायः । इन्द्रम् । ऊतये ॥१२॥

प्रतूर्त्तमितिप्र तूर्त्तम् । वरिष्ठाम् । जन्म । अन्तरिक्षे । पृथिव्याम् ॥१०॥

अस्मिन् । वृषण्वसूऽइतिवृषण् वसू । अग्निम् । अस्मयुमित्यस्म युम् ॥११॥

---

[1]संव्वतमितिसम् वतम् । य्योनिः ॥१०॥

य्युञ्जाथाम् । य्युवम् । य्यामे । वृषण्वसूऽइतिवृषण् [2]व्वसू । अस्मयुमित्यस्म [3]य्युम् ॥११॥

य्योगेय्योगऽइतियोगे[4] य्योगे । वाजेवाजऽइतिवाजे [2]व्वाजे । सखायः । ऊतय्ये ॥१२॥

---

१. अपपाठोऽयम्, 'संव्वतमितिसम् वतम्' इति शुद्धेन पाठेन भाव्यम् ।

२. कपाठशैल्यनुसारमिह एकवकार इष्यते ।

३. कपाठशैल्यनुसारमिह 'युम्' इति शुद्धः पाठो ज्ञेयः ।

४. कपाठशैल्यनुसारमिह '०य्योगे य्योगे' इति शुद्धः पाठो ज्ञेयः ।

प्रतूर्व्वन्निति॑प्र तूर्व्वन् । आ । इहि । अवक्राम॒न्नित्य॑व क्राम॑न् । अशस्तीः॑ । रुद्रस्य॑ । गाण॑पत्त्यमिति॒गाण॑ पत्त्यम् । मयोभूरिति॑मयः॑ भूः । आ । इहि ॥ उरु । अन्तरि॑क्क्षम् । वि । इहि । स्वस्तिग॑व्यूतिरिति॑स्वस्ति ग॑व्यूतिः॑ । अभ॑यानि । कृण्ण्वन् । पूष्ण्णा । सयुजेति॑स सुजा॑ । सह ॥ अच्छ॑ । इमः॑ । भरिष्ष्यामः॑ ॥१३॥

अनु॑ । अग्निः । उषसा॑म् । अग्ग्रम् । अक्ख्यत् । अनु॑ । अहा॑नि । प्रथमः । जातवे॑दाऽइति॑जात वे॑दाः॑ ॥ अनु॑ । सूर्य्य॑स्य । पुरुत्रेति॑पुरु त्रा । च । रश्मीन् । अनु॑ । द्यावा॑पृथिवी-ऽइति॒द्यावा॑पृथिवी । आ । ततन्थ ॥१४॥

आगत्त्येत्या गत्त्य॑ । वाजी । अद्ध्वा॑नम् । सर्व्वाः ।

प्रतूर्व्वन्निति॑प्र तूर्व्वन् । अवक्राम॒न्नित्य॑व क्राम॑न् । रुद्रस्य॑ । गाण॑पत्य-मिति॒गाण॑ पत्यम् । अन्तरि॑क्षम् । स्वस्तिग॑व्यूतिरिति॑स्वस्ति ग॑व्यूतिः॑ । कृण्वन् । पूष्णा । अच्छ॑ । भरिष्यामः॑ ॥१३॥

अग्निः । अग्रम् । अख्यत् । पुरुत्रेति॑पुरु त्रा । रश्मीन् । द्यावा॑पृथिवी-ऽइति॒द्यावा॑पृथिवी ॥१४॥

आगत्येत्या गत्य॑ । अध्वा॑नम् । अग्निम् । सधस्थऽइति॑सध स्थे॑ ।

मयोभूरिति॑मयः॑ भूः । अभ॑यानि । सयुजेति॑स [1]युजा॑ । [2]अच्छ॑ ॥१३॥

जातवे॑दाऽइति॑जात वे॑दाः॑ । सूर्य्य॑स्य ॥१४॥

---

१. कपाठशैल्यनुसारमिह 'युजा॑' इति शुद्धः पाठो द्रष्टव्यः ।

२. इत आरभ्य उत्तरमन्त्रस्य त्रीण्येव पदानि पूर्वमगतानि पदपाठे त्रयोदशकण्डिकाया एवान्ते पठ्यन्ते । अत इत आरभ्य ककोशे तिसृणां कण्डिका-संख्यानां भेदो जायते ।

मूर्ध्नः । वि । धूनुते ॥ अग्निम् । सधस्थऽइतिसध स्थे । महति । चक्क्षुषा । नि । चिकीषते ॥१५॥

आक्रम्म्येत्त्या क्रम्म्य । वाजिन् । पृथिवीम् । अग्निम् । इच्छ । रुचा । त्वम् ॥ भूम्म्याꣳ । वृत्त्वाय । नꣳ । ब्रूहि । यतः । खनेम । तम् । वयम् ॥१६॥

द्यौः । ते । पृष्ठ्ठम् । पृथिवी । सधस्त्थमितिसध स्थम् । आत्मा । अन्तरिक्क्षम् । समुद्रः । योनिः ॥ विक्ख्यायेतिवि ख्याय । चक्क्षुषा । त्वम् । अभि । तिष्ट्ठ । पृतन्न्यतः ॥१७॥

उत् । क्राम । महते । सौभगाय । अस्म्मात् । आस्त्थाना-दित्त्या स्थानात् । द्रविणोदाऽइतिद्रविणꣳ दाः । वाजिन् ॥ वयम् । स्याम । सुमताविति सु मतौ । पृथिव्याः । अग्निम् । खनन्तꣳ । उपस्त्थेऽइत्त्युप स्थे । अस्याꣳ ॥१८॥

चक्षुषा ॥१५॥

आक्रम्येत्या क्रम्य । अग्निम् । इछ । भूम्याꣳ । वृत्वाय ॥१६॥

पृष्ठम् । सधस्थमितिसध स्थम् । आत्मा । अन्तरिक्षम् । समुद्रः । विख्यायेतिवि ख्याय । चक्षुषा । तिष्ठ । पृतन्यतः ॥१७॥

अस्मात् । आस्थानादित्या स्थानात् । द्रविणोदाऽइतिद्रविणꣳ दाः । पृथिव्याः । अग्निम् । उपस्थऽइत्युप स्थे ॥१८॥

वृत्वाय्य । य्यतः । व्वय्यम् ॥१६॥

य्योनिः । विख्याय्येतिवि ख्याय्य ॥१७॥

सौभगाय्य । व्वय्यम् ॥१८॥

उत् । अक्क्रमीत् । द्रविणोदाऽइतिद्रविणꣳ दाः । वाजी । अर्वा । अकरित्त्यर्कः । सु । लोकम् । सुकृतमितिसु कृतम् । पृथिव्याम् । ततः । खनेम । सुप्प्रतीकमितिसु प्रतीकम् । अग्निम् । स्वरितिस्वः । रुहाणाꣳ । अधि । नाकम् । उत्तममित्त्युत् तमम् ॥१९॥

आ । त्वा । जिघर्म्मि । मनसा । घृतेन । प्रतिक्क्षियन्त-मितिप्प्रति क्षियन्तम् । भुवनानि । विश्श्वा ॥ पृथुम् । तिरश्श्चा । वयसा । बृहन्तम् । व्यचिष्ट्ठम् । अन्नैꣳ । रभसम् । दृशानम् ॥२०॥

आ । विश्श्वतः । प्रत्त्यञ्चम् । जिघर्म्मि । अरक्क्षसा । मनसा । तत् । जुषेत ॥ मर्य्यश्श्रीरितिमर्य्य श्रीः । स्पृहयद्द्वर्ण्णऽइतिस्प्पृहयत् वर्णः । अग्निः । न । अभिमृश-इत्त्यभि मृशे । तन्व्वा । जर्भुराणꣳ ॥२१॥

अक्रमीत् । द्रविणोदाऽइतिद्रविणꣳ दाः । अकरित्यर्कः । पृथिव्याम् सुप्रतीकमितिसु प्रतीकम् । अग्निम् । उत्तममित्युत् तमम् ॥१९॥

प्रतिक्षियन्तमितिप्रति क्षियन्तम् । विश्वा । तिरश्चा । व्यचिष्ठम् ॥२०॥

विश्वतः । प्रत्यञ्चम् । अरक्षसा । मर्य्यश्रीरितिमर्य्य श्रीः । स्पृहयद्वर्णऽइतिस्पृहयत् वर्णः । अग्निः । अभिमृशऽइत्यभि मृशे । तन्वा । जर्भुराणः ॥२१॥

प्रतिक्षियन्तमितिप्रति क्षियन्तम् । वयसा ॥२०॥

मर्य्यश्रीरितिमर्य्य श्रीः । स्पृहयद्वर्णऽइतिस्पृहयत् वर्णः ॥२१॥

परिं । व्वाजंपतिरितिव्वाजं पतिंः । कविः । अग्निः । हुव्यानिं । अक्क्रमीत् ॥ दधंत् । रत्त्नांनि । दाशुषे ॥२२॥

परिं । त्वा । अग्ने । पुरंम् । व्वयम् । व्विप्प्रंम् । सहस्य । धीमहि ॥ धृषद्द्वंर्ण्णमितिंधृषत् व्वंर्ण्णम् । दिवेदिव-ऽइतिंदिवे दिंवे । हुन्तारंम् । भङ्गुरावंताम् । भङ्गुरवंतामितिं-भङ्गुर व्वंताम् ॥२३॥

त्वम् । अग्ने । द्युभिरितिद्द्यु भिंः । आशुशुक्क्षणिंः । अद्भ्यऽइत्त्यत् भ्यः । अश्म्मंनः । परिं ॥ व्वनेंब्भ्यः । ओषंधीब्भ्यः । नृणाम् । नृपतऽइतिंनृ पते । जायसे । शुचिंः ॥२४॥

अग्निः । हुव्यानिं । अक्रमीत् । रत्नांनि ॥२२॥

अग्ने । व्विप्रंम् । धृषद्वंर्णमितिंधृषत् व्वंर्णम् ॥२३॥

अग्ने । द्युभिरितिद्यु भिंः । आशुशुक्षणिंः । अद्भ्यऽइत्यत् भ्यः । अश्मंनः । व्वनेंभ्यः । ओषंधीभ्यः ॥२४॥

---

[1]वाजंपतिरितिवाजं पतिः ॥२२॥

व्वप्रम् । धृषद्वंर्ण्णमितिंदृषत्[2] वंर्ण्णम् । भङ्गुरवंतामितिंभङ्गुर वंताम् ॥२३॥

जायसे ॥२४॥

---

१. अपपाठोऽयम्, 'व्वाजंपतिरितिव्वाजं पतिः' इति कपाठशैल्यनुसारं शुद्धः पाठो ज्ञेयः ।

२. '०दृषत्' इत्यपपाठो लेखकप्रमादजः ।

अ॒ङ्गि॒र॒स्वत् । ख॒ना॒मि॒ ॥ ज्योति॑ष्म्मन्तम् । त्वा॒ । अ॒ग्ने॒ । सु॒प्र॒ती॑क॒मि॒ति॑सु प्रती॑कम् । अज॑स्रेण । भा॒नु॒ना॑ । दी॒द्य॑तम् ॥ शि॒वम् । प्र॒जाभ्य॒ऽइति॑प्र जाभ्यः॑ । अहि॑ꣳसन्तम् । ख॒ना॒म॒ꣳ ॥२५॥

अ॒पाम् । पृ॒ष्ठम् । अ॒सि॒ । योनिः॑ । अ॒ग्नेः॒ । स॒मु॒द्रम् । अ॒भितः॑ । पिन्व॑मानम् ॥ वर्द्ध॑मानꣳ । म॒हान् । आ । च॒ । पुष्क॑रे । दि॒वः॒ । मात्र॑या । व॒रि॒म्म्णा । प्र॒थ॒स्व॒ ॥२६॥

शर्म्म॑ । च॒ । स्थः॒ । वर्म्म॑ । च॒ । स्थ॒ꣳ । अच्छि॑द्द्रे॒ऽइत्यच्छि॑द्द्रे । ब॒हु॒लेऽइति॑ब॒हु॒ले । उ॒भेऽइत्यु॒भे ॥ व्य॒च॑स्वती॒ऽइति॒व्य॒च॑स्वती । सम् । व॒सा॒था॒म् । भृ॒तम् । अ॒ग्निम् । पु॒री॒ष्य॒म् ॥२७॥

सम् । व॒सा॒था॒म् । स्व॒र्व्वि॑देति॑स्व॒ꣳ व्विदा॑ । स॒मी॒ची॒ऽइति॑स॒मी॒ची॑ । उर॑सा । त्मना॑ । अ॒ग्निम् । अ॒न्तः॒ ।

ज्योति॑ष्मन्तम् । अ॒ग्ने॒ । सु॒प्र॒ती॑क॒मि॒ति॑सु प्रती॑कम् । दी॒द्य॑तम् । प्र॒जाभ्य॒ऽइति॑प्र जाभ्यः॑ ॥२५॥

पृ॒ष्ठम् । अ॒ग्नेः॒ । स॒मु॒द्रम् । पिन्व॑मानम् । पुष्क॑रे । मात्र॑या । व॒रि॒म्णा ॥२६

अच्छि॑द्रे॒ऽइत्यच्छि॑द्रे । उ॒भेऽइत्यु॒भे । व्य॒च॑स्वती॒ऽइति॒व्य॒च॑स्वती । अ॒ग्निम् । पु॒री॒ष्य॒म् ॥२७॥

य्योनिः॑ । मात्र॑या ॥२६॥

[1]स्व॒र्व्वि॑देति॑स्व॒ꣳ व्विदा॑ ॥२८॥

---

१. अपपाठोऽयम्, 'स्व॒र्व्वि॑देति॑स्व॒ꣳ विदा॑' इति कपाठशैल्यनुसारं शुद्धेन पाठेन भाव्यम् ।

भरिष्यन्तीऽइतिंभरिष्यन्तीं । ज्योतिष्मन्तम् । अजस्रम् । इत् ॥२८॥

पुरीष्यः । असि । विश्वभराऽइतिविश्व भराः । अथर्वा । त्वा । प्रथमः । निः । अमन्थत् । अग्ने ॥ त्वाम् । अग्ने । पुष्करात् । अधि । अथर्वा । निः । अमन्थत ॥ मूर्द्ध्नः । विश्वस्य । वाघतः ॥२९॥

तम् । ऊँऽइत्यूँ । त्वा । दध्यङ् । ऋषिः । पुत्रः । ईधे । अथर्वणः ॥ वृत्रहणम् । वृत्रहनमितिवृत्र हनम् । पुरन्दरमितिपुरम् दरम् ॥३०॥

तम् । ऊँऽइत्यूँ । त्वा । पाथ्यः । वृषा । सम् । ईधे । दस्युहन्तममितिदस्युहन् तमम् ॥ धनञ्जयमितिधनम् जयम् । रणेरणऽइतिरणे रणे ॥३१॥

अग्निम् । भरिष्यन्तीऽइतिभरिष्यन्तीं । ज्योतिष्मन्तम् ॥२८॥

पुरीष्यः । विश्वभराऽइतिविश्व भराः । अग्ने । अग्ने । पुष्करात् । विश्वस्य ॥२९॥

ऊँऽइत्यूँ । दध्यङ् । पुत्रः । वृत्रहणम् । वृत्रहनमितिवृत्र हनम् ॥३०॥

ऊँऽइत्यूँ । पाथ्यः ॥३१॥

विश्वभराऽइतिविश्व भराः ॥२९॥

[1]उंऽइत्युम् ॥३०॥

[1]उंऽइत्युम् । धनञ्जयमितिधनम् जयम् ॥३१॥

---

१. अपपाठोऽयम्, 'ऊँऽइत्यूँ' इति पाठेन भवितव्यम् ।

सीद॑ । होत॒रिति॑होतः॑ । स्वे । ऊँऽइत्यूँ । लो॒के । चि॒कि॒त्वान् । सा॒दय॑ । य॒ज्ञम् । सु॒कृ॒तस्येति॑सु कृ॒तस्य॑ । योनौ॑ ॥ दे॒वा॒वीरिति॑देव अ॒वीः । दे॒वान् । ह॒विषा॑ । य॒जा॒सि॒ । अग्ने॑ । बृ॒हत् । यज॑माने । वयः॑ । धाः ॥३२॥

नि । होता॑ । हो॒तृ॒षद॑ने । हो॒तृ॒सद॑न॒ऽइति॑होतृ सद॑ने । वि॒दानः॑ । त्वे॒षः । दी॒दि॒वानिति॑दीदि वान् । अ॒स॒द॒त् । सु॒द॒क्ष॒ऽइति॑सु दक्षः॑ ॥ अद॑ब्धव्रतप्रमति॒रित्यद॑ब्धव्रत प्रमतिः॑ । वसि॑ष्ठः । स॒ह॒स्र॒म्भ॒रऽइति॑सहस्रम् भ॒रः । शुचि॑जिह्व॒ऽइति॒शुचि॑ जिह्वः॑ । अ॒ग्निः ॥३३॥

सम् । सी॒द॒स्व॒ । म॒हान् । अ॒सि॒ । शोच॑स्व । दे॒व॒वीत॑म॒ऽइति॑देव॒ वीत॑मः ॥ वि । धू॒मम् । अ॒ग्ने॒ । अ॒रु॒षम् । मि॒ये॒ध्य॒ । सृ॒ज । प्र॒श॒स्तेति॑प्र शस्त । द॒र्श॒तम् ॥३४॥

ऊँऽइत्यूँ । चि॒कि॒त्वान् । य॒ज्ञम् । अग्ने॑ ॥३२॥

सुद॒क्ष॒ऽइति॑सु दक्षः॑ । अद॑ब्धव्रतप्रमति॒रित्यद॑ब्धव्रत प्रमतिः॑ । वसि॑ष्ठः । शुचि॑जिह्व॒ऽइति॒शुचि॑ जिह्वः॑ । अ॒ग्निः ॥३३॥

अ॒ग्ने॒ । मि॒ये॒ध्य॒ । प्र॒श॒स्तेति॑प्र शस्त ॥३४॥

---

उभेऽइत्युभे । उतोऽइत्युतो । उक्थेषु ॥३९॥

अग्ने । अद्य । अश्वम् । भद्रम् । हृदिस्पृशमितिहृदि स्पृशम् । ऋध्याम ॥४०॥

अग्ने । भद्रस्य । दक्षस्य ॥४१॥

य्यः । य्यम् । आय्यन्तीत्या [1]य्यन्ति । सूरय्यः ॥३८॥

पुपूर्य्याः ॥३९॥

---

१. 'य्यन्ति' इत्येवं शुद्धः पाठोऽत्र ज्ञेयः ।

न । ज्योतिः ॥ अग्ने । विश्वेभिः । सुमनाऽइतिसु मनाः । अनीकैः ॥४२॥

अग्निम् । होतारम् । मन्ये । दास्वन्तम् । वसुम् । सूनुम् । सहसः । जातवेदसमितिजात वेदसम् । विप्रम् । न । जातवेदसमितिजात वेदसम् ॥ यः । ऊर्द्ध्वया । स्वध्वरऽइतिसु अध्वरः । देवः । देवाच्या । कृपा ॥ घृतस्य । विभ्राष्टिमितिवि भ्राष्टिम् । अनु । वष्टि । शोचिषा । आजुह्वानस्येत्या जुह्वानस्य । सर्पिषः ॥४३॥

येन । ऋषयः । तपसा । सत्रम् । आयन् । इन्धानाः । अग्निम् । स्वः । आभरन्तऽइत्या भरन्तः ॥ तस्मिन् । अहम् । नि । दधे । नाके । अग्निम् । यम् । आहुः । मनवः । स्तीर्णबर्हिषमितिस्तीर्ण बर्हिषम् ॥४४॥

अग्ने । विश्वेभिः ॥४२॥

अग्निम् । मन्ये । विप्रम् । ऊर्द्ध्वया । स्वध्वरऽइतिसु अध्वरः । देवाच्या । विभ्राष्टिमितिवि भ्राष्टिम् । वष्टि । आजुह्वानस्येत्या जुह्वानस्य ॥४३॥

सत्रम् । अग्निम् । आभरन्तऽइत्या भरन्तः । तस्मिन् । अग्निम् । स्तीर्णबर्हिषमितिस्तीर्ण बर्हिषम् ॥४४॥

जातवेदसमितिजात वेदसम् । जातवेदसमितिजात वेदसम् । यः । [1]ऊर्द्ध्वया । विभ्राष्टिमितिवि[2] भ्राष्टिम् ॥४३॥

[3]येन । ऋषयः । आयन् । यम् ॥४४॥

---

१. अपपाठोऽयं लेखकप्रमादजः । 'ऊर्द्ध्वया' इति शुद्धः पाठो ज्ञेयः ।

२. ककोशशैल्यनुसारमिह 'वि' इत्येवं द्विवकारवता पाठेन भाव्यम् ।

३. इतः पूर्वस्या मन्त्रकण्डिकायाः पूर्वं गतत्वान्नेह तत्पदानि पदपाठे पठ्यन्ते। अत इत आरभ्य पञ्चानां कण्डिकासंख्यानां भेदो ज्ञेयः ।

तम् । पत्नीभिरिति पत्नीभिः । अनु । गच्छेम । देवाः । पुत्रैः । भ्रातृभिरितिभ्रातृ भिः । उत । वा । हिरण्यैः ॥ नाकम् । गृभ्णानाः । सुकृतस्येतिसु कृतस्य । लोके । तृतीये । पृष्ठे । अधि । रोचने । दिवः ॥४५॥

आ । वाचः । मध्यम् । अरुहत् । भुरण्युः । अयम् । अग्निः । सत्पतिरितिसत् पतिः । चेकितानः ॥ पृष्ठे । पृथिव्याः । निहितइतिनि हितः । दविद्युतत् । अधस्पदम् । अधःपदमित्यधः पदम् । कृणुताम् । ये । पृतन्यवः ॥४६॥

अयम् । अग्निः । वीरतमइतिवीर तमः । वयोधाइतिवयः धाः । सहस्रियः । द्योतताम् । अप्रयुच्छन्नित्यप्र

पत्नीभिः । गछेम । पुत्रैः । भ्रातृभिरितिभ्रातृ भिः । हिरण्यैः । गृम्णानाः । पृष्ठे ॥४५॥

मध्यम् । भुरण्युः । अग्निः । सत्पतिरितिसत् पतिः । पृष्ठे । पृथिव्याः । दविद्युतत् । अधस्पदम् । अधःपदमित्यधः पदम् । पृतन्यवः ॥४६॥

अग्निः । अप्रयुछन्नित्यप्र युछन् । विभ्राजमानइतिवि भ्राजमानः ।

वा । तृतीये ॥४५॥

अयम् । ये ॥४६॥

अयम् । वीरतमइतिवीर तमः । वयोधाइतिवयः धाः । सहस्रियः । अप्रयुछनित्यप्र [1]युच्छन् । विभ्राजमानइतिवि भ्राजमानः ।

---

१. ककोशशैल्यनुसारमिह 'युछन्' इति साधुर्ज्ञेयः ।

यच्छन् ॥ विभ्राजमान इति वि भ्राजमानः । सरिरस्य । मध्ये । उप । प्र । याहि । दिव्यानि । धाम ॥४७॥

सम्प्रच्यवध्वमिति सम् प्रच्यवध्वम् । उप । सम्प्रयातेति सम् प्रयात । अग्ने । पथः । देवयानानिति देव यानान् । कृणुध्वम् ॥ पुनरिति पुनः । कृण्वाना । पितरा । युवाना । अन्वाताꣳसीदित्यनु आताꣳसीत् । त्वयि । तन्तुम् । एतम् ॥४८॥

उत् । बुध्यस्व । अग्ने । प्रति । जागृहि । त्वम् । इष्टापूर्ते इतीष्टापूर्ते । सम् । सृजेथाम् । अयम् । च ॥ अस्मिन् । सधस्थ इति सध स्थे । अधि । उत्तरस्मिन्नित्युत् तरस्मिन् । विश्वे । देवाः । यजमानः । च । सीदत ॥४९॥

मध्ये । दिव्यानि ॥४७॥

सम्प्रच्यवध्वमिति सम् प्रच्यवध्वम् । अग्ने । कृणुध्वम् । कृण्वाना । अन्वाताꣳसीदित्यनु आताꣳसीत् ॥४८॥

बुध्यस्व । अग्ने । इष्टापूर्ते इतीष्टापूर्ते । अस्मिन् । सधस्थ इति सध स्थे । उत्तरस्मिन्नित्युत् तरस्मिन् । विश्वे ॥४९॥

य्याहि ॥४७॥

सम्प्रय्यातेति सम् प्रय्यात । देवय्यानानिति देव [1]य्यानान् । य्युवाना । त्वय्यि ॥४८॥

अय्यम् ॥४९॥

---

१. ककोशशैल्यनुसारमिह 'य्यानान्' इत्येवं युक्तः पाठो द्रष्टव्यः ।

येन॑ । वह॑सि । स॒हस्र॑म् । येन॑ । अ॒ग्ने॒ । स॒र्व्व॒वे॒द॒समिति॑सर्व्व [1]वे॒द॒सम् ॥ तेन॑ । इ॒मम् । य॒ज्ञम् । न॒ः । न॒य॒ । स्व॑ः । दे॒वेषु॑ । [2]गन्त॑वे ॥ तप॑ः । त॒प॒स्य॒ः । शै॒शि॒रौ । प॒र॒मे॒ष्ठी । प॒र॒मे॒स्थीति॑परमे स्थी । दि॒वः । सूर्य॑ः ॥५०॥

प्रोथ॑त् । अश्व॑ः । न । यव॑से । अ॒वि॒ष्यन् । य॒दा । म॒हः । स॒म्वर॑णा॒दिति॑स॒म् वर॑णात् । वि । अस्था॑त् ॥ आत् । अ॒स्य॒ । वात॑ः । अनु॑ । वा॒ति॒ । शो॒चिः । अध॑ । स्म॒ । ते॒ । व्रज॑नम् । कृ॒ष्णम् । अ॒स्ति॒ ॥५१॥

अ॒ग्ने॒ । य॒ज्ञम् । प॒र॒मे॒ष्ठी । प॒र॒मे॒स्थीति॑परमे स्थी ॥५०॥

अश्व॑ः । अ॒वि॒ष्यन् । अस्था॑त् । कृ॒ष्णम् ॥५१॥

य्येन॑ । य्येन॑ । स॒र्व्व॒वे॒द॒समिति॑सर्व्व वे॒द॒सम् । य्य॒ज्ञम् । न॒य॒ । [3]तप॑ः । [3]प॒र॒मे॒ष्ठी । सूर्य॑ः ॥५०॥

[4]प्रोथ॑त् । य्यव॑से । य्य॒दा । [5]स॒म्वर॑णा॒दिति॑स॒म् वर॑णात् । [6]व्व्रज॑न् ॥५१॥

---

१. 'वे॒द॒सम्' इति काशिकः पाठः ।

२. मुम्बईमुद्रित इह 'गन्त॑वे ॥५०॥ तप॑ः ......' इत्येवं कण्डिकाविच्छेदो दृश्यते । अत्र जायमानः कण्डिकासंख्याभेद आ अध्यायान्तं दृश्यते ।

३. इतः पूर्वस्या एकस्या मन्त्रकण्डिकायाः पूर्वं गतत्वान्नेह तत्पदानि पदपाठे पठ्यन्ते । 'तप॑ः' इत्येवाद्याः, 'प॒र॒मे॒ष्ठी' इत्येवमाद्याश्च मन्त्रकाण्डिकाया अपुनरुक्तानि त्रीणि त्रीणि पदान्येवेह पठ्यन्ते । अत इत आरभ्याष्टानां कण्डिकासंख्यानां भेदो ज्ञेयः ।

४. इतः पूर्वासां तिसृणां मन्त्रकण्डिकानां पूर्वं गतत्वान्नेह पदपाठे तासां पदानि पठ्यन्ते । अत इत आरभ्य एकादशकण्डिकासंख्याया भेदो द्रष्टव्यः ।

५. अपपाठोऽयम्, 'स॒म्वर॑णा॒दिति॑स॒म् वर॑णात्' इत्येवं शुद्धः पाठो ज्ञेयः ।

६. अपपाठोऽयं पाठान्तरं वेति विचार्यम् ।

आयोः । त्वा । सदने । सादयामि । अवतः । छायायाम् । समुद्रस्य । हृदये ॥ रश्मीवतीम् । रश्मिमवतीमितिरश्मिम वतीम् । भास्वतीम् । आ । या । द्याम् । भासि । आ । पृथिवीम् । आ । उरु । अन्तरिक्क्षम् ॥ परमेष्ठी । परमेस्त्थीतिपरमे स्थी । दिवम् । ध्रुवेऽइतिध्रुवे । सीदतम् ॥५२॥

सहस्रस्य । प्रमेतिप्र मा । असि । प्रतिमेतिप्रति मा । उद्धमेत्युत् मा । साहस्रः । सहस्राय । त्वा ॥५३॥

॥ इति वाजसनेयिसंहितापदे पञ्चदशोऽध्यायः ॥

समुद्रस्य । रश्मीवतीम् । रश्मिवतीमितिरश्मि वतीम् । अन्तरिक्षम् । परमेष्ठी । परमेस्थीतिपरमे स्थी । ध्रुवेऽइतिध्रुवे ॥५२॥

प्रमेतिप्र मा । प्रतिमेतिप्रति मा । उन्मेत्युत् मा ॥५३॥

आय्रोः । सादय्रामि । छाय्राय्राम् । हृदय्रे । रश्मिवतीमितिरश्मि वतीम् । द्या । [1]परमेष्ठी ॥५२॥

सहस्राय्र ॥५३॥

॥इति श्रीवाजसनेयिसंहितापदे पञ्चदशमो[2]ऽध्यायः ॥

●

---

१. अस्याः कण्डिकायाः कानिचिदेव पदान्यपुनरुक्तानि, तानि च पदपाठ इहैव पठ्यन्ते । अत इतोऽग्रे द्वादशकण्डिकासंख्याया भेदो ज्ञेयः ।

२. द्रष्टव्यं पूर्वत्र पृष्ठ १७९ टि० १ ।

षोडशोऽध्यायः

नम॑ः । ते॒ । रु॒द्र॒ । म॒न्यवे॑ । उ॒तोऽइत्त्यु॒तो । ते॒ । इष॑वे । नम॑ः ॥ बा॒हुब्भ्या॒मिति॑बा॒हु भ्याम् । उ॒त । ते॒ । नम॑ः ॥१॥

या । ते॒ । रु॒द्र॒ । शि॒वा । त॒नूः । अघो॑रा । अपा॑पकाशि॒नीत्त्यपा॑प काशि॒नी ॥ तया॑ । न॒ः । त॒न्वा॒ । शन्त॑मयेति॒शम् त॑मया । गिरि॑श॒न्तेति॒गिरि॑ शन्त । अ॒भि । चा॒क॒शी॒हि॒ ॥२॥

याम् । इषु॑म् । गि॒रि॒श॒न्ते॒ति॑गिरि शन्त । हस्ते॑ । बि॒भर्षि॑ । अस्त॑वे ॥ शि॒वाम् । गि॒रि॒त्त्रे॒ति॑गिरि त्र । ताम् । कु॒रु॒ । मा । हि॒ꣳसीः॒ । पुरु॑षम् । जग॑त् ॥३॥

शि॒वेन॑ । वच॑सा । त्वा॒ । गिरि॒शे॒ति॒गिरि॑ श । अच्छ॑ । व॒दा॒म॒सि॒ । यथा॑ । न॒ः । सर्व॑म् । इत् । जग॑त् । अ॒य॒क्ष्मम् । सु॒मना॒ऽइति॑सु मना॑ः । अस॑त् ॥४॥

रु॒द्र । म॒न्यवे॑ । उ॒तोऽइत्यु॒तो । बा॒हुभ्या॒मिति॑बा॒हु भ्याम् ॥१॥

रु॒द्र । अपा॑पकाशि॒नीत्यपा॑प काशि॒नी । त॒न्वा॒ ॥२॥

हस्ते॑ । अस्त॑वे । गि॒रि॒त्रे॒ति॑गिरि त्र ॥३॥

अच्छ॑ । अ॒य॒क्ष्मम् ॥४॥

भ्या । तया॑ । शन्त॑म॒येति॒शम् त॑मया ॥२॥

भ्याम् ॥३॥

भ्यथा॑ । अ॒य॒क्ष्मम् ॥४॥

अधि । अवोचत् । अधिवक्तेत्त्यधि वुक्ता । प्रथमः । दैव्यः । भिषक् ॥ अहीन् । च । सर्वान् । जम्भयन् । सर्वाः । च । यातुधान्यऽइतियातु धान्यः । अधराचीः । परा । सुव ॥५॥

असौ । यः । ताम्रः । अरुणः । उत । बभ्रुः । सुमङ्गलऽइतिसु मङ्गलः ॥ ये । च । एनम् । रुद्राः । अभितः । दिक्क्षु । श्रिताः । सहस्रशऽइतिसहस्र शः । अव । एषाम् । हेडः । ईमहे ॥६॥

असौ । यः । अवसर्प्पतीत्त्यव सर्प्पति । नीलग्ग्रीवऽइतिनील ग्रीवः । विलोहितऽइतिवि लोहितः ॥ उत । एनम् । गोपाः । अदृश्रन् । अदृश्रन् । उदहार्य्यऽइत्त्युद हार्य्यः । सः । दृष्टः । मृडयाति । नः ॥७॥

अधिवक्तेत्यधि वुक्ता । दैव्यः । यातुधान्यऽइतियातु धान्यः ॥५॥

ताम्रः । बभ्रुः । रुद्राः । दिक्षु ॥६॥

अवसर्प्पतीत्यव सर्प्पति । नीलग्रीवऽइतिनील ग्रीवः । अदृश्रन् । अदृश्रन् । उदहार्य्यऽइत्युद हार्य्यः । दृष्टः ॥७॥

---

[1]जभयन् । य्यातुधान्यऽइतिय्यातु[2] धान्यः ॥५॥

य्यः । य्ये ॥६॥

य्यः । ब्विलोहितऽइतिवि[3] लोहितः । उदहार्य्यऽइत्युद हार्य्यः । मृडय्याति ॥७॥

---

१. अपपाठोऽयं लेखकप्रमादजः । 'जम्भयन्' इत्येव शुद्धः पाठः ।

२. ककोशशैल्यनुसारमिह 'य्यातु' इत्येवं निर्देशेन भाव्यम् ।

३. ककोशशैल्यनुसारमिह 'ब्वि' इत्येवं पाठेन भाव्यम् ।

नमः । अस्तु । नीलग्रीवायेतिनील ग्रीवाय । सहस्राक्क्षायेतिसहस्र अक्क्षाय । मीढुषे ॥ अथोऽइत्त्यथो । ये । अस्य । सत्त्वानः । अहम् । तेब्भ्यः । अकरम् । नमः ॥८॥

प्र । मुञ्च । धन्न्वनः । त्वम् । उभयोः । आर्त्न्योः । ज्याम् ॥ याः । च । ते । हस्ते । इषवः । परा । ताः । भगवऽइतिभग वः । वप ॥९॥

विज्ज्यमितिवि ज्यम् । धनुः । कपर्दिनः । विशल्ल्यऽइतिवि शल्ल्यः । बाणवानितिबाण वान् । उत ॥ अनेशन् । अस्य । याः । इषवः । आभुः । अस्य । निषङ्गधिरितिनिषङ्ग धिः ॥१०॥

या । ते । हेतिः । मीढुष्टम । मीढुस्त्तमेतिमीढुः तम ।

नीलग्रीवायेतिनील ग्रीवाय । सहस्राक्षायेतिसहस्र अक्षाय । अथोऽइत्यथो । तेभ्यः ॥८॥

धन्वनः । हस्ते ॥९॥

विज्यमितिवि ज्यम् । विशल्यऽइतिवि शल्यः ॥१०॥

मीढुष्टम । मीढुस्तमेतिमीढुः तम । हस्ते । अस्मान् ।

नीलग्रीवाय्येतिनील ग्रीवाय्य । सहस्राक्षाय्येतिसहस्र अक्षाय्य । य्ये ॥८॥

उभय्योः । य्याः । भगवऽइतिभग वः ॥९॥

विज्यमितिवि[1] ज्यम् । विशल्यऽइतिवि[1] शल्य्यः । बाणवानितिबाण वान् । य्याः ॥१०॥

---

१. कशल्यनुसारमिह 'वि' इत्येवं पाठेन भाव्यम् ।

हस्ते । बभूव । ते । धनुः ॥ तया । अस्मान् । विश्वतः । त्वम् । अयक्ष्मया । परि । भुज ॥११॥

परि । ते । धन्वनः । हेतिः । अस्मान् । वृणक्तु । विश्वतः ॥ अथोऽइत्यथो । यः । इषुधिरितीषु धिः । तव । आरे । अस्मत् । नि । धेहि । तम् ॥१२॥

अवतत्येत्यव तत्य । धनुः । त्वम् । सहस्राक्षेति-सहस्र अक्ष । शतेषुधऽइतिशत इषुधे ॥ निशीर्य्येतिनि शीर्य्य । शल्यानाम् । मुखा । शिवः । नः । सुमनाऽइतिसु मनाः । भव ॥१३॥

नमः । ते । आयुधाय । अनातताय । धृष्णवे ॥ उभाभ्याम् । उत । ते । नमः । बाहुभ्यामितिबाहु भ्याम् । तव । धन्वने ॥१४॥

मा । नः । महान्तम् । उत । अर्भकम् । उक्षं-

विश्वतः । अयक्ष्मया ॥११॥
धन्वनः । अस्मान् । वृणक्तु । विश्वतः । अथोऽइत्यथो । अस्मत् ॥१२॥
अवतत्येत्यव तत्य । सहस्राक्षेतिसहस्र अक्ष । शल्यानाम् ॥१३॥
धृष्णवे । उभाभ्याम् । बाहुभ्यामितिबाहु भ्याम् । धन्वने ॥१४॥
अर्भकम् । उक्षन्तम् । उक्षितम् । तन्वः ॥१५॥

ड्या । तय्रा । अय्रक्ष्मय्रा ॥११॥
ड्यः ॥१२॥
निशीर्य्येतिनि शीर्य्य ॥१३॥
आयुधाय्र । अनातताय्र ॥१४॥

न्तम् । उक्षितम् ॥ वधीः । पितरम् । मातरम् । प्रियाः । तन्वः । रुद्र । रीरिषः । रिरिषऽइतिरिरिषः ॥१५॥

तोके । तनये । आयुषि । गोषु । अश्वेषु । रीरिषः । रिरिषऽइतिरिरिषः ॥ वीरान् । रुद्र । भामिनः । वधीः । हविष्मन्तः । सदम् । इत् । त्वा । हवामहे ॥१६॥

हिरण्यबाहवऽइतिहिरण्य बाहवे । सेनान्यऽइतिसेना न्ये । दिशाम् । च । पतये । वृक्षेभ्यः । हरिकेशेभ्यऽइतिहरि केशेभ्यः । पशूनाम् । शष्पिञ्जराय । त्विषीमते । त्विषिमतऽइतित्विषि मते । पथीनाम् । हरिकेशायेतिहरि केशाय । उपवीतिनऽइत्युप वीतिने । पुष्टानाम् ॥१७॥

बभ्लुशाय । व्याधिने । अन्नानाम् । भवस्य । हेत्यै । जगताम् । रुद्राय । आततायिनऽइत्याततं अयिने । क्षेत्राणाम् । सूताय । अहन्त्यै । वनानाम् ॥१८॥

अश्वेषु । रुद्र । हविष्मन्तः ॥१६॥

हिरण्यबाहवऽइतिहिरण्य बाहवे । वृक्षेभ्यः । हरिकेशेभ्यऽइतिहरि केशेभ्यः । शष्पिञ्जराय । त्विषिमतऽइतित्विषि मते । उपवीतिनऽइत्युप वीतिने । पुष्टानाम् ॥१७॥

बभ्लुषाय । रुद्राय । आततायिनऽइत्याततं अयिने । क्षेत्राणाम् ॥१८॥

प्रिया? ॥१५॥

[1]तनये । आयुषि ॥१६॥

पतये । शष्पिञ्जराय । हरिकेशायेतिहरि केशाय ॥१७॥

बभ्लुशाय । व्याधिने । रुद्राय । आततायिनऽइत्याततं अयिने । सूताय ॥१८॥

---

१. अपपाठोऽयम्, ककोशेऽन्यत्रापि 'तनय' शब्द आद्युदात्त एवोपलभ्यते।

रोहिताय । स्थपतये । वृक्षाणाम् । भुवन्तये । वारिवस्कृताय । वारिवःकृतायेतिवारिवः कृताय । ओषधीनाम् । मन्त्रिणे । वाणिजाय । कक्षाणाम् । उच्चैर्घोषायेत्युच्चैः घोषाय । आक्रन्दयतऽइत्या क्रन्दयते । पत्तीनाम् ॥१९॥

कृत्स्नायतयेतिकृत्स्न [1]आयतया । धावते । सत्वनाम् । सहमानाय । निव्याधिनऽइतिनि व्याधिने । आव्याधिनीनामित्या व्याधिनीनाम् । निषङ्गिणे । ककुभाय । स्तेनानाम् । निचेरवऽइतिनि चेरवे । परिचरायेतिपरि चराय । अरण्यानाम् ॥२०॥

वञ्चते । परिवञ्चतऽइतिपरि वञ्चते । स्तायूनाम् । निषङ्गिणे । इषुधिमतऽइतीषुधि मते । तस्कराणाम् । सृका-

---

वृक्षाणाम् । कक्षाणाम् । उच्चैर्घोषायेत्युच्चैः घोषाय । आक्रन्दयतऽइत्या क्रन्दयते ॥१९॥

कृत्स्नायतयेतिकृत्स्न आयतया । सत्वनाम् । आव्याधिनीनामित्या व्याधिनीनाम् । अरण्यानाम् ॥२०॥

तस्कराणाम् । सृकायिभ्यऽइतिसृकायि भ्यः । मुष्णताम् ।

रोहिताय । स्थपतये । भुवन्तये । वारिवस्कृताय । वारिवःकृतायेतिवारिवः कृताय । वाणिजाय । उच्चैर्घोषायेत्युच्चैः घोषाय । आक्रन्दयतऽइत्या क्रन्दयते ॥१९॥

कृत्स्नायतयेतिकृत्स्न आयतया । सहमानाय । निव्याधिनऽइतिनि व्याधिने । आव्याधिनीनामित्या व्याधिनीनाम् । ककुभाय । परिचरायेतिपरि चराय ॥२०॥

परिवञ्चतऽइतिपरि वञ्चते । स्तायूनाम् । सृकायिभ्यऽइति-

---

१. 'आयतया' इति काशिकः पाठः ।

यिभ्य॒ऽइति॑सृका॒यि भ्यः॑ । जि॒घा॒ꣳस॒द्भ्य॒ऽइति॑जि॒घा॒ꣳसत् भ्यः॑ । मु॒ष्ण॒ताम् । अ॒सि॒मद्भ्य॒ऽइत्य॑सि॒मत् भ्यः॑ । न॒क्तम् । चर॑द्भ्य॒ऽइति॒चर॑त् भ्यः॑ । वि॒कृ॒न्ता॒ना॒मिति॑वि कृ॒न्ता॒नाम् ॥२१॥

उ॒ष्णी॒षिणे॑ । गि॒रि॒च॒राये॒ति॑गि॒रि च॒राय॑ । कु॒लु॒ञ्चा-नाम् । इ॒षु॒मद्भ्य॒ऽइती॑षु॒मत् भ्यः॑ । ध॒न्वा॒यिभ्य॒ऽइति॑ध॒न्वा॒यि भ्यः॑ । च॒ । वः॒ । आ॒त॒न्वा॒नेभ्य॒ऽइत्या॑ [1]त॒न्वा॒नेभ्यः॑ । प्र॒ति॒द॒धा॒नेभ्य॒ऽइति॑प्र॒ति द॒धा॒नेभ्यः॑ । आ॒य॒च्छ॒द्भ्य॒ऽइत्या॒य॒च्छ॒द् भ्यः॑ । अ॒स्य॒द्भ्य॒ऽइत्य॒स्य॒त् भ्यः॑ ॥२२॥

वि॒सृ॒जद्भ्य॒ऽइति॑वि॒सृ॒जत् भ्यः॑ । वि॒द्ध्य॒द्भ्य॒ऽइति॑वि॒द्ध्य॒त् भ्यः॑ । स्व॒प॒द्भ्य॒ऽइति॑स्व॒पत् भ्यः॑ । जा॒ग्र॒द्भ्य॒ऽइति॑जा॒ग्रत्

जिघा॑ꣳसद्भ्य॒ऽइति॑जि॒घा॑ꣳसत् भ्यः॑ । अ॒सि॒मद्भ्य॒ऽइत्य॑सि॒मत् भ्यः॑ । नक्त॑म् । चर॑द्भ्य॒ऽइति॒चर॑त् भ्यः॑ ॥२१॥

उ॒ष्णी॒षिणे॑ । इ॒षु॒मद्भ्य॒ऽइती॑षु॒मत् भ्यः॑ । ध॒न्वा॒यिभ्य॒ऽइति॑ध॒न्वा॒यि भ्यः॑ । आ॒त॒न्वा॒नेभ्य॒ऽइत्या॑ त॒न्वा॒नेभ्यः॑ । प्र॒ति॒द॒धा॒नेभ्य॒ऽइति॑प्र॒ति द॒धा॒नेभ्यः॑ । आ॒य॒छ॒द्भ्य॒ऽइत्या॒य॒छ॒द् भ्यः॑ । अ॒स्य॒द्भ्य॒ऽइत्य॒स्य॒त् भ्यः॑ ॥२२॥

वि॒सृ॒जद्भ्य॒ऽइति॑वि॒सृ॒जत् भ्यः॑ । वि॒ध्य॒द्भ्य॒ऽइति॑वि॒ध्य॒त् भ्यः॑ । स्व॒प॒द्भ्य॒ऽइति॑स्व॒पत् भ्यः॑ । जा॒ग्र॒द्भ्य॒ऽइति॑जा॒ग्रत् भ्यः॑ । शया॑नेभ्यः॑ ।

सृ॒का॒ग्नि भ्यः॑ । वि॒कृ॒न्ता॒ना॒मिति॑वि[2] कृ॒न्ता॒नाम् ॥२१॥

गि॒रि॒च॒राग्नेति॑गि॒रि च॒राग्न॑ । ध॒न्वा॒ग्निभ्य॒ऽइति॑ध॒न्वा॒ग्नि भ्यः॑ । व॒ः । आ॒य॒ग्न॒छ॒द्भ्य॒ऽइत्या॒य॒ग्न॒छ॒द् भ्यः॑ ॥२२॥

वि॒सृ॒जद्भ्य॒ऽइति॑वि॒सृ॒जद् भ्यः॑ । वि॒ध्य॒द्भ्य॒ऽइति॑वि॒ध्य॒द् भ्यः॑ ।

---

१. 'त॒न्वा॒नेभ्यः॑' इति काशिकः पाठः ।

२. ककोशशैल्यनुसारमिह 'वि' इति द्विवकारेण भाव्यम् ।

भ्यः । शयानेभ्यः । आसीनेभ्यः । तिष्ठद्भ्य इतितिष्ठत् भ्यः । धावद्भ्य इतिधावत् भ्यः ॥२३॥

सभाभ्यः । सभापतिभ्य इतिसभापति भ्यः । अश्वेभ्यः । अश्वपतिभ्य इत्यश्वपति भ्यः । आव्याधिनीभ्य इत्याव्याधिनीभ्यः । विविध्यन्तीभ्य इतिवि विध्यन्तीभ्यः । उगणाभ्यः । तृंहतीभ्यः ॥२४॥

गणेभ्यः । गणपतिभ्य इतिगणपति भ्यः । व्रातेभ्यः । व्रातपतिभ्य इतिव्रातपति भ्यः । गृत्सेभ्यः ।

आसीनेभ्यः । तिष्ठद्भ्य इतितिष्ठत् भ्यः । धावद्भ्य इतिधावत् भ्यः ॥२३॥

सभाभ्यः । सभापतिभ्य इतिसभापति भ्यः । अश्वेभ्यः । अश्वपतिभ्य इत्यश्वपति भ्यः । आव्याधिनीभ्य इत्याव्याधिनीभ्यः । विविध्यन्तीभ्य इतिवि विध्यन्तीभ्यः । उगणाभ्यः । तृंहतीभ्यः ॥२४॥

गणेभ्यः । गणपतिभ्य इतिगणपति भ्यः । व्रातेभ्यः । व्रातपतिभ्य इतिव्रातपति भ्यः । गृत्सेभ्यः । गृत्सपतिभ्य इतिगृत्सपति भ्यः ।

शयानेभ्यः ॥२३॥

आव्याधिनीभ्य इत्याव्याधिनीभ्यः । विविध्यन्तीभ्य इतिविवि[1] ध्यन्तीभ्यः ॥२४॥

व्रातपतिभ्य इतिव्रातपति[2] भ्यः । [3]गृत्सेभ्यः । [3]गृत्सपतिभ्य-

---

१. लेखकप्रमादजोऽस्थानेऽवग्रहनिर्देशः, '०इतिवि विध्यन्तीभ्यः' इत्येवं शुद्धः पाठो द्रष्टव्यः ।

२. अपपाठोऽयम्, '०इतिव्रातपति भ्यः' इति शुद्धः पाठो ज्ञेयः ।

३. उत्सवत्सशब्दवत् (द्र० पूर्वत्र पृष्ठ २१३ टि० २) 'गृत्स' शब्देऽपि द्वितीयवर्णापत्तिर्न दृश्यते । 'गृत्सेभ्यः' इत्येवं स्वरस्थाने 'गृत्सेभ्यः' इति शुद्धः स्वरो ज्ञेयः । अग्रिमपदे साधुस्वर एवोपलभ्यते ।

गृत्त्सपतिभ्य॒ऽइति॒गृत्त्सपति भ्यः । वि॒रूपेभ्य॒ऽइति॒वि रूपे-भ्यः । वि॒श्वरूपेभ्य॒ऽइतिंवि॒श्व रूपेभ्यः ॥२५॥

सेनाभ्यः । से॒ना॒निभ्य॒ऽइतिंसे॒ना॒नि भ्यः । र॒थिभ्य॒ऽइतिंर॒थि भ्यः । अ॒र॒थेभ्यः । क्ष॒त्तृभ्य॒ऽइतिंक्क्षत्तृ भ्यः । स॒ङ्ग्र॒ही॒तृभ्य॒ऽइतिंसङ्ग्र॒ही॒तृ भ्यः । म॒हद्भ्य॒ऽइतिंम॒हत् भ्यः । अ॒र्भ॒केभ्यः ॥२६॥

तक्क्षभ्य॒ऽइति॒तक्क्ष भ्यः । र॒थ॒का॒रेभ्य॒ऽइतिंरथ का॒रेभ्यः । कुला॒लेभ्यः । क॒र्म्मा॒रेभ्यः । नि॒षा॒देभ्यः । नि॒सा॒देभ्य॒ऽइतिंनि सा॒देभ्यः । पु॒ञ्जिष्ठेभ्यः । श्व॒निभ्य॒ऽइतिंश्व॒नि भ्यः । मृ॒ग॒युभ्य॒ऽइतिंमृ॒ग॒यु भ्यः ॥२७॥

श्वभ्य॒ऽइति॒श्व भ्यः । श्वप॑तिभ्य॒ऽइति॒श्वप॑ति भ्यः ।

वि॒रूपेभ्य॒ऽइति॒वि रूपेभ्यः । वि॒श्वरूपेभ्य॒ऽइतिंवि॒श्व रूपेभ्यः ॥२५॥

सेनाभ्यः । से॒ना॒निभ्य॒ऽइतिंसे॒ना॒नि भ्यः । र॒थिभ्य॒ऽइतिंर॒थि भ्यः । अ॒र॒थेभ्यः । क्ष॒त्तृभ्य॒ऽइतिंक्ष॒त्तृ भ्यः । स॒ङ्ग्र॒ही॒तृभ्य॒ऽइतिंसङ्ग्र॒ही॒तृ भ्यः । म॒हद्भ्य॒ऽइतिंम॒हत् भ्यः । अ॒र्भ॒केभ्यः ॥२६॥

तक्षभ्य॒ऽइति॒तक्ष भ्यः । र॒थ॒का॒रेभ्य॒ऽइतिंरथ का॒रेभ्यः । कुला॒लेभ्यः । क॒र्म्मा॒रेभ्यः । नि॒षा॒देभ्यः । नि॒सा॒देभ्य॒ऽइतिंनि सा॒देभ्यः । पु॒ञ्जिष्ठेभ्यः । श्व॒निभ्य॒ऽइतिंश्व॒नि भ्यः । मृ॒ग॒युभ्य॒ऽइतिंमृ॒ग॒यु भ्यः ॥२७॥

श्वभ्य॒ऽइति॒श्व भ्यः । श्वप॑तिभ्य॒ऽइति॒श्वप॑ति भ्यः । रु॒द्राय॑ । नील॑ग्री-

---

ऽइति॒गृत्सपति भ्यः । वि॒रूपेभ्य॒ऽइति॒वि रूपेभ्यः । वि॒श्वरूपेभ्य॒ऽइतिंवि॒श्व रूपेभ्यः ॥२५॥

मृ॒ग॒युभ्य॒ऽइतिंमृ॒ग॒यु भ्यः ॥२७॥

भवाय । रुद्राय । शर्वाय । पशुपतयऽइतिपशु पतये । नील-ग्रीवायेतिनील ग्रीवाय । शितिकण्ठायेतिशिति कण्ठाय ॥२८॥

कपर्दिने । व्युप्तकेशायेतिव्युप्त केशाय । सहस्रा-क्षायेतिसहस्र अक्षाय । शतधन्वनऽइतिशत धन्वने । गिरिशयायेतिगिरि शयाय । शिपिविष्टायेतिशिपि विष्टाय । मीढुष्टमाय । मीढुस्तमायेतिमीढुः तमाय । इषुमतऽइतीषु मते ॥२९॥

ह्रस्वाय । वामनाय । बृहते । वर्षीयसे । वृद्धाय । सवृधऽइतिस वृधे । अग्र्याय । प्रथमाय ॥३०॥

वायेतिनील ग्रीवाय ॥२८॥

व्युप्सकेशायेतिव्युप्स केशाय । सहस्राक्षायेतिसहस्र अक्षाय । शतधन्वन-ऽइतिशत धन्वने । शिपिविष्टायेतिशिपि विष्टाय । मीढुष्टमाय । मीढुस्तमायेति-मीढु? तमाय ॥२९॥

वृद्धाय । अग्र्याय ॥३०॥

भवाय्र । रुद्राय्र । शर्वाय्र । पशुपतय्रऽइतिपशु पतय्रे । नीलग्रीवाय्रेति-नील ग्रीवाय्र । शितिकण्ठाय्रेतिशति[1] कण्ठाय्र ॥२८॥

व्युप्सकेशाय्रेतिव्युप्स केशाय्र । सहस्राक्षाय्रेतिसहस्र अक्षाय्र । शत-धन्व[2]ऽइतिशत धन्वने । गिरिशय्राय्रेतिगिरि शय्राय्र । शिपिविष्टाय्रेतिशिपि विष्टाय्र । मीढुष्टमाय्र । मीढुस्तमाय्रेतिमीढु? तमाय्र ॥२९॥

ह्रस्वाय्र । वामनाय्र । वर्षीय्रसे । वृद्धाय्र । सवृधऽइतिस वृधे । अग्र्याय्र । प्रथमाय्र ॥३०॥

---

१. '०शति' अपपाठोऽयं लेखकप्रमादजः, '०शिति' इत्येव साधुपाठः ।

२. अपपाठोऽयम्, 'शतधन्वन्' इति शुद्धः पाठो द्रष्टव्यः ।

आशवे । अजिराय । शीग्घ्र्याय । शीब्भ्याय । ऊम्म्याय । अवस्वन्न्याय्येत्त्यव स्वन्न्याय । नादेयाय । द्वीप्प्याय ॥३१॥

ज्येष्ठाय । कनिष्ठाय । पूर्व्वजायेतिपूर्व्व जाय । अपरजायेत्त्यपर जाय । मद्ध्यमाय । अपगल्भायेत्त्यप गल्भाय । जघन्न्याय । बुद्ध्न्याय ॥३२॥

सोब्भ्याय । प्रतिसर्य्याय्येतिप्प्रति सर्य्याय । याम्म्याय । क्षेम्म्याय । श्लोक्क्याय । अवसान्न्याय्येत्त्यव सान्न्याय । ऊर्व्वर्य्याय । खल्ल्याय ॥३३॥

शीघ्र्याय । शीभ्याय । अवस्वन्याय्येत्यव स्वन्याय । द्वीप्याय ॥३१॥

ज्येष्ठाय । कनिष्ठाय । अपरजायेत्यपर जाय । मध्यमाय । अपगल्भायेत्यप गल्भाय । जघन्याय । बुध्न्याय ॥३२॥

सोभ्याय । प्रतिसर्य्याय्येतिप्रति सर्य्याय । याम्याय । क्षेम्याय । श्लोक्याय । अवसान्याय्येत्यव सान्याय । खल्याय ॥३३॥

अजिराय । शीघ्र्याय । शीभ्याय । ऊर्म्याय । अवस्वन्याय्येत्यव स्वन्याय । नादेयाय । द्वीप्याय ॥३१॥

ज्येष्ठाय । कनिष्ठाय । पूर्वजायेतिपूर्व जाय । अपरजायेत्यपर जाय । मध्यमाय । अपगल्भायेत्यप गल्भाय । जघन्याय । बुध्न्याय ॥३२॥

सोभ्याय । प्रतिसर्य्याय्येतिप्रति सर्य्याय । याम्याय । क्षेम्याय । श्लोक्याय । अवसान्याय्येत्यव सान्याय । [1]ऊर्वर्य्याय । खल्याय ॥३३॥

---

१. प्रमादपाठोऽयं स्वरभेदनिमित्तकं पाठान्तरं वेति विचारार्हम्, उभयथाऽपि सम्भवात् ।

वन्ध्याय । कक्क्ष्याय । श्रवाय । प्रतिश्रवायेतिप्रति श्रवाय । आशुषेणाय । आशुसेनायेत्याशु सेनाय । आशुरथायेत्याशु रथाय । शूराय । अवभेदिनऽइत्यव भेदिने ॥३४॥

बिल्मिने । कवचिने । वर्म्मिणे । वरूथिने । श्रुताय श्रुतसेनायेतिश्रुत सेनाय । दुन्दुभ्याय । आहनन्यायेत्या [1]हनन्याय ॥३५॥

धृष्णवे । प्रमृशायेतिप्र मृशाय । निषङ्गिणे । इषुधिमतऽइतीषुधि मते । तीक्ष्णेषवऽइतितीक्ष्ण इषवे । आयुधिने । स्वायुधायेतिसु [2]आयुधाय । सुधन्वनऽइतिसु धन्वने ॥३६॥

वन्याय । कक्ष्याय । प्रतिश्रवायेतिप्रति श्रवाय । आशुसेनायेत्याशु सेनाय । आशुरथायेत्याशु रथाय । अवभेदिनऽइत्यव भेदिने ॥३४॥

बिल्मिने । श्रुतसेनायेतिश्रुत सेनाय । दुन्दुभ्याय । आहनन्यायेत्या हनन्याय ॥३५॥

धृष्णवे । प्रमृशायेतिप्र मृशाय । सुधन्वनऽइतिसु धन्वने ॥३६॥

वन्याय । कक्ष्याय । श्रवाय । प्रतिश्रवायेतिप्रति श्रवाय । आशुषेणाय । आशुसेनायेत्याशु सेनाय । आशुरथायेत्याशु रथाय । शूराय ॥३४॥

श्रुताय । श्रुतसेनायेतिश्रुत सेनाय । दुन्दुभ्याय । आहनन्यायेत्या हनन्याय ॥३५॥

प्रमृशायेतिप्र मृशाय । स्वायुधायेतिसु आयुधाय ॥३६॥

---

१. 'हनन्न्याय' इति काशिकः पाठः ।
२. 'आयुधाय' इति काशिकः पाठः ।

स्रुत्त्याय । पत्थ्याय । काट्य्याय । नीप्प्याय । कुल्ल्याय । सरस्याय । नादेयाय । वैशन्ताय ॥३७॥

कूप्प्याय । अवट्य्याय । वीद्ध्यायेतिवि ईद्ध्याय । आतप्प्यायेत्त्या १तप्प्याय । मेग्घ्याय । विद्युत्त्यायेतिवि द्युत्त्याय । वर्ष्याय । अवर्ष्याय ॥३८॥

वात्त्याय । रेष्म्याय । वास्तव्याय । वास्तुपायेतिवास्तु पाय । सोमाय । रुद्राय । ताम्राय । अरुणाय ॥३९॥

स्रुत्याय । पथ्याय । काव्याय । नीप्याय । कुल्याय ॥३७॥

कूप्याय । अवट्याय । २वीध्र्यायेतिवि ईध्र्याय । आतप्यायेत्या तप्याय । मेघ्याय । विद्युत्यायेतिवि द्युत्याय ॥३८॥

वात्याय । वास्तव्याय । वास्तुपायेतिवास्तु पाय । रुद्राय । ताम्राय ॥३९॥

स्रुत्यांय । पथ्यांय । काव्यांय । नीप्यांय । कुल्यांय । सरस्यांय । नादेयांय । वैशन्तांय ॥३७॥

कूप्यांय । अवट्यांय । ३वीध्र्यायेतिवि ईध्र्यांय । आतप्यायेत्या तप्यांय । मेघ्यांय । विद्युत्यायेतिवि द्युत्यांय । वर्ष्यांय । अवर्ष्यांय ॥३८॥

वात्यांय । रेष्म्यांय । वास्तव्यांय । वास्तुपायेतिवास्तु पांय । सोमांय । रुद्रांय । ताम्रांय । अरुणांय ॥३९॥

---

१. 'तप्प्याय' इति काशिकः पाठः ।

२. बम्बईमुद्रितेऽपपाठोऽयं स्वरभेदनिमित्तः पाठभेदो वेति विचारार्हः ।

३. 'वीध्र्यायेतिवि ईध्र्यांय' इत्येवं शुद्धः स्वरपाठो ज्ञेयः । यद्वा बम्बईमुद्रितवत् पाठो द्रष्टव्यः । अत्र पूर्वा टिप्पणी द्रष्टव्या ।

शङ्गवऽइतिशम् गवे । पशुपतयऽइतिपशु पतये । उग्ग्रायं । भीमायं । अग्ग्रेवधायेत्यग्ग्रे वधायं । दूरेवधायेतिदूरे वधायं । हन्त्रे । हनीयसे । वृक्क्षेब्भ्यंः । हरिकेशेब्भ्यऽइतिहरि केशेब्भ्यः । तारायं ॥४०॥

शम्भवायेतिशम् भवायं । मयोभवायेतिमयः भवायं । शङ्करायेतिशम् करायं । मयस्करायं । मयःकरायेतिमयः करायं । शिवायं । शिवतरायेतिशिव तराय ॥४१॥

पाब्र्याय । अवाब्र्याय । प्रतरणायेतिप्प्र तरणाय । उत्त्तरणायेत्युत् तरणाय। तीत्थ्र्याय । कूल्ल्याय । शष्प्प्याय । फेन्न्याय ॥४२॥

उग्रायं । अग्रेवधायेत्यग्रे वधायं । वृक्षेभ्यंः । हरिकेशेभ्यऽइतिहरि केशेभ्यः ॥४०॥

मयस्करायं ॥४१॥

प्रतरणायेतिप्र तरणाय । उत्तरणायेत्युत् तरणाय । तीर्थ्याय । कूल्याय । शष्प्याय । फेन्याय ॥४२॥

पशुपतय्रऽइतिपशु पतय्रे । उग्राय्रं । भीमाय्रं । अग्रेवधाय्रेत्यग्रे वधाय्रं । दूरेवधाय्रेतिदूरे वधाय्रं । हनीय्रसे । ताराय्रं ॥४०॥

शम्भवाय्रेतिशम् भवाय्रं । मय्रोभवाय्रेतिमय्रः भवाय्रं । शङ्करा्य्रेतिशम् करा्य्रं । मय्रस्करा्य्रं । मय्रःकरा्य्रेतिमय्रः करा्य्रं । शिवाय्रं । शिवतराय्रेतिशिव तराय्र ॥४१॥

पार्य्याय्र । अवार्य्याय्र । प्रतरणाय्रेतिप्र तरणाय्र । उत्तरणाय्रेत्युत् तरणाय्र । तीर्थ्याय्र । [1]कुल्याय्र । [2]शब्याय्र । फेन्याय्र ॥४२॥

---

१. लेखकप्रमादजोऽपपाठः, 'कुल्याय्र' इत्यस्य पूर्वत्र (१६।३७) गतत्वात् ।

२. अपपाठोऽयम्, 'शष्प्याय' इति शुद्धः पाठो ज्ञेयः ।

सिकत्त्याय । प्रवाह्ष्याायेतिंप्र वाह्ष्याय । किंशिलार्यं । क्षयणार्यं । कपर्दिने । पुलस्तये । इरिण्ण्याय । प्रपत्थ्याायेतिंप्र [1]पत्थ्याय ॥४३॥

व्रज्ज्याय । गोष्ठ्याय । गोस्त्थ्यायेतिगो स्थ्याय । तल्प्याय । गेह्ष्याय । हृदुय्याय । निवेष्प्यायेतिंनि वेष्प्याय । काट्याय । गह्वरेष्ठाय । गह्वरेस्त्थायेतिंगह्वरे स्थाय ॥४४॥

शुष्क्क्याय । हरित्त्याय । पांसव्याय । रजस्याय । लोप्प्याय । उलप्प्याय । ऊर्व्याय । सूर्व्यायेतिसु ऊर्व्याय ॥४५॥

सिकत्याय । प्रवाह्यायेतिंप्र वाह्याय । इरिण्याय । प्रपथ्यायेतिंप्र पथ्याय ॥४३॥

व्रज्याय । गोष्ठ्याय । गोस्थ्यायेतिगो स्थ्याय । तल्प्याय । गेह्याय । हृदय्याय । निवेष्प्यायेतिंनि वेष्प्याय । काट्याय । गह्वरेष्ठाय । गह्वरेस्थायेतिंगह्वरे स्थाय ॥४४॥

शुष्क्याय । हरित्याय । पांसव्याय । लोप्याय ॥४५॥

सिकत्याय । [2]प्रवाह्यायेतिंप्र वाह्याय । किंशिलाय । क्षयणाय । पुलस्तये । इरिण्याय । प्रपथ्यायेतिंप्र पथ्याय ॥४३॥

व्रज्याय । गोष्ठ्याय । गोस्थ्यायेतिगो स्थ्याय । तल्प्याय । गेह्याय । हृदय्याय । निवेष्प्यायेतिंनि वेष्प्याय । काट्याय । गह्वरेष्ठाय । गह्वरेस्थायेतिंगह्वरे स्थाय ॥४४॥

शुष्क्याय । हरित्याय । पांसव्याय । रजस्याय । लोप्याय । उलप्याय । ऊर्व्याय । सूर्व्यायेतिसु [3]ऊर्व्याय ॥४५॥

---

१. 'पत्थ्याय' इति काशिकः पाठः ।

२. अपपाठोऽयम्, 'प्रवाह्यायेतिंप्र' इति साधुः पाठो द्रष्टव्यः ।

३. अपपाठोऽयम्, 'ऊर्व्याय' इति युक्तः स्वरसंचारो ज्ञेयः ।

पर्णाय । पर्णशदायेतिपर्ण शदाय । उद्गुरमाणायेत्युत् गुरमाणाय । अभिघ्नतऽइत्यभि घ्नते । आखिदतऽइत्या [1]खिदते । प्रखिदतऽइतिप्र [1]खिदते । इषुकृद्भ्यऽइतीषुकृत् भ्यः । धनुष्कृद्भ्यः । धनुष्कृद्भ्यऽइतिधनुःकृत् भ्यः । किरिकेभ्यः । देवानाम् । हृदयेभ्यः । विचिन्वत्केभ्यऽइतिवि [2]चिन्वत्केभ्यः । विक्षिणत्केभ्यऽइतिवि [3]क्षिणत्केभ्यः । आनिर्हतेभ्यऽइत्यानिः हतेभ्यः ॥४६॥

द्रापे । अन्धसः । पते । दरिद्र । नीललोहितेतिनील लोहित ॥ आसाम् । प्रजानामितिप्र जानाम् । एषाम् । पशूनाम् । मा । भेः । मा । रोक् । मोऽइतिमो । च । नः । किम् । चन । आममत् ॥४७॥

पर्णाय । पर्णशदायेतिपर्ण शदाय । उद्गुरमाणायेत्युत् गुरमाणाय । अभिघ्नतऽइत्यभि घ्नते । आखिदतऽइत्या खिदते । प्रखिदतऽइतिप्र खिदते । इषुकृद्भ्यऽइतीषुकृत् भ्यः । धनुष्कृद्भ्यः । धनुःकृद्भ्यऽइतिधनुः कृद्भ्यः । किरिकेभ्यः । हृदयेभ्यः । विचिन्वत्केभ्यऽइतिवि चिन्वत्केभ्यः । विक्षिणत्केभ्यऽइतिवि क्षिणत्केभ्यः । आनिर्हतेभ्यऽइत्यानिः हतेभ्यः ॥४६॥

दरिद्र । प्रजानामितिप्र जानाम् ॥४७॥

पर्णाय । पर्णशदायेतिपर्ण शदाय । उद्गुरमाणायेत्युत् गुरमाणाय । अभिघ्न[4]ऽइत्यभि घ्नते । हृदयेभ्यः ॥४६॥

नीललोहितिनील[5] लोहित ॥४७॥

---

१. 'खिदते' इति काशिकः पाठः ।

२. 'चिन्वत्केभ्यः' इति काशिकः पाठः ।

३. 'क्षिणत्केभ्यः' इति काशिकः पाठः ।

४. अपपाठोऽयम्, 'अभिघ्नत' इति शुद्धः पाठो ज्ञेयः ।

५. अपपाठोऽयम्, 'नीललोहितेतिनील' इति शुद्धः पाठो ज्ञेयः ।

इमाः । रुद्राय । तवसे । कपर्दिने । क्षयद्वीरायेतिक्षयत् वीराय । प्र । भरामहे । मतीः ॥ यथा । शम् । असत् । द्विपदऽइतिद्वि पदे । चतुष्पदे । चतुःपदऽइति-चतुः पदे । विश्वम् । पुष्टम् । ग्रामे । अस्मिन् । अनातुरम् ॥४८॥

या । ते । रुद्र । शिवा । तनूः । शिवा । विश्वाहा । भेषजी ॥ शिवा । रुतस्य । भेषजी । तया । नः । मृड । जीवसे ॥४९॥

परि । नः । रुद्रस्य । हेतिः । वृणक्तु । परि । त्वेषस्य । दुर्म्मतिरितिदुः मतिः । अघायोः । अघयोरित्यघ योः ॥ अव । स्थिरा । मघवद्भ्यऽइतिमघवत् भ्यः । तनुष्व । मीढ्वः । तोकाय । तनयाय । मृड ॥५०॥

रुद्राय । क्षयद्वीरायेतिक्षयत् वीराय । द्विपदऽइतिद्वि पदे । चतुष्पदे । विश्वम् । पुष्टम् । अस्मिन् ॥४८॥

रुद्र । विश्वाहा ॥४९॥

रुद्रस्य । वृणक्तु । अघयोरित्यघ योः । मघवद्भ्यऽइतिमघवत् भ्यः । तनुष्व । मीढ्वः ॥५०॥

रुद्राय । क्षयद्वीरायेतिक्षयत् वीराय । यथा ॥४८॥

या । तया ॥४९॥

अघायोः । अघयोरित्यघ [1]योः । तोकाय । तनयाय ॥५०॥

---

१. कपाठशैल्यनुसारमिह 'योः' इति शुद्धः पाठो द्रष्टव्यः ।

मीढुंष्टम । मीढुंस्तमेतिमीढुं॑ः तम । शिवंतमेतिशिवं तम । शिवः । नः । सुमनाऽइतिसु मनाः । भव ॥ परमे । वृक्क्षे । आयुधम् । निधायेतिनि धार्य । कृत्तिम् । वसानः । आ । चर । पिनाकम् । बिभ्रत् । आ । गहि ॥५१॥

विकिरिद्रेतिवि किरिद्र । विलोहितेतिवि लोहित । नमः । ते । अस्तु । भगवऽइतिभग वः ॥ याः । ते । सहस्रम् । हेतयः । अन्यम् । अस्मत् । नि । वपन्तु । ताः ॥५२॥

सहस्राणि । सहस्रशऽइतिसहस्र शः । बाह्वोः । तव । हेतयः ॥ तासाम् । ईशानः । भगवऽइतिभग वः । पराचीना । मुखा । कृधि ॥५३॥

असङ्ख्यातेत्त्यसंम् ख्याता । सहस्राणि । ये । रुद्राः ।

मीढुंष्टम । वृक्षे । बिभ्रत् ॥५१॥

विकिरिद्रेतिवि किरिद्र । अन्यम् । अस्मत् ॥५२॥

बाह्वोः ॥५३॥

असङ्ख्यातेत्यसंम् ख्याता । रुद्राः । भूम्याम् । धन्वानि ।

आयुधम् । निधायेतिनि धार्य ॥५१॥

विकिरिद्रेतिवि किरिद्र । विलोहीतेतिवि[1] लोहित । भगवऽइतिभग वः । या । हेतय ॥५२॥

हेतयः । भगवऽइतिभग वः ॥५३॥

---

१. अपपाठोऽयम्, 'विलोहितेतिवि' इत्येवं शुद्धः पाठो द्रष्टव्यः ।

अधि । भूम्म्याम् ॥ तेषाम् । सहस्रयोजनऽइतिसहस्र [1]स्रोजने । अव । धन्न्वानि । तन्नमसि ॥५४॥

अस्म्मिन् । महति । अर्ण्णवे । अन्तरिक्क्षे । भवाः । अधि ॥५५॥

नीलग्ग्रीवाऽइतिनील ग्रीवाः । शितिकण्ठाऽइतिशिति कण्ठाः । दिवम् । रुद्राः । उपश्श्रिताऽइत्त्युप श्रिताः ॥ [2]शर्वाः । अधः । क्षमाचराऽइतिक्क्षमा चराः ॥५६॥

वृक्क्षेषु । शष्प्पिञ्ज्जराः । नीलग्ग्रीवाऽइतिनील ग्रीवाः । विलोहिताऽइतिवि लोहिताः ॥५७॥

तन्मसि ॥५४॥

अस्मिन् । अन्तरिक्षे ॥५५॥

नीलग्रीवाऽइतिनील ग्रीवाः । रुद्राः । उपश्रिताऽइत्युप श्रिताः । क्षमाचराऽइतिक्षमा चराः ॥५६॥

वृक्षेषु । शष्पिञ्जराः । नीलग्रीवाऽइतिनील ग्रीवाः ॥५७॥

य्ये । सहस्रय्योजनऽइतिसहस्र [3]य्योजने ॥५४॥

[ककोशे पञ्चपञ्चाशत्तमायाः कण्डिकायाः पदपाठो लेखकप्रमादान्न दृश्यते] ।

व्विलोहिताऽइतिव्वि लोहिताः ॥५७॥

---

१. 'स्रोजने' इति काशिकः पाठः ।

२. इमानि पदान्युत्तरस्या मन्त्रकण्डिकाया इहैव पठितानीत्यत इत आरभ्य एकस्याः कण्डिकासंख्याया भेदः समजनि ।

३. कशौल्यनुसारमिह, 'य्योजने' इत्येवं साधुः पाठो ज्ञेयः ।

भूतानाम् । अधिपतयइत्यधि पतयः । विशिखासऽइतिवि शिखासः । कपर्दिनः ॥५८॥

पथाम् । पथिरक्षयइतिपथि रक्षयः । ऐलबृदाः । आयुर्युधइत्यायुः युधः ॥५९॥

तीर्थानि । प्रचरन्तीतिप्र चरन्ति । सृकाहस्ताऽइतिसृका हस्ताः । निषङ्गिणः ॥६०॥

अन्नेषु । विविध्यन्तीतिवि विध्यन्ति । पात्रेषु । पिबतः । जनान् ॥६१॥

एतावन्तः । च । भूयांसः । च । दिशः । रुद्राः । वितस्थिरऽइतिवि [1]तस्थिरे ॥६२॥

अधिपतयइत्यधि पतयः ॥५८॥
पथिरक्षयइतिपथि रक्षयः । आयुर्युधइत्यायुः युधः ॥५९॥
तीर्थानि । प्रचरन्तीतिप्र चरन्ति । सृकाहस्ताऽइतिसृका हस्ताः ॥६०॥
विविध्यन्तीतिवि विध्यन्ति । पात्रेषु ॥६१॥
रुद्राः । वितस्थिरऽइतिवि तस्थिरे ॥६२॥

अधिपतयइत्यधि पतयः । विशिखासऽइतिवि[2] शिखासः ॥५८॥
पथिरक्षयइतिपथि रक्षयः । आयुर्युधइत्यायुः [3]युधः ५९॥
विविध्यन्तीतिवि[4] विध्यन्ति ॥६१॥
भूयांसः । वितस्थिरऽइतिवि[5] तस्थिरे ॥६२॥

---

१. 'तस्थिरे' इति काशिकः पाठः ।

२. कशैल्यनुसारमिह 'वि' इत्येवं पाठेन भाव्यम् ।

३. कशैल्यनुसारमिह 'युधः' इत्येवं पाठेन भाव्यम् ।

४. कशैल्यनुसारमिह 'वि' इत्येवं पाठेन भाव्यम् ।

५. कशैल्यनुसारमिह 'वि' इत्येवं निर्देशेन भाव्यम् ।

नम÷ । अस्तु । रुद्रेभ्य÷ । ये । दिवि । येषाम् । वर्षम् । इषवः ॥ तेभ्य÷ । दश । प्राचीः । दक्षिणा । प्रतीचीः । उदीचीः । ऊर्ध्वाः ॥ [1]अन्तरिक्षे । [1]वात÷ ॥ [2]पृथिव्याम् । [2]अन्नम् ॥६३॥

॥ इति वाजसनेयिसंहितापदे षोडशोऽध्यायः ॥

रुद्रेभ्य÷ । तेभ्य÷ । दक्षिणा । अन्तरिक्षे । पृथिव्याम् ॥६३॥

ये । येषाम् ॥६३॥

॥इति श्रीवाजसनेयिसंहितापदे षोडशमो[3]ऽध्यायः ॥

---

१. अन्येषां मन्त्रपदानां पुनरुक्तत्वाद् उत्तरस्याः कण्डिकाया अपुनरुक्ते द्वे पदे इहैव पठिते । अत इह द्वयोः कण्डिकासंख्ययो भेदः समजनि ।

२. अन्येषां मन्त्रपदानां पुनरुक्तत्वाद् उत्तरस्याः कण्डिकाया अपुनरुक्ते द्वे पदे इहैव पठिते । अत इह तिसृणां कण्डिकासंख्यानां भेदोऽजायत ।

३. द्र० पूर्वत्र-(पृष्ठ १७९ टि० १) ।

सप्तदशोऽध्यायः

अश्म॑न् । ऊर्ज॑म् । पर्व॑ते । शि॒श्रि॒याणाम् । अ॒द्भ्यऽइत्य॒त् भ्यः॑ । ओष॑धीभ्यः॑ । व॒न॒स्पति॑भ्य॒ऽइति॒व॒न॒स्पति॑भ्यः॑ । अधि॑ । सम्भृ॑त॒मिति॒सम् भृ॑तम् । पय॑ः ॥ ताम् । न॒ः । इष॑म् । ऊर्ज॑म् । ध॒त्त । म॒रु॒तः॑ । स॒ꣳर॒रा॒णाऽइति॒सम् [1]र॒रा॒णाः॑ । अश्म॑न् । ते॒ । क्षुत् । मयि॑ । ते॒ । ऊर्क् ॥१॥

इ॒माः॑ । मे॒ । अ॒ग्ने॒ । इष्ट॑काः॑ । धे॒नव॑ः । स॒न्तु॒ । एका॑ । च॒ । दश॑ । श॒तम् । स॒हस्र॑म् । अ॒युत॑म् । नि॒युत॒मिति॑नि युत॑म् । प्र॒यु॒त॒मिति॒प्र युत॑म् । अर्बु॑दम् । न्य॑र्बुद॒मिति॒नि अर्बु॑दम् । स॒मु॒द्रः॑ । मध्य॑म् । अन्त॑ः । प॒रा॒र्द्ध॒ऽइति॒पर अ॒र्द्धः॑ । ए॒ताः॑ । अ॒मुत्र॑ । अ॒मुष्मि॑न् । लो॒के ॥२॥

अश्म॑न् । शि॒श्रि॒याणाम् । अ॒द्भ्यऽइत्य॒त् भ्यः॑ । ओष॑धीभ्यः॑ । व॒न॒स्पति॑भ्य॒ऽइति॒व॒न॒स्पति॑ भ्यः॑ । अ॒श्म॑न् ॥१॥

अ॒ग्ने॒ । इष्ट॑काः॑ । प्र॒यु॒त॒मिति॒प्र युत॑म् । स॒मु॒द्रः॑ । मध्य॑म् । अ॒मुत्र॑ । अ॒मुष्मि॑न् ॥२॥

शि॒श्रि॒या॒णाम् । व॒न॒स्पति॑भ्य॒ऽइति॒व॒न॒स्पति॑ भ्यः॑ । पय॑ः । मयि॑ ॥१॥

अ॒युत॑म् । नि॒यु॒त॒मिति॑नि [2]य्युत॑म् । प्र॒यु॒त॒मिति॒प्र [2]य्युत॑म् ॥२॥

---

१. 'र॒रा॒णाः॑' इति काशिकः पाठः ।

२. ककोशशैल्यनुसारमिह 'युत॑म्' इत्येवं पाठेन भाव्यम् ।

ऋतवं÷ । स्थ । ऋतावृधं÷ । ऋतवृधऽइत्यृंत वृधं÷ । ऋतुष्ठा३ । ऋतुस्थाऽइत्यृंतु स्था३ । स्थ । ऋतावृधं÷ । ऋतवृधऽइत्यृंत वृधं÷ ॥ घृतश्चुतऽइतिंघृत श्चुतं÷ । मधुश्चुतऽइतिंमधु श्चुतं÷ । विराजऽइतिंवि राजं÷ । नामं । कामदुघाऽइतिंकाम दुघां६ । अक्षीयमाणा६ ॥३॥

ऋतवृधऽइत्यृंत वृधं÷ । ऋतुष्ठा३ । ऋतुस्थाऽइत्यृंतु स्था३ । ऋतवृधऽइत्यृंत वृधं÷ । घृतश्चुतऽइतिंघृत श्चुतं÷ । मधुश्चुतऽइतिंमधु श्चुतं÷ । अक्षीयमाणा६ ॥३॥

ऋतवृधऽइत्यृंत वृधं÷ । ऋतवृधऽइत्यृंत वृधं÷ । [1]घृतश्च्युतऽइतिंघृत श्च्युतं÷ । [1]मधुश्च्युतऽइतिंमधु श्च्युतं÷ । विराजऽइतिंविराजं÷[2] । अक्षीयमाणा६ ॥३॥

---

१. अवान्तरशाखानुरूपोऽयं पाठभेदः स्यात् । मौरिसब्लूमफील्डः स्वीकीये 'वैदिककनकोर्डेन्स' ग्रन्थे एतन्मन्त्रनिर्देशे (पृष्ठ ३५९ कालम २) वाजसनेयसंहिताया (१७।३), मैत्रायणीसंहितायाः २।८।१४ च मन्त्रपाठे 'घृतश्चुतो मधुश्चुतः' पठितस्य पदपाठे 'घृतश्च्युतः मधुश्च्युतः' इति सयकारपाठं निर्दिशति । मैत्रायणीसंहितायां ३।३।४ स्थाने 'घृतश्च्युतो मधुश्च्युताः' सयकारः पाठः, २।८।१४ स्थाने च 'घृतश्चुतो मधुश्चुताः' इति यकाररहितः पाठ उपलभ्यते । अत्र वाजसनेयसंहिताया २१।४२ मन्त्रस्य 'मधुश्चुतः' पदस्य ककोशीयः पाठोऽप्यनुसन्धेयः । मुम्बईमुद्रितयोरुवटमहीधरभाष्ययोः स्वामिदयानन्दभाष्ये चात्र (१७।३) 'घृतश्च्युतो मधुश्च्युतः' इति सयकार एव पाठो दृश्यते, परन्तु २१।४२ मन्त्रे 'मधुश्चुतः' इति यकाररहित एव पाठ एषु भाष्यग्रन्थेषु लक्ष्यते ।

२. अपपाठोऽयम्, ककोशशैल्यनुसारमिह '०वि राजं÷' इत्येवं पाठेन भाव्यम् ।

समुद्रस्य । त्वा । अवकया । अग्ने । परि । इयामसि ॥ पावकः । अस्मभ्यम् । शिवः । भव ॥ [1]हिमस्य । त्वा । जरायुणा ॥४॥

उप । ज्मन् । उप । वेतसे । अव । तर । नदीषु । आ ॥ अग्ने । पित्तम् । अपाम् । असि । मण्डूकि । ताभिः । आ । गहि । सा । इमम् । नः । यज्ञम् । पावकवर्णमितिपावक वर्णम् । शिवम् । कृधि ॥५॥

अपाम् । इदम् । न्ययनमितिनि अयनम् । समुद्रस्य । निवेशनमितिनि वेशनम् ॥ अन्यान् । ते । अस्मत् । तपन्तु । हेतयः ॥६॥

समुद्रस्य । अग्ने । अस्मभ्यम् ॥४॥

अग्ने । यज्ञम् । पावकवर्णमितिपावक वर्णम् ॥५॥

समुद्रस्य । अन्यान् । अस्मत् ॥६॥

अवकया । न्ययामसि । [2]अश्मभ्यम् । हिमस्य । जरायुणा ॥४॥

[3]ग्मन् । य्यज्ञम् । पावकवर्णमितिपावक वर्णम् ॥५॥

न्ययनमितिनि अयनम् । निवेशनमितिनि वेशनम् । हेतयः ॥६॥

---

१. उत्तरस्यां मन्त्रकण्डिकायां त्रीण्येवापुनरुक्तानि पदानि, तानि च पदपाठेऽस्यामेव कण्डिकायां पठितानि । अत इत आरभ्य एकस्या कण्डिका-संख्याया भेदो ज्ञेयः ।

२. लेखकप्रमादजोऽपपाठः, 'अस्मभ्यम्' इति साधुः पाठो ज्ञेयः ।

३. यकारस्य जकारोच्चारणनिमित्तो जकारस्थाने यकारस्य लेखः ।

अग्ने । पावक । शोचिषा । मन्द्रया । देव । जिह्वया ॥
आ । देवान् । वक्षि । यक्षि । च ॥७॥

सः । नः । पावक । दीदिव इति दीदि वः । अग्ने ।
देवान् । इह । आ । वह ॥ उप । यज्ञम् । हविः । च ।
नः ॥८॥

पावकया । यः । चितयन्त्या । कृपा । क्षामन् ।
रुरुचे । उषसः । न । भानुना ॥ तूर्वन् । न । यामन् ।
एतशस्य । नु । रणे । आ । यः । घृणे । न । ततृषाणः ।
अजरः ॥९॥

नमः । ते । हरसे । शोचिषे । नमः । ते । अस्तु ।
अर्चिषे ॥१०॥

नृषदे । नृसद इति नृ सदे । वेट् । अप्सुषदे । अप्सु-
सद इत्यप्सु सदे । बर्हिषदे । बर्हिसद इति बर्हि सदे ।
वनसद इति वन सदे । स्वर्विद इति स्वः विदे ॥११॥

अग्नें । जिह्वयां । वक्षि । यक्षि ॥७॥
अग्नें । यज्ञम् ॥८॥
अप्सुषदे । अप्सुसद इत्यप्सु सदे ॥११॥

मन्द्रय्यां । जिह्वय्यां । य्यक्षि ॥७॥
दीदिव इति दीदि वः । य्यज्ञम् ॥८॥
पावकय्यां । य्यः । चितय्यन्त्या । य्यामन् । य्यः ॥९॥
वनसद इति वन[1] सदे । स्वर्विद इति स्वः [2]विदे ॥११॥

---

१. ककोशशैल्यनुसारमिह '०वन' इत्येवं पाठेन भाव्यम् ।
२. ककोशशैल्यनुसारमिह 'विदे' इत्येवं पाठेन भाव्यम् ।

ये । देवाः । देवानाम् । यज्ञियाः । यज्ञियानाम् । सँवत्सरीणम् । उप । भागम् । आसते ॥ अहुतादऽइत्यहुत अदः । हविषः । यज्ञे । अस्मिन् । स्वयम् । पिबन्तु । मधुनः । घृतस्य ॥१२॥

ये । देवाः । देवेषु । अधि । देवत्वमितिदेव त्वम् । आयन् । ये । ब्रह्मणः । पुरऽएतारऽइतिपुरः एतारः । अस्य ॥ येभ्यः । न । ऋते । पवते । धाम । किम् । चन । न । ते । दिवः । न । पृथिव्याः । अधि । स्नुषु ॥१३॥

प्राणदाऽइतिप्राण दाः । अपानदाऽइत्यपान दाः । व्यानदाऽइतिव्यान दाः । वर्चोदाऽइतिवर्चः दाः । वरिवोदाऽइतिवरिवः दाः ॥१४॥

यज्ञियाः । यज्ञियानाम् । सँवत्सरीणम् । अहुतादऽइत्यहुत अदः । यज्ञे । अस्मिन् ॥१२॥

देवत्वमितिदेव त्वम् । ब्रह्मणः । येभ्यः । पृथिव्याः ॥१३॥

प्राणदाऽइतिप्राण दाः । अपानदाऽइत्यपान दाः ॥१४॥

य्ये । य्यज्ञिय्याः । य्यज्ञिय्यानाम् । [1]सम्वत्सरीणम् । य्यज्ञे । स्वय्यम् ॥१२॥

य्ये । आय्यन् । य्ये । य्येभ्यः ॥१३॥

ब्र्च्चोदाऽइतिब्र्च्चः दाः । ब्रिवोदाऽइतिब्रिवः दाः ॥१४॥

---

१. अत्र 'सँव्वत्सरीणम्' इति शुद्धः पाठो ज्ञेयः ।

अग्निः । तिग्मेन । शोचिषा । यासत् । विश्वम् । नि । अत्रिणम् ॥ अग्निः । नः । वनते । रयिम् ॥१५॥

यः । इमा । विश्वा । भुवनानि । जुह्वत् । ऋषिः । होता । नि । असीदत् । पिता । नः ॥ सः । आशिषेत्या शिषा । द्रविणम् । इच्छमानः । प्रथमच्छदितिप्प्रथम छत् । अवरान् । आ । विवेश ॥१६॥

किम् । स्वित् । आसीत् । अधिष्ठानम् । अधिस्त्थानमित्त्यधि स्थानम् । आरम्म्भणमित्त्या रम्भणम् । कतमत् । स्वित् । कथा । आसीत् ॥ यतः । भूमिम् । जनयन् । विश्श्वकर्म्मेतिविश्श्व कर्म्मा । वि । द्याम् । और्णोत् । महिना । विश्श्वचक्क्षाऽइतिविश्श्व चक्क्षाः ॥१७॥

विश्श्वतश्चक्क्षुरितिविश्श्वतः चक्क्षुः । उत । विश्श्वतो-

अग्निः । तिग्मेन । विश्वम् । अत्रिणम् । अग्निः ॥१५॥

विश्वा । जुह्वत् । आशिषेत्या शिषा । इच्छमानः । प्रथमछदितिप्रथम छत् ॥१६॥

अधिष्ठानम् । अधिस्थानमित्यधि स्थानम् । आरम्भणमित्या रम्भणम् । विश्वकर्म्मेतिविश्व कर्म्मा । विश्वचक्षाऽइतिविश्व चक्षाः ॥१७॥

विश्वतश्चक्षुरितिविश्वतः चक्षुः । विश्वतोमुखऽइतिविश्वतः मुखः ।

य्यासत् । रयिम् ॥१५॥

य्यः ॥१६॥

य्यतः । जनय्यन् । विश्वकर्म्मेतिविश्व कर्म्मा । विश्वचक्षाऽइतिविश्व चक्षाः ॥१७॥

विश्वतश्चक्षुरितिविश्वतः चक्षुः । विश्वतोमुखऽइतिविश्वतः मुखः ।

मुखऽइतिविश्वतं÷ मुखं। विश्वतोबाहुरितिविश्वतं÷ बाहुं।
उत। विश्वतस्पात्। विश्वतं÷पादितिविश्वतं÷ पात्॥
सम्। बाहुभ्यामितिबाहु भ्याम्। धमति। सम्। पतत्रैः।
द्यावाभूमीऽइतिद्यावाभूमी। जनयन्। देवः। एकः॥१८॥

किम्। स्वित्। वनम्। कः। ऊँऽइत्यूँ। सः।
वृक्षः। आस। यतः। द्यावापृथिवीऽइतिद्यावापृथिवी।
निष्टतक्षुः। निस्ततक्षुरितिनिः [1]ततक्षुः॥ मनी-
षिणः। मनसा। पृच्छत। इत्। ऊँऽइत्यूँ। तत्। यत्।
अद्ध्यतिष्ठदित्यधि अतिष्ठत्। भुवनानि। धारयन्॥१९॥

या। ते। धामानि। परमाणि। या। अवमा। या।
मद्ध्यमा। विश्वकर्म्मन्नितिविश्व कर्म्मन्। उत। इमा॥

विश्वतोबाहुरितिविश्वतं÷ बाहुः। विश्वतस्पात्। विश्वतं÷पादितिविश्वतं÷ पात्। बाहुभ्यामितिबाहु भ्याम्। पतत्रैः। द्यावाभूमीऽइतिद्यावाभूमी॥१८॥

ऊँऽइत्यूँ। वृक्षः। द्यावापृथिवीऽइतिद्यावापृथिवी। निष्टतक्षुः। निस्ततक्षुरितिनिः ततक्षुः। पृछत। ऊँऽइत्यूँ। अध्यतिष्ठादित्यधि अतिष्ठत्॥१९

मध्यमा। विश्वकर्म्मन्नितिविश्व कर्म्मन्। शिक्ष। सखिभ्यऽइतिसखि

विश्वतोबाहुरितिविश्वतं÷ बाहुः। विश्वतं÷पादितिविश्वतं÷ पात्। जन-यन्॥१८॥

य्यतं÷। य्यत्। धारय्यन्॥१९॥

य्या। य्या। य्या। विश्वकर्म्मनितिविश्व कर्म्मन्। [2]शिक्षा।

---

१ 'ततक्क्षुः' इति काशिकः पाठः।

२. अपपाठोऽयम्, 'शिक्ष' इति साधुः पाठो ज्ञेयः।

शिक्क्ष । सखिभ्य्यऽइतिसखि भ्यः । हविर्षि । स्वधाव-ऽइतिस्वधा वः । स्वयम् । यजस्व । तन्न्वम् । वृधानः ॥२०॥

विश्श्वकर्म्मन्नितिविश्श्व कर्म्मन् । हविषा । वावृधानः । वावृधानऽइतिवावृधानः । स्वयम् । यजस्व । पृथिवीम् । उत । द्याम् ॥ मुहन्तु । अन्न्ये । अभितः । सपत्त्नाऽइतिस पत्त्नाः । इह । अस्म्माकम् । मघवेतिमघ वा । सूरिः । अस्तु ॥२१॥

चक्क्षुषः । पिता । मनसा । हि । धीरः । घृतम् । एनेऽइत्त्यैने । अजनत् । नम्म्नमानेऽइतिनम्म्नमाने ॥ यदा । इत् । अन्ताः । अददृहन्त । पूर्व्वे । आत् । इत् । द्यावापृथिवी-ऽइतिद्यावापृथिवी । अप्प्रथेताम् ॥२२॥

भ्यः । तन्वम् ॥२०॥

विश्वकर्म्मन्नितिविश्व कर्म्मन् । मुह्यन्तु । अन्ये । सपत्नाऽइतिसपत्नाः । अस्माकम् ॥२१॥

चक्षुषः । एनेऽइत्यैने । नम्नमानेऽइतिनम्नमाने । द्यावापृथिवीऽइतिद्यावा-पृथिवी । अप्रथेताम् ॥२२॥

स्वधावऽइतिस्वधा वः । स्वय्यम् । य्यजस्व । वृधानः ॥२०॥

विश्वकर्म्मनितिविश्व कर्म्मन् । ववृधानऽइतिववृधानः । स्वय्यम् । य्यजस्व । [1]द्याम् । मुह्यन्तु । मघवेतिमघ वा ॥२१॥

[2]य्युदा ॥२२॥

---

१. अपपाठोऽयम्, 'द्याम्' इत्युदात्तपाठ एव साधुर्ज्ञेयः ।

२. इतः पूर्वयोर्द्वयोः कण्डिकयोः पूर्वं गतत्वान्नेह तत्पदानि पदपाठे पठ्यन्ते, अत इत आरभ्य तिसृणां कण्डिकासंख्यानां भेदो ज्ञेयः ।

विश्वकर्म्मेतिविश्श्व कर्म्मा । विमनाऽइतिवि मनाः । आत् । विहायाऽइतिवि हायाः । धाता । विधातेतिवि धाता । परमा । उत । सन्दृगितिसम् दृक् ॥ तेषाम् । इष्टानि । सम् । इषा । मदन्ति । यत्र । सप्तऽऋषीनितिसप्त ऋषीन् । परः । एकम् । आहुः ॥२३॥

यः । नः । पिता । जनिता । यः । विधातेतिवि धाता । धामानि । वेद । भुवनानि । विश्श्वा ॥ यः । देवानाम् । नामधाऽइतिनाम धाः । एकः । एव । तम् । सम्म्प्रश्श्नमितिसम् प्रश्श्नम् । भुवना । यन्ति । अन्न्या ॥२४॥

ते । आ । अयजन्त । द्रविणम् । सम् । अस्म्मै । ऋषयः । पूर्वे । जरितारः । न । भूना ॥ असूर्त्ते । सूर्त्ते । रजांसि । निषत्ते । निसत्तऽइतिनि सत्ते । ये । भूतानि । समकृण्ण्वन्निितिसम् अकृण्ण्वन् । इमानि ॥२५॥

विश्वकर्म्मेतिविश्व कर्म्मा । इष्टानि । यत्र । सप्तऽऋषीनितिसप्त ऋषीन् ॥२३॥

विश्वा । सम्प्रश्नमितिसम् प्रश्नम् । अन्या ॥२४॥

अस्मै । समकृण्वन्नितिसम् अकृण्वन् ॥२५॥

विश्वकर्म्मेतिविश्व कर्म्मा । विमनाऽइतिवि मनाः । [1]विहाय्याऽइतिवि हाय्याः । विधातेतिवि[2] धाता । य्यत्र ॥२३॥

य्यः । य्यः । विधातेतिवि[2] धाता । य्यः । य्यन्ति ॥२४॥

अय्यजन्त । [3]अस्से । ऋषय्यः । य्ये ॥२५॥

---

१. अपपाठोऽयम्, 'विहाय्याऽइतिवि हाय्याः' इति साधुः पाठो ज्ञेयः ।

२. ककोशशैल्यनुसारमिह 'वि' इत्येवं पाठेन भाव्यम् ।

३. अपपाठोऽयम्, 'अस्मै' इति शुद्धः पाठो ज्ञेयः ।

परः । दिवा । परः । एना । पृथिव्या । परः । देवेभिः । असुरैः । यत् । अस्ति ॥ कम् । स्वित् । गर्भम् । प्रथमम् । दध्रे । आपः । यत्र । देवाः । समपश्यन्तेतिसम् अपश्यन्त । पूर्वे ॥२६॥

तम् । इत् । समगच्छन्तेतिसम् अगच्छन्त । विश्वे ॥ अजस्य । नाभौ । अधि । एकम् । अर्पितम् । यस्मिन् । विश्वानि । भुवनानि । तस्थुः ॥२७॥

न । तम् । विदाथ । यः । इमा । जजान । अन्यत् । युष्माकम् । अन्तरम् । बभूव ॥ नीहारेण । प्रावृताः । जल्प्या । च । असुतृपऽइत्यसु तृपः । उक्थशासः । उक्थशसऽइत्युक्थ शसः । चरन्ति ॥२८॥

पृथिव्या । दध्रे । यत्र । समपश्यन्तेतिसम् अपश्यन्त ॥२६॥

समगछन्तेतिसम् अगछन्त । विश्वे । यस्मिन् । विश्वानि । तस्थुः ॥२७॥

अन्यत् । युष्माकम् । जल्प्या । असुतृपऽइत्यसु तृपः । उक्थशासः । उक्थशसऽइत्युक्थ शसः ॥२८॥

य्यत् । य्यत्र ॥२६॥

य्यस्मिन् ॥२७॥

य्यः । य्युष्माकम् । [1]उन्थकुशासः । [1]उन्थकुशसऽइत्युन्थकु[1] शसः ॥२८॥

---

१. अपपाठा इमे, क्रमशोऽत्र 'उक्थ' 'उक्थ' 'इत्युक्थ' पाठाः साधवः।

विश्वकर्म्मेतिविश्वऽकर्म्मा । हि । अजनिष्ट । देवः । आत् । इत् । गन्धर्वः । अभवत् । द्वितीयः ॥ तृतीयः । पिता । जनिता । ओषधीनाम् । अपाम् । गर्भम् । वि । अदधात् । पुरुत्रेतिपुरुऽत्रा ॥२९॥

आशुः । शिशानः । वृषभः । न । भीमः । घनाघनः । क्षोभणः । चर्षणीनाम् ॥ सङ्क्रन्दनऽइतिसम्ऽक्रन्दनः । अनिमिषऽइत्यनिऽमिषः । एकवीरऽइत्येकऽवीरः । शतम् । सेनाः । अजयत् । साकम् । इन्द्रः ॥३०॥

सङ्क्रन्दनेनेतिसम्ऽक्रन्दनेन । अनिमिषेणेत्यनिऽमिषेण । जिष्णुना । युत्कारेणेतियुत्ऽकारेण । दुश्च्यवनेनेतिदुःऽ[1]च्यवनेन । धृष्णुना ॥ तत् । इन्द्रेण । जयत । तत् । सहध्वम् । युधः । नरः । इषुहस्तेनेतीषुऽहस्तेन । वृष्णा ॥३१॥

विश्वकर्म्मेतिविश्वऽकर्म्मा । अजनिष्ट । पुरुत्रेतिपुरुऽत्रा ॥२९॥

अनिमिषऽइत्यनिऽमिषः । एकवीरऽइत्येकऽवीरः ॥३०॥

अनिमिषेणेत्यनिऽमिषेण । जिष्णुना । युत्कारेणेतियुत्ऽकारेण । दुश्च्यवनेनेतिदुःऽच्यवनेन । धृष्णुना । सहध्वम् । इषुहस्तेनेतीषुऽहस्तेन । वृष्णा ॥३१॥

विश्वकर्म्मेतिविश्वऽकर्म्मा । [2]व्यजनिष्ट । द्वितीयः । तृतीयः ॥२९॥

[3]वृषभः । एकवीरऽइत्येकऽवीरः । अजयत ॥३०॥

य्युत्कारेणेतिय्युत्ऽकारेण । जयत । य्युधः ॥३१॥

---

१. 'च्यवनेन' इति काशिकः पाठः ।

२. अपपाठोऽयम्, 'अजनिष्ट' इति शुद्धः पाठो ज्ञेयः ।

३. ककोशशैल्यनुसारमिह ऋकारपरो वकारो लघुर्ज्ञेयः—वृषभः ।

सः । इषुहस्तैरितीषु हस्तैः । सः । निषङ्गिभिरिति- निषङ्गि भिः । वशी । सꣳस्रष्टेतिसम् स्रष्टा । सः । युधः । इन्द्रः । गणेन ॥ सꣳसृष्टजिदितिसꣳसृष्ट जित् । सोमपाऽइतिसोम पाः । बाहुशर्द्धीतिबाहु शर्द्धी । उग्र- धन्वेत्युग्र धन्वा । प्रतिहिताभिरितिप्रति हिताभिः । अस्ता ॥३२॥

बृहस्पते । परि । दीय । रथेन । रक्षोहेतिरक्षः हा । अमित्रान् । अपबाधमानऽइत्यप बाधमानः ॥ प्रभञ्ज- न्निति प्र भञ्जन् । सेनाः । प्रमृणऽइतिप्र मृणः । युधा । जयन् । अस्माकम् । एधि । अविता । रथानाम् ॥३३॥

बलविज्ज्ञायऽइतिबल [1]विज्ज्ञायः । स्थविरः । प्रवीर- ऽइतिप्र वीरः । सहस्वान् । वाजी । सहमानः । उग्रः ॥

इषुहस्तैरितीषु हस्तैः । सꣳस्रष्टेतिसम् स्रष्टा । सꣳसृष्टजिदिति- सꣳसृष्ट जित् । उग्रधन्वेत्युग्र धन्वा । प्रतिहिताभिरितिप्रति हिताभिः । अस्ता ॥३२॥

बृहस्पते । रक्षोहेतिरक्षः हा । अमित्रान् । अपबाधमानऽइत्यप बाध- मानः । प्रभञ्जन्नितिप्र भञ्जन् । प्रमृणऽइतिप्र मृणः । अस्माकम् ॥३३॥

बलविज्ञायऽइतिबल विज्ञायः । प्रवीरऽइतिप्र वीरः । उग्रः ।

युधः ॥३२॥

दीय । युधा । जयन् ॥३३॥

बलविज्ञायऽइतिबल विज्ञायः । प्रवीरऽइतिप्र वीरः ।

१. 'विज्ञायः' इति काशिकः पाठः ।

अभिवींरऽइत्त्यभि व्वींरं। अभिसत्त्वेत्त्यभि सत्त्वा। सहोजाऽइतिंसहः जाः। जैत्त्रम्। इन्द्र। रथम्। आ। तिष्ट्ठ। गोविदितिंगो व्वित् ॥३४॥

गोत्त्रभिदमितिंगोत्त्र भिदंम्। गोविदमितिंगो व्विदंम्। व्वज्ज्रबाहुमितिवज्ज्र बाहुम्। जयन्तम्। अज्ज्म। प्रमृणन्तमितिंप्र मृणन्तंम्। ओजंसा ॥ इमम्। सजाताऽइतिंस जाताः। अनुं। व्वीरयद्धम्। इन्द्रंम्। सखायः। अनुं। सम्। रभद्धम् ॥३५॥

अभि। गोत्त्राणिं। सहंसा। गाहंमानः। अदयः। व्वीरः। शतमंन्न्युरितिंशत मंन्न्युः। इन्द्रंः ॥ दुश्च्यवन-

---

अभिवींरऽइत्यभि व्वींरं। अभिसत्वेत्यभि सत्वा। जैत्रम्। तिष्ठ ॥३४॥

गोत्रभिदमितिंगोत्र भिदंम्। व्वज्रबाहुमितिवज्र बाहुम्। अज्मं। प्रमृणन्तमितिंप्र मृणन्तंम्। व्वीरयध्वम्। रभध्वम् ॥३५॥

गोत्राणिं। शतमंन्युरितिंशत मंन्युः। दुश्च्युवनऽइतिंदुः

अभिवींरऽइत्यभि वीरः। गोविदितिंगो वित् ॥३४॥

[1]वज्रबाहुमितिवज्र बाहुम्। जय्यन्तम्। [2]अय्मं। [3]व्वीरय्यध्वम्। सखाय्यः ॥३५॥

अदय्यः। अय्युध्यः। [4]अवन्तु। य्युत्स्वितिंय्युत्[5] सु ॥३६॥

---

१. ककोशे इतः पूर्वं द्वयोः पदयोः पदविभागो न दृश्यते। अस्यापि पदस्य 'व्वज्रबाहुमितिव्वज्र बाहुम्' इति शुद्धः पाठो द्रष्टव्यः।

२. अपपाठोऽयं यकारस्य जकारोच्चारणनिमित्तः। 'अज्मं' इत्येवं शुद्धेन पाठेन भाव्यम्।

३. व्वीरयध्वम्' इत्येवं शुद्धेन पाठेन भाव्यम्।

४. अपपाठोऽयम्, 'अवतु' इति साधुः पाठो ज्ञेयः।

५. अपपाठोऽयम्, '०य्युत्' इत्येवं साधुपाठेन भवितव्यम्।

ऽइतिदुदं [1]च्यवनः। पृतनाषाट्। अयुद्ध्य्ः। अस्म्माकम्। सेनाः। अवतु। प्र। सुत्स्विति॑सुत् सु ॥३६॥

इन्द्रः। आसाम्। नेता। बृहस्पतिः। दक्षिणा। यज्ञः। पुरः। एतु। सोमः॥ देवसेनानामितिदेव सेनानाम्। अभिभञ्जतीनामित्यभि [2]भञ्जतीनाम्। जयन्तीनाम्। मरुतः। यन्तु। अग्ग्रम् ॥३७॥

इन्द्रस्य। वृष्णः। वरुणस्य। राज्ञः। आदित्यानाम्। मरुताम्। शर्द्धः। उग्ग्रम्॥ महामनसामितिमहा मनसाम्। भुवनच्च्यवानामितिभुवन च्यवानाम्। घोषः। देवानाम्। जयताम्। उत्। अस्त्थात् ॥३८॥

उत्। हर्षय। मघवन्निति॑मघ वन्। आयुधानि। उत्। सत्त्वनाम्। मामकानाम्। मनांᳪसि॥ उत्। वृत्रहन्निति॑वृत्र

च्यवनः। अयुध्यः। अस्माकम्। सुत्स्विति॑सुत् सु ॥३६॥

बृहस्पतिः। दक्षिणा। यज्ञः। अभिभञ्जतीनामित्यभि भञ्जतीनाम्। अग्रम् ॥३७॥

वृष्णः। राज्ञः। आदित्यानाम्। उग्रम्। भुवनच्यवानामितिभुवन च्यवानाम्। अस्थात् ॥३८॥

वृत्रहन्नितिवृत्र हन् ॥३९॥

य्यज्ञः। जय्यन्तीनाम्। य्यन्तु ॥३७॥

जय्यताम् ॥३८॥

हर्षय्य। मघवन्नितिमघ वन्। आयुधानि। वृत्रहन्नितिवृत्र हन्।

१. 'च्यवनः' इति काशिकः पाठः।

२. 'भञ्जतीनाम्' इति काशिकः पाठः।

हन् । वाजिनाम् । वाजिनानि । उत् । रथानाम् । जयताम् । यन्तु । घोषाः ॥३९॥

अस्माकम् । इन्द्रः । समृतेष्विति सम् ऋतेषु । ध्वजेषु । अस्माकम् । याः । इषवः । ताः । जयन्तु ॥ अस्माकम् । वीराः । उत्तरऽइत्युत् तरे । भवन्तु । अस्मान् । ऊँऽइत्यूँ । देवाः । अवत । हवेषु ॥४०॥

अमीषाम् । चित्तम् । प्रतिलोभयन्तीतिप्रति लोभयन्ती । गृहाण । अङ्गानि । अप्वे । परा । इहि ॥ अभि । प्र । इहि । निः । दह । हृत्स्वितिहृत् सु । शोकैः । अन्धेन । अमित्राः । तमसा । सचन्ताम् ॥४१॥

अवसृष्टेत्यव सृष्टा । परा । पत । शरव्ये । ब्रह्म-

अस्माकम् । समृतेष्विति सम् ऋतेषु । अस्माकम् । अस्माकम् । उत्तरऽइत्युत् तरे । अस्मान् । ऊँऽइत्यूँ ॥४०॥

प्रतिलोभयन्तीतिप्रति लोभयन्ती । अप्वे । हृत्स्वितिहृत् सु । अमित्राः ॥४१॥

अवसृष्टेत्यव सृष्टा । शरव्ये । ब्रह्मसंशितऽइतिब्रह्म संशिते ।

जयताम् । यन्तु ॥३९॥

स्याः । जयन्तु ॥४०॥

प्रतिलोभयन्तीतिप्रति लोभयन्ती । [1]अमित्राः ॥४१॥

---

१. अपपाठोऽयम्, 'अमित्राः' इति साधुः पाठः स्यात् । यद्वा 'अमित्राः' इत्येवं शुद्धः पाठः स्यात् । तथा सति पाठभेदो ज्ञेयः ।

सꣳशितऽइतिब्रह्म सꣳशिते ॥ गच्छ । अमित्रान् । प्र । पद्यस्व । मा । अमीषाम् । कम् । चन । उत् । शिषꣳ ॥४२॥

प्र । इत । जयत । नरꣳ । इन्द्र÷ । वुꣳ । शर्म्म । यच्छतु ॥ उग्राः । वुꣳ । सन्तु । बाहव÷ । अनाधृष्याः । यथा । असथ ॥४३॥

असौ । या । सेना । मरुतꣳ । परेषाम् । अभि । आ । एति । नꣳ । ओजसा । स्पर्द्धमाना ॥ ताम् । गूहत । तमसा । अपव्रतेनेत्यप व्रतेन । यथा । अमीऽइत्यमी । अन्यः । अन्यम् । न । जानन् ॥४४॥

गंछ । अमित्रान् । पद्यस्व ॥४२॥

यछतु । उग्राः । अनाधृष्याः ॥४३॥

अपव्रतेनेत्यप व्व्रतेन । अमीऽइत्यमी । अन्यः । अन्यम् ॥४४॥

कम् । [1]च । [1]न ॥४२॥

जयत । [2]व्रुꣳ । य्यछतु । वुꣳ । य्यथा ॥४३॥

य्या । [3]अपव्व्रतेनेत्यप व्व्रतेन । य्यथा ॥४४॥

---

१. अत्र स्वरानुरोधेन 'चन' इत्येकं 'च । न' इति द्वे पदे, इत्युभयथा विच्छेदः संभवति, परन्तु मन्त्रवाक्ये निषेधार्थकस्य 'मा' पदस्य प्रयोगात् 'च । न' इत्येवं विच्छेदे निषेधार्थस्य पौनरुक्त्यप्रसंगाद् लेखकप्रमादजोऽपपाठः संभाव्यते ।

२. ककोशशैल्यनुसारमिह 'वुꣳ' इत्येवं पाठः साधुः, तथा चात्रैव पुनः प्रयोग उपलभ्यते ।

३. ककोशशैल्यनुसारमिह 'अपव्रतेनेत्यप व्रतेन' इत्येवं पाठो द्रष्टव्यः ।

यत्र । बाणाः । सम्पतन्तीतिसम् पतन्ति । कुमाराः । विशिखाऽइवेतिविशिखाः इव ॥ तत् । नः । इन्द्रः । बृहस्पतिः । अदितिः । शर्म्म । यच्छतु । विश्वाहा । शर्म्म । यच्छतु ॥४५॥

मर्म्माणि । ते । वर्म्मणा । छादयामि । सोमः । त्वा । राजा । अमृतेन । अनु । वस्ताम् ॥ उरोः । वरीयः । वरुणः । ते । कृणोतु । जयन्तम् । त्वा । अनु । देवाः । मदन्तु ॥४६॥

उत् । एनम् । उत्तरामित्युत् तराम् । नय । अग्ने । घृतेन । आहुतेत्त्या हुत ॥ रायः । पोषेण । सम् । सृज । प्रजयेतिप्र जया । च । बहुम् । कृधि ॥४७॥

इन्द्र । इमम् । प्रतरामितिप्र तराम् । नय । सजातानामितिस जातानाम् । असत् । वशी ॥ सम् । एनम् ।

यत्र । बृहस्पतिः । यछतु । विश्वाहा । यछतु ॥४५॥

वस्ताम् ॥४६॥

उत्तरामित्युत् तराम् । अग्ने । आहुतेत्या हुत । प्रजयेतिप्र जया ॥४७॥

प्रतरामितिप्र तराम् ॥४८॥

य्यत्र । विशिखाऽइवेतिविशिखाः इव । य्यछतु । य्यछतु ॥४५॥

छादय्यामि । वरीय्यः । जय्यन्तम् ॥४६॥

नय्य । राय्यः । प्रजय्येतिप्र जय्या ॥४७॥

नय्यः । [1]वर्चसा । [2]असत् ॥४८॥

---

१. अपपाठोऽयम्, 'वर्च्चसा' इत्येवं साधुः पाठः स्यात् ।

२. अत्र स्वरभेदः किंमूल इति न ज्ञायते । उदात्तत्वस्य नात्र किञ्चित् कारणमुपलभ्यते ।

वर्च्चसा । सृज । देवानाम् । भागदाऽइतिभाग दाः । असत् ॥४८॥

यस्य । कुर्म्मः । गृहे । हविः । तम् । अग्ने । वर्द्धय । त्वम् ॥ तस्मै । देवाः । अधि । ब्रवन् । अयम् । च । ब्रह्मणः । पतिः ॥४९॥

पञ्च । दिशः । दैवीः । यज्ञम् । अवन्तु । देवीः । अप । अमतिम् । दुर्म्मतिमितिदुः मतिम् । बाधमानाः ॥ रायः । पोषे । यज्ञपतिमितियज्ञ पतिम् । आभजन्तीरित्त्या भजन्तीः । रायः । पोषे । अधि । यज्ञः । अस्थात् ॥५०॥

समिद्धऽइतिसम् इद्धे । अग्नौ । अधि । मामहानः । ममहानऽइतिममहानः । उक्क्थपत्त्रऽइत्युक्क्थ पत्त्रः ।

अग्ने । तस्मै । ब्रह्मणः ॥४९॥

यज्ञम् । यज्ञपतिमितियज्ञ पतिम् । आभजन्तीरित्या भजन्तीः । यज्ञः । अस्थात् ॥५०॥

समिद्धऽइतिसम् इद्धे । अग्नौ । उक्थपत्रऽइत्युक्थ पत्रः ।

व्यस्य । वर्धय । अग्नम् ॥४९॥

[1]य्यज्ञम् । रायः । य्यज्ञपतिमितिय्यज्ञ पतिम् । रायः । यज्ञः ॥५०॥

---

१. इतः पूर्वो मन्त्रः पूर्वं गत इति न पदपाठे तस्य पदानि पठ्यन्ते । अत इत आरभ्य चतसृणां कण्डिकासंख्यानां भेदो ज्ञेय. ।

ई॒ड्य॑÷ । गृ॒भी॒तः॒ ॥ त॒प्तम् । घ॒र्म्मम् । प॒रि॒गृह्य॒ेति॑परि॒ गृह्य॑ । अ॒य॒ज॒न्त॒ । ऊ॒र्ज्जा । यत् । य॒ज्ञम् । अय॑जन्त । दे॒वाः॒ ॥५१॥

दै॒व्याय॑ । ध॒र्त्रे । जोष्ट्रे॑ । दे॒व॒श्रीरिति॑दे॒व॒ श्रीः॒ । श्रीम॑ना॒ऽइति॒श्री म॑नाः । श॒तप॑या॒ऽइति॑श॒त प॑याः ॥ प॒रि॒गृह्य॒ेति॑परि॒ गृह्य॑ । दे॒वाः॒ । य॒ज्ञम् । आ॒य॒न् । दे॒वाः॒ । दे॒वेभ्य॑÷ । अ॒ध्व॒र्य्य॑न्त॑÷ । अ॒स्थुः॒ ॥५२॥

वी॒तम् । ह॒विः॒ । श॒मि॒तम् । श॒मि॒ता । य॒जध्यै॑ । तु॒रीय॑÷ । य॒ज्ञः॒ । यत्र॑ । ह॒व्यम् । एति॑ ॥ तत॑÷ । वा॒काः॒ । आ॒शिष॒ऽइत्या शिष॑÷ । नः॒ । जु॒ष॒न्ता॒म् ॥५३॥

ई॒ड्य॑÷ । त॒प्तम् । प॒रि॒गृह्य॒ेति॑परि॒ गृह्य॑ । य॒ज्ञम् ॥५१॥

दै॒व्याय॑ । ध॒र्त्रे । जोष्ट्रे॑ । दे॒व॒श्रीरिति॑दे॒व॒ श्रीः । श्रीम॑ना॒ऽइति॒श्री म॑नाः । प॒रि॒गृह्य॒ेति॑परि॒ गृह्य॑ । य॒ज्ञम् । दे॒वेभ्य॑÷ । अ॒ध्व॒र्य॑न्त॑÷ । अ॒स्थुः ॥५२॥

य॒जध्यै॑ । य॒ज्ञः । यत्र॑ । ह॒व्यम् । आ॒शिष॒ऽइत्या शिष॑÷ ॥५३॥

---

[1]प॒रि॒गृह्य॒ेते॑ति॑परि॒ गृह्य॑ । अ॒य॒ज॒न्त॒ । य्यत् । य्य॒ज्ञम् । अय॑जन्त ॥५१

दै॒व्याय॑ । श॒तप॑या॒ऽइति॑श॒त प॑याः । [2]प॒रि॒गृह्य॒ेति॑परि॒ गृह्य॑ । य्य॒ज्ञम् । आ॒य॒न् । [3]अ॒ध्व॒र्य्य॑म् [3]त॑÷ ॥५२॥

य्य॒जध्यै॑ । तु॒रीय॑÷ । य्य॒ज्ञः । य्यत्र॑ । [4]जु॒ष॑ताम् ॥५३॥

---

१. अपपाठोऽयम्, 'प॒रि॒गृह्य॒ेति॑परि॒' इत्येवं युक्तः पाठो द्रष्टव्यः ।

२. अपपाठोऽयम्, 'प॒रि॒गृह्य॒ेति॑' इति शुद्धः पाठो ज्ञेयः ।

३. अस्थानेऽवग्रहनिर्देशः, 'अ॒ध्व॒र्य॑न्त॑÷' इत्यनवगृहीतेन पाठेन भाव्यम् ।

४. अपपाठोऽयम्, 'जु॒ष॒न्ता॒म्' इति साधुः पाठो द्रष्टव्यः ।

सूर्य्यरश्मिरितिसूर्य्य रश्मिः । हरिकेशऽइतिहरि केशः । पुरस्त्तात् । सविता । ज्योतिः । उत् । अयान् । अजस्रम् ॥ तस्य । पूषा । प्रसवऽइतिप्र सवे । याति । विद्वान् । सम्पश्श्यन्नितिसम् पश्श्यन् । विश्वा । भुवनानि । गोपाः ॥५४॥

विमानऽइतिवि मानः । एषः । दिवः । मद्ध्ये । आस्ते । आपप्रिवानित्यापप्रि वान् । रोदसीऽइतिरोदसी । अन्तरिक्क्षम् ॥ सः । विश्वाचीः । अभि । चष्टे । घृताचीः । अन्तरा । पूर्वम् । अपरम् । च । केतुम् ॥५५॥

उक्क्षा । समुद्रः । अरुणः । सुपर्णऽइतिसु पर्णः । पूर्वस्य । योनिम् । पितुः । आ । विवेश ॥ मद्ध्ये । दिवः । निहितऽइतिनि हितः । पृश्निः । अश्मा । वि । चक्रमे । रजसः । पाति । अन्तौ ॥५६॥

सूर्यरश्मिरितिसूर्य रश्मिः । पुरस्तात् । प्रसवऽइतिप्र सवे । विद्वान् । सम्पश्यन्नितिसम् पश्यन् । विश्वा ॥५४॥

मध्ये । आस्ते । आपप्रिवानित्यापप्रि वान् । अन्तरिक्षम् । विश्वाचीः । चष्टे ॥५५॥

उक्षा । समुद्रः । सुपर्णऽइतिसु पर्णः । मध्ये । पृश्निः । अश्मा । चक्रमे ॥५६॥

सूर्यरश्मिरितिसूर्य रश्मिः । अयान् । याति । सम्पश्यनितिसम् पश्यन् ॥५४॥

विमानऽइतिवि मानः । आपप्रिवानित्यापप्रि वान् ॥५५॥

योनिम् । [1]आतौ ॥५६॥

---

१. अपपाठोऽयं लेखकप्रमादजः, 'अन्तौ' इति शुद्धः पाठो ज्ञेयः ।

आजुह्वानऽइत्या जुह्वानः । अश्विना । [१]यवैः ॥२९॥

ऊर्णम्म्रदाऽइत्यूर्ण म्रदाः । नासत्या । अश्विना । अश्वा ॥३०॥

इन्द्राय । वीर्य्यम् । उपवाकाभिरित्युप वाकाभिः ॥२७॥

सुरया ॥२८॥

वर्द्धयन् । इन्द्रियम् । इन्द्राय । [१]य्यवैः ॥२९॥

[२]ऊर्ण्णम्म्रदाऽइत्यूर्ण्णम् म्रदाः । इन्द्राय ॥३०॥

---

१. एतत्पदविषये पूर्वा ३२२ पृष्ठस्था टिप्पणी १ द्रष्टव्या ।

२. एतत्पदविषये द्रष्टव्या पूर्वा १३ पृष्ठस्था टिप्पणी २ ।

दुरः । दिशः । कवष्यः । न । व्यचस्वतीः । अश्विभ्यामित्यश्वि भ्याम् । न । दुरः । दिशः । इन्द्रः । न । रोदसीऽइतिरोदसी । दुघेऽइतिदुघे । दुहे । धेनुः । सरस्वती । अश्विना । इन्द्राय । भेषजम् । शुक्रम् । न । ज्योतिः । इन्द्रियम् ॥३१॥

सुपेशसेतिसु पेशसा । उषेऽइत्युषे । नक्क्तम् । दिवा । अश्विना । सम् । अञ्जातेऽइत्यंञ्जाते । सरस्वत्त्या । त्विषिम् । इन्द्रे । न । भेषजम् । श्येनः । न । रजसा । हृदा । श्रिया । न । मासरम् ॥३२॥

दैव्या । होतारा । भिषजा । अश्विना । इन्द्रम् । न । जागृवि । दिवा । नक्क्तम् । न । भेषजैः । शूषम् । सरस्वती । भिषक् । सीसेन । दुहे । इन्द्रियम् ॥३३॥

तिस्रः । देवीः । न । भेषजम् । त्रयः । त्रिधातवऽइतित्रि धातवः । अपसः । रूपम् । इन्द्रे । हिरण्ययम् । अश्विना । इडा । न । भारती । वाचा । सरस्वती । महः । इन्द्राय । दुहे । इन्द्रियम् ॥३४॥

कवष्यः । अश्विभ्यामित्यश्वि भ्याम् । अश्विना । शुक्रम् ॥३१॥
उषेऽइत्युषे । नक्तम् । अश्विना । अञ्जातेऽइत्यञ्जाते । सरस्वत्या ॥३२॥
दैव्या । अश्विना । नक्तम् ॥३३॥
त्रिधातवऽइतित्रि धातवः । हिरण्ययम् । अश्विना ॥३४॥

इन्द्राय । इन्द्रियम् ॥३१॥
श्रिया ॥३२॥ इन्द्रियम् ॥३३॥
त्रयः । हिरण्ययम् । इन्द्राय । इन्द्रियम् ॥३४॥

सुरेतसमितिसु रेतसम् । ऋषभम् । नर्य्यापसमितिनर्य्य अपसम् । त्वष्टारम् । इन्द्रम् । अश्विना । भिषजम् । न । सरस्वतीम् । ओजः । न । जूतिः । इन्द्रियम् । वृकः । न । रभसः । भिषक् । यशः । सुरया । भेषजम् । श्रिया । न । मासरम् ॥३५॥

वनस्पतिम् । शमितारम् । शतक्रतुमितिशत क्रतुम् । भीमम् । न । मन्युम् । राजानम् । व्याघ्रम् । नमसा । अश्विना । भामम् । सरस्वती । भिषक् । इन्द्राय । दुहे । इन्द्रियम् ॥३६॥

अग्निम् । स्वाहा । आज्यस्य । स्तोकानाम् । मेदसाम् । पृथक् । छागम् । अश्विभ्यामित्यश्वि भ्याम् । मेषम् । सरस्वत्यै । ऋषभम् । इन्द्राय । सिंहाय । सहसे । इन्द्रियम् । अग्निम् । न । भेषजम् । सोमम् । इन्द्रियम् । इन्द्रम् । सुत्रामाणमितिसु त्रामाणम् । सवितारम् । वरुणम् । भिषजाम् । पतिम् । वनस्पतिम् । प्रियम् । पाथः । न । भेषजम् ।

त्वष्टारम् । अश्विना ॥३५॥

वनस्पतिम् । शतक्रतुमितिशत क्रतुम् । मन्युम् । व्याघ्रम् । अश्विना ॥३६

अग्निम् । आज्यस्य । अश्विभ्यामित्यश्वि भ्याम् । सरस्वत्यै । अग्निम् । सुत्रामाणमितिसु त्रामाणम् । वनस्पतिम् ।

नर्य्यापसमितिनर्य्य अपसम् । इन्द्रियम् । यशः । सुरया । श्रिया ॥३५॥

इन्द्राय । इन्द्रियम् ॥३६॥

इन्द्राय । सिंहाय । इन्द्रियम् । इन्द्रियम् । प्रियम् ॥३७॥

देवाः । आज्ज्यपाऽइत्याज्ज्य पाः । जुषाणः । अग्निः । भेषजम् ॥३७॥

अश्विनौ । छागस्य । वपायाः । मेदसः । जुषेताम् । हविः ॥ सरस्वतीम् । मेषस्य । जुषताम् ॥ इन्द्रम् । ऋषभस्य ॥३८॥

अश्विनौ । सरस्वतीम् । इन्द्रम् । सुत्रामाणमितिसु त्रामाणम् । इमे । सोमाः । सुरामाणः । छागैः । न । मेषैः । ऋषभैः । सुताः । शष्पैः । न । तोक्क्मभिरिति- तोक्क्म भिः । लाजैः । महस्वन्तः । मदाः । मासरेण । परिष्कृताः । परिकृताऽइतिपरि कृताः । शुक्राः । पयस्वन्तः । अमृताः । प्रस्थिताऽइतिप्र स्थिताः । वः । मधुश्चुतऽइतिमधु श्चुतः । तान् । अश्विना । सरस्वती । पिबन्तु । मदन्तु । व्यन्तु ॥३९॥

आज्यपाऽइत्याज्य पाः । अग्निः ॥३७॥

अश्विनौ ॥३८॥

अश्विनौ । सुत्रामाणमितिसु त्रामाणम् । शष्पैः । तोक्मभिरितितोक्म भिः । शुक्राः । प्रस्थिताऽइतिप्र स्थिताः । मधुश्चुतऽइतिमधु श्चुतः । अश्विना ॥३९॥

वपायाः ॥३८॥

पयस्वन्तः । वः । [1]मधुश्च्युतऽइतिमधु श्च्युतः ॥३९॥

---

१. इह पूर्वा २८८ पृष्ठस्था प्रथमा टिप्पणी द्रष्टव्या ।

अश्विनौं । छागस्य । हविषः । आत्ताम् । अद्य । मद्ध्यतः । मेदः । उद्भृतमित्युत् भृतम् । पुरा । द्वेषोभ्य- ऽइतिद्वेषः भ्यः । पुरा । पौरुषेय्याः । गृभः । घस्ताम् । नूनम् । घासेऽअज्राणामितिघासे अज्राणाम् । यवसप्रथमानामितियवस प्रथमानाम् । सुमत्क्षराणामितिसुमत् क्षराणाम् । शतरुद्रियाणामितिशत रुद्रियाणाम् । अग्निष्वात्तानाम् । अग्निस्वात्तानामित्यग्नि स्वात्तानाम् । पीवोपवसनानामितिपीवः उपवसनानाम् । पार्श्वतः । श्रोणितः । शितामतः । उत्सादतऽइत्युत् सादतः । अङ्गादङ्गादित्यङ्गात् अङ्गात् । अवत्तानाम् । करतः । एव । अश्विना । जुषेताम् । हविः ॥४०॥

सरस्वतीम् । मेषस्य । आ । ब्रुयत् । घसत् । करत् । एवम् । सरस्वती । जुषताम् ॥ इन्द्रम् । ऋषभस्य । इन्द्रः ॥४१

अश्विनौ । अद्य । मध्यतः ।उद्भृतमित्युत् भृतम् । द्वेषोभ्यऽइतिद्वेषः भ्यः । घस्ताम् । घासेऽअज्राणामितिघासे अज्राणाम् । यवसप्रथमानामितियवस प्रथमानाम् । सुमत्क्षराणामितिसुमत् क्षराणाम् । शतरुद्रियाणामितिशत रुद्रियाणाम् । अग्निष्वात्तानाम् । अग्निस्वात्तानामित्यग्नि स्वात्तानाम् । उत्सादतऽइत्युत् सादतः । अङ्गादङ्गादित्यङ्गात् अङ्गात् । अश्विना ॥४०॥

[1]आत्ता । पौरुषेय्याः । [1]घस्ता । य्यवसप्रथमानामितिय्यवस प्रथमानाम् । शतरुद्रिय्याणामितिशत रुद्रिय्याणाम् । [2]उथ्सादतऽइत्युत् सादतः ॥४०

ब्रुयत् ॥४१॥

१. इह मन्त्रे पदपाठे च सर्वत्र 'आत्ताम्, घस्ताम्' पदे उपलभ्येते । 'क' कोशे उभयोराकारान्तः पाठोऽपपाठरूप उत पाठभेदरूप इति विचारार्हः ।

२. अत्र ४५ पृष्ठस्था द्वितीया टिप्पणी द्रष्टव्या ।

वनस्प्पतिम् । अभि । हि । पिष्टतमयेतिपिष्ट तमया । रभिष्ठया । रशनया । अधित ॥ यत्र । अश्विनोः । छागस्य । हविषः । प्रिया । धामानि । सरस्वत्त्याः । मेषस्य । इन्द्रस्य । ऋषभस्य । अग्नेः । सोमस्य । इन्द्रस्य । सुत्राम्मणऽइतिसु त्राम्मणः । सवितुः । वरुणस्य । वनस्प्पतेः । प्रिया । पाथांसि । देवानाम् । आज्ज्यपानामित्त्याज्ज्य पानाम् । अग्नेः । होतुः । तत्र । एतान् । प्रस्तुत्त्येवेतिप्रस्तुत्त्य इव । उपस्तुत्त्येवेत्त्युपस्तुत्त्य इव । उपावस्रक्क्षदित्त्युप अवस्रक्क्षत् । रभीयसऽइवेतिरभीयसः इव । कृत्त्वी । करत् । एवम् । देवः । वनस्प्पतिः ॥४२॥

अग्निम् । स्विष्टकृतमितिस्विष्ट कृतम् । अयाट् । अग्निः । यक्क्षत् । यक्क्षत् । स्वम् । महिमानम् । आ । यजताम् । एज्ज्याऽइत्त्या इज्ज्याः । इषः । कृणोतु । सः । अध्वरा । जातवेदाऽइतिजात वेदाः ॥४३॥

वनस्पतिम् । पिष्टतमयेतिपिष्ट तमया । रभिष्ठया । यत्र । अश्विनोः । सरस्वत्याः । अग्नेः । सुत्राम्णऽइतिसु त्राम्णः । वनस्पतेः । आज्यपानामित्याज्य पानाम् । अग्नेः । तत्र । प्रस्तुत्येवेतिप्रस्तुत्य इव । उपस्तुत्येवेत्युपस्तुत्य इव । उपावस्रक्षदित्युप अवस्रक्षत् । कृत्वी । वनस्पतिः ॥४२॥

अग्निम् । स्विष्टकृतमितिस्विष्ट कृतम् । ग्निः । यक्षत् । यक्षत् । एज्याऽइत्या इज्याः । अध्वरा ॥४३॥

---

[1]पिष्टतमय्येतिपिष्ट तमय्या । रभिष्ठय्या । रशनय्या । य्यत्र । प्रिय्या । प्रिय्या । रभीय्यसऽइवेतिरभीय्यसः इव ॥४२॥

अय्याट् । य्यक्षत् । य्यक्षत् । य्यजताम् । जातवेदाऽइतिजात वेदाः ॥४३

---

१. इतः पूर्वस्या मन्त्रकण्डिकाया अपुनरुक्तानि त्रीणि पदानि पूर्व-कण्डिकान्त एव पठितानीति कृत्वा इत उत्तरं चतसृणां कण्डिकासंख्यानां भेदो जायते ।

देवम् । बर्हिः । सरस्वती । सुदेवमितिसु देवम् । इन्द्रे । अश्विना ॥ तेजः । न । चक्कर्षुः । [1]अक्क्ष्योः । बर्हिषा । दधुः । इन्द्रियम् । वसुवनऽइतिवसु वने । वसुधेयस्येतिवसु धेयस्य । व्यन्तु । यज ॥४४॥

देवीः । द्वारः । अश्विना । भिषजा । इन्द्रे । सरस्वती ॥ प्राणम् । न । वीर्य्यम् । नसि । द्वारः । दधुः । इन्द्रियम् ॥४५॥

देवीऽइतिदेवी । उषासौ । उषसावित्त्युषसौ । अश्विना । सुत्रामेतिसु त्रामा । इन्द्रे । सरस्वती ॥ बलम् । न । वाचम् । आस्ये । उषाभ्याम् । दधुः । इन्द्रियम् ॥४६॥

अश्विना । चक्षुः । [1]अक्ष्योः ॥४४॥

अश्विना ॥४५॥

उषसावित्युषसौ । अश्विना । सुत्रामेतिसु त्रामा । उषाभ्याम् ॥४६॥

---

[1]अक्ष्योः । इन्द्रियम् । वसुवनऽइतिवसु [2]वने । वसुधेयस्येतिवसु धेयस्य । व्यन्तु ॥४४॥

वीर्य्यम् । इन्द्रियम् ॥४५॥

इन्द्रियम् ॥४६॥

---

१. बम्बईमुद्रिते ककोशे च 'अक्ष्योः' इत्येवं स्वरितनिर्देश उपलभ्यते अन्यत्र 'अक्ष्योः' इत्येवमपि । पदस्यान्यत्र प्रयोगाभावात् कः साधुनिर्देश इत्यत्र वैदिका एव प्रमाणम् ।

२. ककोशशैल्यनुसारमिह 'वने' इत्येकवकारवता पाठेन भाव्यम् । उत्तरयोर्द्वयोर्मन्त्रयोः पुनरुक्तपदनिर्देशे ककोश एकवकारवान् एव पाठो दृश्यते ।

देवीऽइतिदेवी । जोष्ट्रीऽइतिजोष्ट्री । सरस्वती । अश्विना । इन्द्रम् । अवर्द्धयन् ॥ श्रोत्रम् । न । कर्णयोः । यशः । जोष्ट्रीभ्याम् । दधुः । इन्द्रियम् ॥४७॥

देवीऽइतिदेवी । ऊर्जाहुतीऽइत्यूर्जा[1] आहुती । दुघेऽइतिदुघे । सुदुघेतिसु दुघा । इन्द्रे । सरस्वती । अश्विना । भिषजा । अवतः ॥ शुक्रम् । न । ज्योतिः । स्तनयोः । आहुतीऽइत्या हुती । धत्तः । इन्द्रियम् ॥४८॥

देवा । देवानाम् । भिषजा । होतारौ । इन्द्रम् । अश्विना ॥ वषट्कारैरितिवषट् कारैः । सरस्वती । त्विषिम् । न । हृदये । मतिम् । होतृभ्यामितिहोतृ भ्याम् । दधुः । इन्द्रियम् ॥४९॥

जोष्ट्रीऽइतिजोष्ट्री । अश्विना । श्रोत्रम् । जोष्ट्रीभ्याम् ॥४७॥

ऊर्जाहुतीऽइत्यूर्जा आहुती । अश्विना । शुक्रम् । आहुतीऽइत्या हुती ॥४८॥

अश्विना । वषट्कारैरितिवषट् कारैः । होतृभ्यामितिहोतृ भ्याम् ॥४९॥

अवर्द्धयन् । कर्णयोः । यशः । इन्द्रियम् ॥४७॥

स्तनयोः । इन्द्रियम् ॥४८॥

वषट्कारैरितिवषट् कारैः । हृदये । इन्द्रियम् ॥४९॥

---

१. काशी संस्करणे इह उत्तरत्र (२८।१६) च 'इत्यूर्जा आहुती' इत्येवं द्व्युदात्तपाठ उपलभ्यते । ङ कोशेऽपीह 'आहुती' इत्येवं स्वरमपमृज्य 'आहुती' इत्येवं संशोध्य स्वरो लेखकेन प्रदर्शितः । परं २८।१६ पदपाठे तु 'आहुती' इत्थमेव स्वरो दृश्यते ।

देवीः । तिस्रः । तिस्रः । देवीः । अश्विना । इडा । सरस्वती ॥ शूषम् । न । मध्ये । नाभ्याम् । इन्द्राय । दधुः । इन्द्रियम् ॥५०॥

देवः । इन्द्रः । नराशंसः । त्रिवरूथऽइतित्रि ¹वरूथः । सरस्वत्या । अश्विभ्यामित्यश्विभ्याम् । ईयते । रथः ॥ रेतः । न । रूपम् । अमृतम् । जनित्रम् । इन्द्राय । त्वष्टा । दधत् । इन्द्रियाणि ॥५१॥

देवः । देवैः । वनस्पतिः । हिरण्यपर्णऽइतिहिरण्य पर्णः । अश्विभ्यामित्यश्विभ्याम् । सरस्वत्या । सुपिप्पलऽइतिसु ²पिप्पलः । इन्द्राय । पच्यते । मधु ॥ ओजः । न । जूतिः । ऋषभः । न । भामम् । वनस्पतिः । नः । दधत् । इन्द्रियाणि ॥५२॥

अश्विना । मध्ये । नाभ्याम् ॥५०॥

त्रिवरूथऽइतित्रि वरूथः । सरस्वत्या । अश्विभ्यामित्यश्वि भ्याम् । जनित्रम् । त्वष्टा ॥५१॥

वनस्पतिः । हिरण्यपर्णऽइतिहिरण्य पर्णः । अश्विभ्यामित्यश्वि भ्याम् । सरस्वत्या । पच्यते । वनस्पतिः ॥५२॥

---

³पूषम् । ³मध्या । इन्द्राय । इन्द्रियम् ॥५०॥

त्रिवरूथऽइतित्रि वरूथः । ईयते । इन्द्राय । इन्द्रियाणि ॥५१॥

इन्द्राय । इन्द्रियाणि ॥५२॥

---

१. 'वरूथः' इति काशिकः पाठः ।

२. 'पिप्पलः' इति काशिकः पाठः ।

३. किमेते ककोशस्थे पदे अपपाठरूपे पाठान्तरे वेति विचारार्हे स्त. ।

देवम् । बर्हिः । वारितीनाम् । अध्वरे । स्तीर्णम् । अश्विभ्यामित्यश्वि भ्याम् । ऊर्णम्म्रदाऽइत्त्यूर्ण्णं म्रदाः । सरस्वत्त्या । स्योनम् । इन्द्र । ते । सदः ॥ ईशायै । मन्युम् । राजानम् । बर्हिषा । दधुः । इन्द्रियम् ॥५३॥

देवः । अग्निः । स्विष्टकृदितिस्विष्ट कृत् । देवान् । यक्षत् । यथायथमितियथा यथम् । होतारौ । इन्द्रम् । अश्विना । वाचा । वाचम् । सरस्वतीम् । अग्निम् । सोमम् । स्विष्टकृदितिस्विष्ट कृत् । स्विष्टऽइतिसु इष्टः । इन्द्रः । सुत्रामेतिसु त्रामा । सविता । वरुणः । भिषक् । इष्टः । देवः । वनस्पतिः । स्विष्टाऽइतिसु इष्टाः । देवाः । आज्ज्यपाऽइत्त्याज्ज्य पाः । स्विष्टऽइतिसु इष्टः । अग्निः ।

अध्वरे । अश्विभ्यामित्यश्वि भ्याम् । ऊर्णम्रदाऽइत्यूर्ण्णं म्रदाः । सरस्वत्या । मन्युम् ॥५३॥

अग्निः । स्विष्टकृदितिस्विष्ट कृत् । यक्षत् । अश्विना । अग्निम् । स्विष्टकृदिति-स्विष्ट कृत् । स्विष्टऽइतिसु इष्टः । सुत्रामेतिसु त्रामा । इष्टः । वनस्पतिः । स्विष्टाऽइतिसु इष्टाः । आज्यपाऽइत्याज्य पाः । स्विष्टऽइतिसु इष्टः । अग्निः ।

---

[1]ऊर्णम्म्रदाऽइत्यूर्ण्णं म्रदाः । ईशाय्यै । इन्द्रियम् ॥५३॥

य्यक्षत् । य्यथाय्यथमितिय्यथा [2]य्यथम् । य्यशः । इन्द्रिय्यम् ॥५४॥

---

१. अत्र ४।१० पदपाठे च अकारान्त अवगृह्यते, अन्यत्र २।२, ५; २१।३३ इत्येतेषु स्थलेषु मकारान्तः। इह पूर्वत्र १३ पृष्ठस्था द्वितीया टिप्पणी, प्राक्कथने 'माध्यन्दिनपदपाठस्य चतुर्विधः पाठ' इत्यत्र ४८ पृष्ठं चावलोकनीयम् ।

२. 'य्यथम्' इति शुद्धः पाठो ज्ञेयः ।

अग्निना । होता । होत्रे । स्विष्टकृदितिस्विष्ट कृत् । यशः । न । दधत् । इन्द्रियम् । ऊर्जम् । अपचितिमित्त्यप चितिम् । स्वधाम् ॥५४॥

अग्निम् । अद्य । होतारम् । अवृणीत । अयम् । यजमानः । पचन् । पक्तीः । पचन् । पुरोडाशान् । बद्ध्नन् । अश्विब्भ्यामित्त्यश्विभ्याम् । छागम् । सरस्वत्त्यै । मेषम् । इन्द्राय । ऋषभम् । सुन्वन् । अश्विब्भ्यामित्त्यश्विभ्याम् । सरस्वत्त्यै । इन्द्राय । सुत्राम्म्णऽइतिसु त्राम्म्णे । सुरासोमानितिसुरा सोमान् ॥५५॥

सूपस्त्थाऽइतिसु [1]उपस्त्थाः । अद्य । देवः । वनस्प्पतिः । अभवत् । अश्विब्भ्यामित्त्यश्वि भ्याम् । छागेन । सरस्वत्त्यै । मेषेण । इन्द्राय । ऋषभेण । अक्क्षन् । तान् । मेदस्तः । प्रति । पचता । अगृभीषत । अवीवृधन्त । पुरोडाशैः । अपुः । अश्विना । सरस्वती । इन्द्रः । सुत्रामेतिसु त्रामा । सुरासोमानितिसुरा सोमान् ॥५६॥

अग्निना । होत्रे । स्विष्टकृदितिस्विष्ट कृत् । अपचितिमित्यप चितिम् ॥५४॥

अग्निम् । अद्य । पक्तीः । बध्नन् । अश्विभ्यामित्यश्वि भ्याम् । सरस्वत्यै । सुन्वन् । अश्विभ्यामित्यश्वि भ्याम् । सरस्वत्यै । सुत्राम्णऽइतिसु त्राम्णे ॥५५॥

सूपस्थाऽइतिसु उपस्थाः । अद्य । वनस्पतिः । अश्विभ्यामित्यश्वि भ्याम् । सरस्वत्यै । अक्षन् । मेदस्तः । अश्विना । सुत्रामेतिसु त्रामा ॥५६॥

अग्नम् । ययजमानः । इन्द्राग्न । इन्द्राग्न ॥५५॥

इन्द्राग्न । [2]अवीवृद्धत् ॥५६॥

---

१. 'उपस्त्थाः' इति काशिकः पाठः ।

२. 'अवीवृधन्त' इत्येवं शुद्धः पाठोऽत्र द्रष्टव्यः ।

त्वाम् । अद्य । ऋषे । आर्षेय । ऋषीणाम् । नपात् । अवृणीत । अयम् । यजमानः । बहुभ्यऽइतिबहु भ्यः । आ । सङ्गतेभ्यऽइतिसम् गतेभ्यः । एषः । मे । देवेषु । वसु । वारि । आ । यक्ष्यते । इति । ता । या । देवाः । देव । दानानि । अदुः । तानि । अस्मै । आ । च । शास्व । आ । च । गुरस्व । इषितः । च । होतः । असि । भद्रवाच्यायेतिभद्र वाच्याय । प्रेषितऽइतिप्र इषितः । मानुषः । सूक्तवाकायेतिसूक्त वाकाय । सूक्तेतिसु उक्ता । ब्रूहि ॥५७॥

॥ इति वाजसनेयिसंहितापदे एकविंशोऽध्यायः ॥

अद्य । बहुभ्यऽइतिबहु भ्यः । सङ्गतेभ्यऽइतिसम् गतेभ्यः । यक्ष्यते । अस्मै । भद्रवाच्यायेतिभद्र वाच्याय । प्रेषितऽइतिप्र इषितः । सूक्तवाकायेतिसूक्त वाकाय । सूक्तेतिसु उक्ता । ५७॥

आर्षेय । अयम् । यजमानः । यक्ष्यते । या । भद्रवाच्यायेतिभद्र वाच्याय । सूक्तवाकायेतिसूक्त वाकाय ।।५७।।

॥ इति श्रीवाजसनेयिसंहितापदे एकविंशतिमो[1]ऽध्यायः ॥

---

१. द्रष्टव्याऽत्र ३९६ पृष्ठस्था टिप्पणी २ ।

द्वाविंशोऽध्यायः

तेजः । असि । शुक्रम् । अमृतम् । आयुष्पाः । आयुष्पाऽइत्यायुः पाः । आयुः । मे । पाहि ॥ आ । ददे ॥१॥

इमाम् । अगृभ्णन् । रशनाम् । ऋतस्य । पूर्वे । आयुषि । विदथेषु । कव्या ॥ सा । नः । अस्मिन् । सुते । आ । बभूव । ऋतस्य । सामन् । सरम् । आरपन्तीत्या रपन्ती ॥२॥

अभिधाऽइत्यभि धाः । असि । भुवनम् । यन्ता । धर्त्ता ॥ सः । त्वम् । अग्निम् । वैश्वानरम् । सप्रथसमितिस प्रथसम् । गच्छ । स्वाहाकृतऽइतिस्वाहा कृतः ॥३॥

स्वगेतिस्व गा । त्वा । देवेभ्यः । प्रजापतयऽइतिप्रजा पतये । ब्रह्मन् । अश्वम् । भन्त्स्यामि । देवेभ्यः ।

शुक्रम् । आयुष्पाः । आयुष्पाऽइत्यायुः पाः ॥१॥

अगृभ्णन् । कव्या । अस्मिन् । आरपन्तीत्या रपन्ती ॥२॥

अभिधाऽइत्यभि धाः । अग्निम् । वैश्वानरम् । सप्रथसमिति प्रथसम् । गछ ॥३॥

देवेभ्यः । प्रजापतयऽइतिप्रजा पतये । ब्रह्मन् । अश्वम् । देवेभ्यः ।

आयुष्पाः । आयुष्पाऽइत्यायुः पाः । आयुः ॥१॥

आयुषि ॥२॥ यन्ता ॥३॥

प्रजापतयेऽइतिप्रजा पतये । प्रजापतयेऽइतिप्रजा पतये । प्रजापतये-

प्रजापतयऽइतिप्प्रजा पतये । तेन । राद्ध्यासम् ॥ तम् । बधान । देवेब्भ्यः । प्रजापतयऽइतिप्प्रजा पतये । तेन । राद्ध्नुहि ॥४॥

प्रजापतयऽइतिप्प्रजा पतये । त्वा । जुष्टम् । प्र । उक्क्षामि । इन्द्राग्गिब्भ्यामितीन्द्राग्गि भ्याम् । वायवे । विश्वेब्भ्यः । देवेब्भ्यः । सर्वेब्भ्यः । देवेब्भ्यः ॥ यः । अर्वन्तम् । जिघांसति । तम् । अभि । अमीति । वरुणः ॥ परः । मर्त्तः । परः । श्वा ॥५॥

अपाम् । मोदाय । सवित्त्रे । वायवे । विष्ण्णवे । इन्द्राय । बृहस्पतये । मित्त्राय । वरुणाय ॥६॥

हिङ्क्कारायेतिहिम् कारय । हिङ्क्कृतायेतिहिम् कृताय । क्रन्दते । अवक्क्रन्दायेत्त्यव क्रन्दाय । प्रोथते । प्प्रोथायेतिप्प्र प्रोथाय । गन्धाय । घ्राताय । निविष्टायेतिनि विष्टाय ।

प्रजापतयऽइतिप्रजा पतये । राध्यासम् । देवेभ्यः । प्रजापतयऽइतिप्रजा पतये । राध्नुहि ॥४॥

प्रजापतयऽइतिप्रजा पतये । जुष्टम् । उक्षामि । इन्द्राग्निभ्यामितीन्द्राग्नि भ्याम् । विश्वेभ्यः । देवेभ्यः । सर्वेभ्यः । देवेभ्यः ॥५॥

सवित्रे । विष्णवे । बृहस्पतये । मित्राय ॥६॥

अवक्रन्दायेत्यव क्रन्दाय । प्रप्रोथायेतिप्र प्रोथाय । निविष्टायेतिनि विष्टाय ।

ऽइतिप्रजा पतय्रे ॥४॥

प्रजापतय्रऽइतिप्रजा पतय्रे । वाय्रवे । य्यः ॥५॥

मोदाय्र । वाय्रवे । इन्द्राय्र । बृहस्पतय्रे । मित्राय्र । वरुणाय्र ॥६॥

हिङ्कारायेतिहिम् काराय्र । हिङ्कृताय्रेतिहिम् कृताय्र । अवक्रन्दाय्रेत्यव क्रन्दाय्र । प्रप्रोथाय्रेतिप्र प्रोथाय्र । गन्धाय्र । घ्राताय्र । निविष्टाय्रेतिनि

उपविष्टायेत्युप विष्टाय । सन्दितायेतिसम् दिताय । वल्गते । आसीनाय । शयानाय । स्वपते । जाग्रते । कूजते । प्रबुद्धायेतिप्र बुद्धाय । विजृम्भमाणायेतिवि जृम्भमाणाय । विचृत्तायेतिवि चृत्ताय । सꣳहानायेतिसम् हानाय । उपस्थितायेत्युप स्थिताय । आयनायेत्या अयनाय । प्रायणाय । प्रायनायेतिप्र अयनाय ॥७॥

यते । धावते । उद्द्रावायेत्युत् द्रावाय । उद्द्रुतायेत्युत् द्रुताय । शूकाराय । शूकृताय । निषण्णाय । निसन्नायेतिनि सन्नाय । उत्थिताय । जवाय । बलाय । विवर्त्तमानायेतिवि वर्त्तमानाय । विवृत्तायेतिवि वृत्ताय । विधून्वानायेतिवि [1]धून्वानाय । विधूतायेतिवि धूताय । शुश्रूषमाणाय । शृण्वते ।

उपविष्टायेत्युप विष्टाय । वल्गते । जाग्रते । प्रबुद्धायेतिप्र बुद्धाय । उपस्थितायेत्युप स्थिताय । आयनायेत्या अयनाय । प्रायनायेतिप्र अयनाय ॥७॥

उद्द्रावायेत्युत् द्रावाय । उद्द्रुतायेत्युत् द्रुताय । उत्थिताय । विधून्वानायेतिवि धून्वानाय । शृण्वते । ईक्षमाणाय । ईक्षिताय । वीक्षितायेतिवि

विष्टाय । उपविष्टायेत्युप विष्टाय । सन्दितायेतिसम् दिताय । आसीनाय । शयानाय । प्रबुद्धायेतिप्र बुद्धाय । विजृम्भमाणायेतिवि जृम्भमाणाय । विचृत्तायेतिवि चृत्ताय । सꣳहानायेतिसम् हानाय । उपस्थितायेत्युप स्थिताय । आयनायेत्या अयनाय । प्रायणाय । प्रायनायेतिप्र अयनाय ॥७

यते । उद्द्रावायेत्युत् द्रावाय । उद्द्रुतायेत्युत् द्रुताय । शूकाराय । शूकृताय । निषण्णाय । निसन्नायेतिनि सन्नाय । उत्थिताय । जवाय । बलाय । विवर्त्तमानायेतिवि वर्त्तमानाय । विवृत्तायेतिवि वृत्ताय । विधून्वानायेतिवि धून्वानाय । विधूतायेतिवि धूताय । शुश्रूषमाणाय ।

---

१. 'धून्वानाय' इति काशिकः पाठः ।

ईक्क्षमाणाय । ईक्क्षिताय । वीक्क्षितायेतिवि ईक्क्षिताय । निमेषायेतिनि मेषाय । यत् । अत्ति । तस्मै । पिबति । मूत्त्रम् । करोति । कुर्व्वते । कृताय ॥८॥

हिरण्ण्यपाणिमितिहिरण्ण्य पाणिम् । ऊतये । सवितारम् । उप । ह्वये ॥ सः । चेत्ता । देवता । पदम् ॥९॥

देवस्य । चेततः । महीम् । प्र । सवितुः । हवामहे ॥ सुमतिमितिसु मतिम् । सत्त्यराधसमितिसत्त्य राधसम् ॥१०॥

सुष्टुतिम् । सुस्तुतिमितिसु स्तुतिम् । सुमतीवृधः । सुमतिवृधऽइतिसुमति वृधः । रातिम् । सवितुः । ईमहे ॥ प्र । देवाय । मतीविदे । मतिविदऽइतिमति विदे ॥११॥

ईक्षिताय । तस्मै । मूत्रम् ॥८॥

हिरण्यपाणिमितिहिरण्य पाणिम् ॥९॥

सत्यराधसमितिसत्य राधसम् ॥१०॥

सुष्टुतिम् । सुस्तुतिमितिसु स्तुतिम् ॥११॥

ईक्षमाणाय । ईक्षिताय । वीक्षितायेतिवि ईक्षिताय । निमेषायेतिनि मेषाय । यत् । कृताय ॥८॥

[1]ऊतये । ह्वये ॥९॥

सुमतिवृधऽइतिसुमति वृधः । देवाय । मती [2][विदे । मतिविदऽइतिमति] विदे ॥११॥

---

१. इतः पूर्वस्या मन्त्रकण्डिकायाः पूर्वं गतत्वान्नेह तत्पदानि पठ्यन्ते । अत इत आरभ्यैकस्याः कण्डिकासंख्याया भेदो जायते ।

२. लेखकप्रमादान्नष्टोऽयं पाठः ।

शतिम् । सत्त्पतिमितिसत् पतिम् । महे । सवितारम् । उप । ह्वये ॥ आसवमित्त्या सवम् । देववीतयऽइतिदेव वीतये ॥१२॥

देवस्य । सवितुः । मतिम् । आसवमित्त्या सवम् । विश्वदेंव्यमितिविश्व देंव्यम् ॥ धिया । भर्गम् । मनामहे ॥१३॥

अग्निम् । स्तोमेन । बोधय । समिधानऽइतिसम् इधानः । अमर्त्त्यम् ॥ हव्या । देवेषु । नः । दधत् ॥१४॥

सः । हव्यवाडितिहव्य वाट् । अमर्त्त्यः । उशिक् । दूतः । चनोंहितऽइतिचनः हितः ॥ अग्निः । धिया । सम् । ऋण्वति ॥१५॥

अग्निम् । दूतम् । पुरः । दधे । हव्यवाहमितिहव्य वाहम् । उप । ब्रुवे ॥ देवान् । आ । सादयात् । इह ॥१६॥

सत्पतिमितिसत् पतिम् । आसवमित्या सवम् ॥१२॥
आसवमित्या सवम् । विश्वदेंव्यमितिविश्व देंव्यम् ॥१३॥
अग्निम् । हव्या ॥१४॥
हव्यवाडितिहव्य वाट् । अग्निः । ऋण्वति ॥१५॥
अग्निम् । हव्यवाहमितिहव्य वाहम् ॥१६॥

हुये । देववीतयऽइतिदेव वीतये ॥१२॥
विश्वदेंव्यमितिविश्व देंव्यम् । धिया ॥१३॥ बोधय ॥१४॥
हव्यवाडितिहव्य वाट् । धिया ॥१५॥
हव्यवाहमितिहव्य वाहम् । [2]सादयत ॥१६॥

---

१. 'इधानः' इति काशिकः पाठः ।
२. 'सादयत' 'सादयात्' उभयत्र लेटि अट्-आट्निमित्तो भेदः पाठान्तरकृत उत लेखकप्रमादज इति विचारार्हः । अन्यकोशेषु 'सादयात्' पाठः ।

अजीजनत् । हि । पवमान । सूर्यम् । विधारऽइतिविधारे । शक्मना । पयः ॥ गोजीरयेतिगो जीरया । रंहमाणः । पुरन्ध्येतिपुरम् ध्या ॥१७॥

विभूरितिवि भूः । मात्रा । प्रभूरितिप्र भूः । पित्रा । अश्वः । असि । हयः । अत्यः । मयः । अर्वा । सप्तिः । वाजी । वृषा । नृमणाः । नृमनाऽइतिनृमनाः ॥ ययुः । नाम । शिशुः । नाम । आदित्यानाम् । पत्वा । अनु । इहि । [1]देवाः । आशापालाऽइत्याशापालाः । एतम् । देवेभ्यः । अश्वम् । मेधाय । प्रोक्षितमितिप्र उक्षितम् । रक्षत । इह । रन्तिः । रमताम् । धृतिः । स्वधृतिरितिस्व धृतिः । स्वाहा ॥१८॥

काय । कस्मै । कतमस्मै । आधिमित्या धिम् ।

शक्मना ॥१७॥

मात्रा । प्रभूरितिप्र भूः । पित्रा । अश्वः । अत्यः । सप्तिः । आदित्यानाम् । [2]पत्वा । आशापालाऽइत्याशा पालाः । देवेभ्यः । अश्वम् । प्रोक्षितमितिप्र उक्षितम् । रक्षत ॥१८॥

कस्मै । कतमस्मै । आधिमित्या धिम् । आधीतायेत्या धीताय ।

सूर्यम् । विधारऽइतिवि धारे । पयः । गोजीरयेतिगो जीरया ॥१७

विभूरितिवि भूः । हयः । मयः । ययुः । [2]पत्वम् । मेधाय ॥१८॥

काय । आधीतायेत्या धीताय । प्रजापतयऽइतिप्रजा पतये ।

---

१. द्र० पूर्वत्र ३२२ पृष्ठे 'यवाः यवाः'; ३२८ पृष्ठे 'विश्वाः विश्वाः'; ३२५ पृष्ठे 'देवाः देवाः' इत्यादिविषयकाष्टिप्पण्यः ।

२. 'मुम्बईमुद्रिते 'पत्वे' ककोशे च 'पत्वम्' उभावप्यपपाठौ ।

आधीतायेत्त्या धीताय । मनः । प्रजापतयऽइतिप्रजा पतये । चित्तम् । विज्ञातायेतिवि ज्ञाताय । अदित्यै । मह्यै । सुमृडीकायाऽइतिसु [1]मृडीकायै । सरस्वत्यै । पावकायै । बृहत्यै । पूष्णे । प्रपथ्यायेतिप्र पथ्याय । नरन्धिषाय । त्वष्ट्रे । तुरीपाय । पुरुरूपायेतिपुरु रूपाय । विष्णवे । निभूयपायेतिनिभूय पाय । शिपिविष्टायेतिशिपि विष्टाय ॥१९॥

आ । ब्रह्मन् । ब्राह्मणः । ब्रह्मवर्चसीतिब्रह्म [2]वर्चसी । जायताम् । आ । राष्ट्रे । राजन्यः । शूरः । इषव्यः । अतिव्याधीत्यति व्याधी । महारथऽइतिमहा

प्रजापतयऽइतिप्रजा पतये । विज्ञातायेतिवि ज्ञाताय । अदित्यै । सरस्वत्यै । बृहत्यै । पूष्णे । प्रपथ्यायेतिप्र पथ्याय । त्वष्ट्रे । विष्णवे । शिपिविष्टायेतिशिपि विष्टाय ॥१९॥

ब्रह्मन् । ब्राह्मणः । ब्रह्मवर्चसीतिब्रह्म वर्चसी । राष्ट्रे । राजन्यः । इषव्यः । अतिव्याधीत्यति व्याधी । दोग्ध्री । सप्तिः । जिष्णुः । रथेष्ठाः ।

विज्ञाताय्रेतिवि ज्ञाताय्र । मह्यै । सुमृडीकाय्राऽइतिसु मृडीकाय्रै । पावकाय्रै । प्रपथ्याय्रेतिप्र पथ्याय्र । नरन्धिषाय्र । तुरीपाय्र । पुरुरूपाय्रेतिपुरु रूपाय्र । निभूय्रपाय्रेतिनिभूय्र पाय्र । शिपिविष्टाय्रेतिशिपि विष्टाय्र ॥१९॥

[3]ब्रह्मवर्चसीतिब्रह्म [4]वर्चसी । जाय्रताम् । अतिव्याधीत्यति व्याधी ।

---

१. 'मृडीकायै' इति काशिकः पाठः ।

२. 'वर्चसी' इति काशिकः पाठः ।

३. इतः पूर्वस्या मन्त्रकण्डिकायाः पूर्वं गतत्वान्नेह तत्पदानि पठ्यन्ते । अत इत आरभ्य द्वयोः कण्डिकासंख्ययोर्भेदो द्रष्टव्यः ।

४. ककोशशैल्यनुसारं 'ब्रह्मवर्चसीतिब्रह्म वर्चसी' इति शुद्धः पाठो ज्ञेयः ।

र॒थः । जा॒य॒ता॒म् । दोग्ध्री॑ । धे॒नुः । वोढा॑ । अ॒न॒ड्वान् । आ॒शुः । सप्तिः॑ । पुर॑न्धि॒रिति॒पुर॑म् धिः॑ । योषा॑ । जि॒ष्णुः । र॒थे॒ष्ठाः । र॒थे॒स्था॒ऽइति॑र॒थे स्थाः । स॒भेयः॑ । युवा॑ । आ । अ॒स्य । यज॑मानस्य । वी॒रः । जा॒य॒ता॒म् । नि॒का॒मेनि॑का॒म॒ऽइति॑नि॒का॒मे नि॑का॒मे । नः॒ । प॒र्ज॒न्यः॑ । व॒र्ष॒तु॒ । फल॑वत्य॒ऽइति॒फल॑ व॒त्यः॒ । नः॒ । ओष॑धयः॒ । प॒च्य॒न्ता॒म् । यो॒ग॒क्षे॒म॒ऽइति॑योग क्षेमः । नः॒ । क॒ल्प॒ता॒म् ॥२०॥

चक्षु॑षे । श्रोत्रा॑य । वा॒चे । मन॑से ॥२१॥

प्राच्यै॑ । दि॒शे । अ॒र्वाच्यै॑ । दक्षि॑णायै । प्र॒तीच्यै॑ । उदी॑च्यै । उ॒र्ध्वायै॑ । अवा॑च्यै । अ॒र्वाच्यै॑ ॥२२॥

अ॒द्भ्यऽइत्य॒त् भ्यः । वा॒र्भ्यऽइति॒वाः भ्यः । उ॒द॒-का॑य । तिष्ठ॑न्तीभ्यः । स्रव॑न्तीभ्यः । स्यन्द॑मानाभ्यः ।

र॒थे॒स्था॒ऽइति॑र॒थे स्थाः । प॒र्जन्यः॑ । फल॑वत्य॒ऽइति॒फल॑ व॒त्यः॒ । प॒च्य॒न्ता॒म् । यो॒ग॒क्षे॒म॒ऽइति॑योग क्षेमः । क॒ल्प॒ता॒म् ॥२०॥

चक्षु॑षे । श्रोत्रा॑य ॥२१॥

प्राच्यै॑ । अ॒र्वाच्यै॑ । दक्षि॑णायै । प्र॒तीच्यै॑ । उदी॑च्यै । अवा॑च्यै । अ॒र्वाच्यै॑ ॥२२॥

अ॒द्भ्यऽइत्य॒त् भ्यः । तिष्ठ॑न्तीभ्यः । स्रव॑न्तीभ्यः । स्यन्द॑मानाभ्यः ।

जा॒य॒ता॒म् । य्योषा॑ । स॒भेय्यः॑ । य्युवा॑ । य्यज॑मानस्य । जा॒य॒ता॒म् । फल॑वत्य॒ऽइति॒फल॑ वत्यः । ओष॑धय्यः । य्यो॒ग॒क्षे॒म॒ऽइति॑य्योग क्षेमः ॥२०॥

श्रोत्रा॑य ॥२१॥

दक्षि॑णाय्यै । ऊ॒र्ध्वाय्यै॑ ॥२२॥

वा॒र्भ्यऽइति॒वाः भ्यः । उ॒द॒काय्य॑ । धार्य्या॑भ्यः । अ॒र्ण॒वाय्य॑ ।

कूप्प्याभ्यः॑ । सूद्र्याभ्यः॑ । धार्व्याभ्यः॑ ॥ अर्णवाय॑ । समुद्राय॑ । सरिराय॑ ॥२३॥

वाताय॑ । धूमाय॑ । अभ्राय॑ । मेघाय॑ । विद्योत॑मानायेति॑वि द्योत॑मानाय । स्तनय॑ते । अवस्फूर्ज॑तऽइत्य॑व स्फूर्ज॑ते । वर्ष॑ते । अववर्ष॑तऽइत्य॑व वर्ष॑ते । उग्रम् । शीघ्रम् । उद्गृह्णतऽइत्युत् [1]गृह्णते । उद्गृ॑हीतायेत्युत् गृ॑हीताय । प्रुष्णते । शीकायते । प्रुष्व्याभ्यः॑ । ह्रादुनीभ्यः॑ । नीहाराय॑ ॥२४॥

इन्द्राय॑ । पृथिव्यै । अन्तरिक्षाय । दिवे । दिग्भ्य इति॑दिक् भ्यः । आशाभ्यः॑ । उर्व्यै । दिशे । अर्वाच्यै ॥२५॥

नक्षत्रेभ्यः॑ । नक्षत्रियेभ्यः॑ । अहोरात्रेभ्य॑ः । अर्द्धमासेभ्यऽइत्यर्द्ध मासेभ्य॑ः । मासेभ्यः॑ । ऋतुभ्य-

---

कूप्प्याभ्यः॑ । सूद्र्याभ्यः॑ । धार्व्याभ्यः॑ । समुद्राय॑ ॥२३॥

अभ्राय॑ । विद्योत॑मानायेति॑वि द्योत॑मानाय । अवस्फूर्ज॑तऽइत्य॑व स्फूर्ज॑ते । अववर्ष॑तऽइत्य॑व वर्ष॑ते । उग्रम् । शीघ्रम् । उद्गृह्णतऽइत्युत् गृह्णते । उद्गृ॑हीतायेत्युत् गृ॑हीताय । प्रुष्णते । प्रुष्व्याभ्यः॑ । ह्रादुनीभ्यः॑ ॥२४॥

पृथिव्यै । अन्तरिक्षाय । आशाभ्यः॑ । अर्वाच्यै ॥२५॥

नक्षत्रेभ्यः॑ । नक्षत्रियेभ्यः॑ । अहोरात्रेभ्य॑ः । अर्द्धमासेभ्यऽइत्यर्द्ध

समुद्राय॑ । सरिराय॑ ॥२३॥

वाताय॑ । धूमाय॑ । अभ्राय॑ । मेघाय॑ । विद्योत॑मानायेति॑वि द्योत॑मानाय । स्तनय॑ते । अववर्ष॑तऽइत्य॑व [2]वर्ष॑ते । उद्गृ॑हीतायेत्युत् गृ॑हीताय । शीकायते । नीहाराय॑ ॥२४॥ इन्द्राय॑ । अन्तरिक्षाय ॥२५॥

नक्षत्रियेभ्यः॑ । ऋतुभ्यऽइत्यृतु भ्य॑ः । [3]सम्वत्सराय॑ । चन्द्राय॑ ।

---

१. 'गृह्णते' इति काशिकः पाठः ।

२. ककोशशैल्यनुसारम् 'वर्षते' इति युक्तः पाठः ।

३. अपपाठोऽयम् 'सँव्वत्सराय' इत्येवं शुद्धः पाठो ज्ञेयः ।

ऽइत्त्यृतु भ्यः । आर्त्तवेब्भ्यः । सँव्वत्सराय । द्यावापृथिवीब्भ्याम् । चन्द्राय । सूर्य्याय । रश्मिब्भ्यऽइतिरश्मिभ्यः । व्वसुब्भ्यऽइतिवसु भ्यः । रुद्रेब्भ्यः । आदित्त्येब्भ्यः । मरुद्भ्यऽइतिमरुत् भ्यः । व्विश्वेब्भ्यः । देवेब्भ्यः । मूलेब्भ्यः । शाखाब्भ्यः । व्वनस्प्पतिब्भ्यऽइतिवनस्पति भ्यः । पुष्प्पेब्भ्यः । फलेब्भ्यः । ओषधीब्भ्यः । परिप्प्लवेब्भ्यऽइतिपरि प्लवेब्भ्यः । चराचरेब्भ्यः । सरीसृपेब्भ्यः ॥२६॥

असवे । व्वसवे । व्विभुवऽइतिवि भुवे । व्विवस्वते । गणश्रियऽइतिगण श्रिये । गणपतयऽइतिगण पतये । अभिभुवऽइत्त्यभि भुवे । अधिपतयऽइत्त्यधि पतये । शूषाय । सꣳसर्प्पायेतिसम् सर्प्पाय । चन्द्राय । ज्योतिषे । मलिम्म्लु-

---

मासेभ्यः । मासेभ्यः । ऋतुभ्यऽइत्यृतु भ्यः । आर्त्तवेभ्यः । सँव्वत्सराय । द्यावापृथिवीभ्याम् । रश्मिभ्यऽइतिरश्मि भ्यः । व्वसुभ्यऽइतिवसु भ्यः । रुद्रेभ्यः । आदित्येभ्यः । मरुद्भ्यऽइतिमरुत् भ्यः । व्विश्वेभ्यः । देवेभ्यः । मूलेभ्यः । शाखाभ्यः । व्वनस्पतिभ्यऽइतिवनस्पति भ्यः । पुष्पेभ्यः । फलेभ्यः । ओषधीभ्यः । परिप्लवेभ्यऽइतिपरि प्लवेभ्यः । चराचरेभ्यः । सरीसृपेभ्यः ॥२६॥

गणश्रियऽइतिगण श्रिये । अभिभुवऽइत्यभि भुवे । अधिपतयऽइत्यधि पतये । मलिम्लुचाय । व्यश्नुविनऽइतिवि अश्नुविने ॥२७॥

सूर्य्याय । व्वसुभ्यऽइतिव्वसु भ्यः । व्वनस्पतिभ्यऽइतिव्वनस्पति भ्यः ॥२६॥

[1]व्विभुवऽइतिव्वि भुवे । गणश्रियऽइतिगण श्रिये । गणपतयऽइतिगण पतये । अधिपतयऽइत्यधि पतये । शूषाय । सꣳसर्प्पायेतिसम् सर्प्पाय ।

---

१. इतः पूर्वस्या मन्त्रकण्डिकायास्त्रीण्यपुनरुक्तानि पदानि पदपाठे पूर्वकण्डिकान्त एव पठितानीत्यत इत आरभ्य तिसृणां कण्डिकासंख्यानां भेदो जायते ।

चायं । दिवा । पतयंते ।। इषायं । ऊर्ज्जायं ।। स्वरिति स्वः । स्वाहा ।। मूर्द्ध्नें । इयश्नुविनऽइतिवि [1]अश्नुविनें ।।२७।।

प्राणः । अपानऽइत्त्यंप आनः । इयानऽइतिवि आनः । उदानऽइत्त्युत् आनः । समानऽइतिसम् आनः ।।२८।।

एकंस्म्मै । द्वाभ्यांम् । शतांय । एकशतायेत्त्येकं शताय । इयुंष्ट्याऽइतिवि उंष्ट्यै । स्वर्ग्गायेतिंस्वः गायं ।।२९।।

।। इति वाजसनेयिसंहितापदे द्वाविंशोऽध्यायः ।।

अपानऽइत्यंप आनः । उदानऽइत्युत् आनः ।।२८।।

एकंस्मै । द्वाभ्यांम् । एकंशतायेत्येकं शताय । व्युंष्ट्याऽइतिवि उंष्ट्यै ।।२९

चन्द्राय । मलिम्लुचाय । पतयंते । इषाय । ऊर्ज्जाय । व्यश्नुविनऽइतिंवि अश्नुविनें ।।२७।।

[2]व्यानऽइतिंवि आनः ।।२८।।

शताय । एकंशतायेत्येकं शताय । व्युंष्ट्याऽइतिवि उंष्ट्यै । स्वर्गायेतिंस्वः गाय ।।२९।।

।। इति श्रीवाजसनेयिसंहितापदेन द्वाविंशतिमो[3]ऽध्यायः ।।

---

१. 'अश्नुविनें' इति काशिकः पाठः ।

२. इतः पूर्वयोर्द्वयोर्मन्त्रकण्डिकयोः षडपुनरुक्तानि पदानि पदपाठे २७ कण्डिकान्त एव पठितानि । अत इत आरभ्य पञ्चानां कण्डिकासंख्यानां भेदो जायते ।

३. द्रष्टव्याऽत्र ३९६ पृष्ठस्था टिप्पणी २ ।

त्रयोविंशोऽध्यायः

प्रजापतयऽइतिप्रजा पतये । त्वा । जुष्टम् । गृह्णामि । सूर्य्यः । ते । महिमा ॥ यः । ते । अहन् । सँव्वत्सरे । महिमा । सम्बभूवेतिसम् बभूव । वायौ । अन्तरिक्षे । दिवि । सूर्य्ये । तस्मै । ते । महिम्ने । प्रजापतयऽइतिप्रजा पतये । स्वाहा । देवेभ्यः ॥१॥

यः । प्राणतः । निमिषतऽइतिनि [1]मिषतः । महित्वेति-महि त्वा । एकः । इत् । राजा । जगतः । बभूव ॥ यः । ईशे । अस्य । द्विपदऽइतिद्वि पदः । चतुष्पदः । चतुःपदऽइतिचतुः पदः । चन्द्रमाः । रात्रौ । पृथिव्याम् । अग्नौ । नक्षत्रेषु । चन्द्रमसि । देवेभ्यः । स्वाहा ॥२॥

प्रजापतयऽइतिप्रजा पतये । जुष्टम् । गृह्णामि । सँव्वत्सरे । अन्तरिक्षे । तस्मै । महिम्ने । प्रजापतयऽइतिप्रजा पतये । देवेभ्यः ॥१॥

महित्वेतिमहि त्वा । द्विपदऽइतिद्वि पदः । चतुष्पदः । रात्रौ । पृथिव्याम् । अग्नौ । नक्षत्रेषु । देवेभ्यः ॥२॥

[2]प्रजापतयऽइतिप्रजा पतये । सूर्य्यः । यः । वायौ । सूर्य्ये । प्रजापतयऽइतिप्रजा पतये ॥१॥

यः । यः ॥२॥

---

१. 'मिषतः' इति काशिकः पाठः ।

२. इतः पूर्वस्या मन्त्रकण्डिकायाः पूर्वं गतत्वान्नेह तत्पदानि पठचन्ते । अतोऽत्रैकस्याः कण्डिकासंख्याया भेदः समजनि ।

युञ्जन्ति । ब्रध्नम् । अरुषम् । चरन्तम् । परि । तस्थुषः ॥ रोचन्ते । रोचना । दिवि ॥३॥

युञ्जन्ति । अस्य । काम्म्या । हरीऽइतिहरी । विपक्क्षसेतिवि पक्क्षसा । रथे ॥ शोणा । धृष्णूऽइतिधृष्णू । नृबाहसेतिनृ बाहसा ॥४॥

यत् । वातः । अपः । अगनीगन् । प्रियाम् । इन्द्रस्य । तन्न्वम् ॥ एतम् । स्तोतः । अनेन । पथा । पुनः । अश्श्वम् । आ । वर्त्तयासि । नः ॥५॥

वसवः । त्वा । अञ्जन्तु ॥ लाजी३न् । शाची३न् । यश्ये । गश्ये । एतत् । अन्नम् । अत्त । देवाः । एतत् । अन्नम् । अद्धि । प्रजापतऽइतिप्रजा पते ॥६॥

ब्रध्नम् । तस्थुषः ॥३॥
काम्या । विपक्षसेतिवि पक्षसा । धृष्णूऽइतिधृष्णू ॥४॥
तन्वम् । अश्वम् ॥५॥
यव्ये । गव्ये । प्रजापतऽइतिप्रजा पते ॥६॥

[1]युञ्जन्ति ॥३॥
युञ्जन्ति । विपक्षसेतिवि[2] पक्षसा । नृवाहसेतिनृ वाहसा ॥४॥
यत् । प्रियाम् । वर्त्तयासि ॥५॥
[3]लाजीन् । [3]शाचीन् । यव्यै । [3]प्रजापतयऽइतिप्रजा पते ॥६॥

१. इतः पूर्वस्या मन्त्रकण्डिकायाः कानिचिद् अपुनरुक्तानि पदानि पूर्वकण्डिकान्त एव पठितानि, अत इत आरभ्य द्वयोः कण्डिकासंख्ययोर्भेदो द्रष्टव्यः ।

२. अपपाठोऽयम्, 'वि' इत्येवं कपाठशैल्यनुसारमपेक्षते ।

३. अपपाठा एते लेखकप्रमादजाः, अत्र 'लाजी३न्, शाची३न्, प्रजापतऽइतिप्रजा पते' इत्येवं शुद्धाः पाठा द्रष्टव्याः ।

कः । स्वित् । एकाकी । चरति । कः । ऊँऽइत्त्यूँ । स्वित् । जायते । पुनरितिपुनः ॥ किम् । स्वित् । हिमस्य । भेषजम् । किम् । ऊँऽइत्त्यूँ । आवर्पनमित्त्या व्वर्पनम् । महत् ॥७॥

सूर्य्यः । एकाकी । चरति । चन्द्रमाः । जायते । पुनरितिपुनः ॥ अग्निः । हिमस्य । भेषजम् । भूमिः । आवर्पनमित्त्या व्वर्पनम् । महत् ॥८॥

का । स्वित् । आसीत् । पूर्वचित्तिरितिपूर्व्व चित्तिः । किम् । स्वित् । आसीत् । बृहत् । वयः ॥ का । स्वित् । आसीत् । पिलिप्पिला । का । स्वित् । आसीत् । पिशङ्गिला ॥९॥

द्यौः । आसीत् । पूर्वचित्तिरितिपूर्व्व चित्तिः । अश्श्वः । आसीत् । बृहत् । वयः ॥ अविः । आसीत् । पिलिप्पिला । रात्रिः । आसीत् । पिशङ्गिला ॥१०॥

ऊँऽइत्यूँ । ऊँऽइत्यूँ । आवर्पनमित्या व्वर्पनम् ॥७॥
अग्निः । आवर्पनमित्या व्वर्पनम् ॥८॥
अश्वः । रात्रिः ॥१०॥

जाग्रते । आवर्पनमित्या [१]व्वर्पनम् ॥७॥
सूरयः । जाग्रते । आवर्पनमित्या [१]व्वर्पनम् ॥८॥
व्वयः ॥९॥
व्वयः ॥१०॥

---

१. ककोशशैल्यनुसारं 'वर्पनम्' इत्येकवकारवानेव पाठः साधुः ।

वायुः । त्वा । पचतैः । अवतु । असितग्रीवऽइत्त्यसित ग्रीवः । छागैः । न्यग्ग्रोधः । चमसैः । शल्म्मलिः । वृद्ध्या ॥ एषः । स्यः । राथ्यः । वृषा । पङ्क्तिरितिपट् भिः । चतुर्भिरितिचतुः भिः । आ । इत् । अगन् । ब्रह्मा । अकृष्णः । च । नः । अवतु । नमः । अग्नये ॥११

सꣳशितऽइतिसम् शितः । रश्मिना । रथः । सꣳशितऽइतिसम् शितः । रश्मिना । हयः ॥ सꣳशित-ऽइतिसम् शितः । अप्स्वित्त्यप् सु । अप्सुजाऽइत्त्यप्सु जाः । ब्रह्मा । सोमपुरोगवऽइतिसोम पुरोगवः ॥१२॥

स्वयम् । वाजिन् । तन्वम् । कल्पयस्व । यजस्व । जुषस्व ॥ महिमा । ते । अन्येन । न । सन्नशेऽइतिसम् नशे १३

न । वै । ऊँऽइत्यूँ । एतत् । म्रियसे । न । रिष्यसि । देवान् । इत् । एषि । पथिभिरितिपथि भिः । सुगेभिरितिसु

असितग्रीवऽइत्यसित ग्रीवः । न्यग्रोधः । शल्मलिः । राथ्यः । पङ्क्तिरितिपट् भिः । ब्रह्मा । अकृष्णः । अग्नये ॥११॥

रश्मिना । रश्मिना । अप्स्वित्यप् सु । अप्सुजाऽइत्यप्सु जाः । ब्रह्मा ॥१२॥

तन्वम् । कल्पयस्व । अन्येन ॥१३॥

ऊँऽइत्यूँ । रिष्यसि । यत्र । यत्र । तत्र ॥१४॥

वायुः । अग्नये ॥११॥ हयः ॥१२॥

कल्पयस्व । यजस्व ॥१३॥

वै[1] । म्रियसे । यत्र । यत्र । ययुः ॥१४॥

१. ककोशे संहितावद् 'वै' इत्यस्य वकारो न गुरुर्भवति ।

गोभिः ॥ यत्र । आसते । सुकृत इतिसु कृतः । यत्र । ते । ययुः । तत्र । त्वा । देवः । सविता । दधातु ॥१४॥

अग्निः । पशुः । आसीत् । तेन । अयजन्त । सः । एतम् । लोकम् । अजयत् । यस्मिन् । अग्निः । सः । ते । लोकः । भविष्यति । तम् । जेष्यसि । पिब । एताः । अपः ॥ वायुः । सूर्यः ॥१५॥

अम्बे । अम्बिके । अम्बालिके । न । मा । नयति । कः । चन ॥ ससस्ति । अश्वकः । सुभद्रिकामितिसु भद्रिकाम् । काम्पीलवासिनीमितिकाम्पील वासिनीम् ॥१६॥

गणानाम् । त्वा । गणपतिमितिगण पतिम् । हवामहे । प्रियाणाम् । प्रियपतिमितिप्रिय पतिम् । निधीनामितिनि धीनाम् । निधिपतिमितिनिधि पतिम् । वसोऽइतिवसो । मम ॥ आ । अहम् । अजानि । गर्भधमितिगर्भ धम् । आ । त्वम् । अजासि । गर्भधमितिगर्भ धम् ॥१७॥

अग्निः । यस्मिन् । अग्निः । भविष्यति । जेष्यसि ॥१५॥

अश्वकः । सुभद्रिकामितिसु भद्रिकाम् ॥१६॥

प्रियपतिमितिप्रिय पतिम् ॥१७॥

अयजन्त । अजयत् । यस्मिन् । वायुः । सूर्यः ॥१५॥

नयति । काम्पीलवासिनीमितिकाम्पील वासिनीम् ॥१६॥

प्रियाणाम् । प्रियपतिमितिप्रिय पतिम् । वसोऽइतिवसो ॥१७॥

तौ । उभौ । चतुर॑ः । पद॑ः । सम्प्रसा॑रयावेति॑सम् प्रसा॑रयाव । स्वर्ग॑ऽइति॑स्वः॑ गे । लो॒के । प्र । ऊ॒र्णु॒वा॒था॒म् । वृषा॑ । वा॒जी । रे॒तो॒धाऽइति॑रेतः॑ धाः॑ । रेत॑ः । द॒धा॒तु ॥१८

उत्सं॑क्क्थ्याऽइत्युत् सं॑क्क्थ्याः॑ । अव॑ । गु॒दम् । धे॒हि॒ । सम् । अ॒ञ्जिम् । चा॒र॒य॒ । वृ॒ष॒न् ॥ यः॑ । स्त्री॒णाम् । जी॒व॒भो॒ज॑न॒ऽइति॑जीव॒ भोज॑नः॑ ॥१९॥

य॒का । अ॒स॒कौ । श॒कु॒न्ति॒का । आ॒ह॒ल॑क् । इति॑ । वञ्च॑ति ॥ आ । ह॒न्ति॒ । ग॒भे । पस॑ः । नि । ग॒ल्ग॒ली॒ति॒ । धार॑का ॥२०॥

य॒क॑ः । अ॒स॒कौ । श॒कु॒न्त॒कः॑ ॥ वि॒व॑क्षत॒ऽइ॒वेति॒विव॑क्षतः॑ इव । ते । मुख॑म् । अद्ध्व॑र्य्यो॒ऽइत्य॑द्ध्व॑र्य्यो । मा । नः॑ । त्वम् । अ॒भि । भा॒ष॒थाः॑ ॥२१॥

उत्सं॑क्थ्याऽइत्युत् सं॑क्थ्या ॥१९॥
ग॒ल्गली॒ति॒ ॥२०॥
अध्व॑र्य्यो॒ऽइत्यध्व॑र्य्यो ॥२१॥

सम्प्रसा॑रय्यावेति॑सम् प्रसा॑रय्याव । [1]वृषा॑ ॥१८॥
[2]उथ्सं॑क्थ्याऽइत्युत् सं॑क्थ्याः॑ । [3]आ॒जिम् । चा॒र॒य्यं॒ । [4]वृ॒ष॒न् । य्यः॑ ॥१९
य्य॒का ॥२०॥
य्य॒कः॑ । अध्व॑र्य्यो॒ऽइत्यध्व॑र्य्यो ॥२१॥

---

१. ककोशशैल्यनुसारम् ऋकारपरो वकारो न गुरुर्भवति तेन, 'वृषा॑' इत्येव साधुः ।

२. पूर्वत्र ४५ पृष्ठस्था द्वितीया टिप्पणी द्रष्टव्या ।

३. अपपाठोऽयं लेखकप्रमादजः ।

४. ककोशशैल्यनुसारम् ऋकारपरो वकारो न गुरुर्भवत्यतः 'वृ॒ष॒न्' इत्येव साधुः ।

माता । च । ते । पिता । च । ते । अग्ग्रम् । वृक्क्षस्य । रोहतः ॥ प्र । तिलामि । इति । ते । पिता । गभे । मुष्टिम् । अतꣳसयत् ॥२२॥

अग्ग्रे । वृक्क्षस्य । क्रीडतः ॥ ब्रह्मन् । मा । त्वम् । वदः । बहु ॥२३॥

ऊर्द्ध्वाम् । एनाम् । उत् । श्रापय । गिरौ । भारम् । हरन्निवेतिहरन्न् इव ॥ अथ । अस्यै । मद्ध्यम् । एधताम् । शीते । वाते । पुनन्निवेतिपुनन्न् इव ॥२४॥

ऊर्द्ध्वम् । एनम् । उत् । श्रयतात् ॥ अथ । अस्य । मद्ध्यम् । एजतु ॥२५॥

यत् । अस्याः । अꣳहुभेद्द्याऽइत्त्यꣳहु भेद्द्याः । कृधु । स्थूलम् । उपातसदित्त्युप अतसत् ॥ मुष्कौ । इत् । अस्याः । एजतः । गोशफऽइतिगो शफे । शकुलाविवेतिशकुलौ इव ॥२६॥

अग्रम् । वृक्षस्य । मुष्टिम् ॥२२॥

अग्रे । वृक्षस्य । ब्रह्मन् ॥२३॥

मध्यम् ॥२४॥ मध्यम् ॥२५॥

अꣳहुभेद्याऽइत्यꣳहु भेद्याः । उपातसदित्युप अतसत् । मुष्कौ ॥२६॥

अतꣳसयत् ॥२२॥

श्रापय । अथ[1] ॥२४॥ श्रयतात् ॥२५॥

यत् ॥२६॥

---

१. अन्यकोशेषु 'अर्थ' इत्येवं पाठः, उत्तरमन्त्रेऽस्मिन् कोशेऽपि 'अर्थ' इत्येव दृश्यते ।

यत् । देवासः॑ । ललामगुमितिललाम गुम् । प्र । विष्टीमिनम् । आविषुः ॥ सक्क्थ्रा । देदिश्यते । नारी । सत्यस्य॑ । अक्षिभुवऽइत्यंक्षि भुवः॑ । यथा ॥२७॥

यत् । हरिणः । यवम् । अत्ति । न । पुष्टम् । पशु । मन्यते ॥ शूद्रा । यत् । अर्य्यजारेत्यर्य्य जारा । न । पोषाय । धनायति ॥२८॥

बहु । मन्यते ॥ शूद्रः । यत् । अर्य्यायै । जारः । न । पोषम् । अनु । मन्यते ॥२९॥

दधिक्राव्णऽइतिदधि क्राव्णः॑ । अकारिषम् । जिष्णोः । अश्वस्य । वाजिनः॑ ॥ सुरभि । नः । मुखा । करत् । प्र । नः । आयूंषि । तारिषत् ॥३०॥

गायत्री । त्रिष्टुप् । त्रिस्तुबितित्रि स्तुप् । जगती ।

विष्टीमिनम् । सक्थ्ना । देदिश्यते । सत्यस्य॑ । अक्षिभुवऽइत्यंक्षि भुवः॑ ॥२७॥

पुष्टम् । मन्यते । शूद्रा । अर्य्यजारेत्यर्य्य जारा ॥२८॥

मन्यते । शूद्रः । मन्यते ॥२९॥

दधिक्राव्णऽइतिदधि क्राव्णः॑ । जिष्णोः । अश्वस्य ॥३०॥

गायत्री । त्रिष्टुप् । त्रिस्तुबितित्रि स्तुप् । अनुष्टुप् । अनुस्तुबित्यनु

य्यत् । य्यथा ॥२७॥

य्यत् । य्यवम् । य्यत् । अर्य्यजारेत्यर्य्य जारा । पोषाय । धनायति ॥२८

य्यत् । अर्य्यायै ॥२९॥ आयूंषि ॥३०॥

गायत्री । [1]उष्णीहा ॥३१॥

---

१. अपपाठ इव प्रतीयते, पाठान्तरं वैतत् स्यात् ।

अनुष्टुप् । अनुस्तुबित्त्यनु स्तुप् । पङ्क्त्त्या । सह ॥ बृहती । उष्णिणहा । ककुप् । सूचीभिः । शम्म्यन्तु । त्वा ॥३१॥

द्विपदाऽइतिद्वि पदाः । याः । चतुष्पदाः । चतुःपदाऽइतिचतुः पदाः । त्रिपदाऽइतित्रि पदाः । याः । च । षट्ट्पदाऽइतिषट् पदाः ॥ विच्छन्दाऽइतिवि छन्दाः । याः । च । सच्छन्दाऽइतिस छन्दाः ॥३२॥

महानाम्म्न्यऽइतिमहा नाम्म्न्यः । रेवत्त्यः । विश्श्वाः । आशाः । प्रभूवरीरितिप्प्र भूवरीः ॥ मैघीः । विद्द्युतऽइतिवि द्युतः । वाचः ॥३३॥

नार्य्यः । ते । पत्त्न्यः । लोम । वि । चिन्न्वन्तु । मनीषया ॥ देवानाम् । पत्त्न्यः । दिशः ॥३४॥

स्तुप् । पङ्क्त्या । उष्णिहा । शम्यन्तु ॥३१॥

द्विपदाऽइतिद्वि पदाः । चतुष्पदाः । त्रिपदाऽइतित्रि पदाः । षट्पदाऽइतिषट् पदाः । विछन्दाऽइतिवि छन्दाः । सछन्दाऽइतिस छन्दाः ॥३२॥

महानाम्न्यऽइतिमहा नाम्न्यः । रेवत्यः । [1]विश्वाः । प्रभूवरीरितिप्र भूवरीः । विद्युतऽइतिवि द्युतः ॥३३॥

पत्न्यः । चिन्वन्तु । पत्न्यः ॥३४॥

य्याः । [2]याः । विछन्दाऽइतिवि[3] छन्दाः । य्याः ॥३२॥

विद्युतऽइतिवि[4] द्युतः ॥३३॥

नार्य्यः । मनीषया ॥३४॥

---

१. पूर्वत्रास्मिन् पाठे 'विश्वाः' इत्येवं विसर्गस्य चिह्नं प्रयुक्तम् । द्र० पृष्ठ ३२८ ।

२. 'य्याः' इत्येवं पाठः साधुर्ज्ञेयः ।

३. ककोशशैल्यनुसारमिह 'वि' इत्येवं पाठो युक्तः ।

४. ककोशशैल्यनुसारमिह 'वि' इत्येवं शुद्धः पाठो द्रष्टव्यः ।

रजताः । हरिणीः । सीसाः । युजः । युज्यन्ते । कर्म्मभिरितिकर्म्म भिः ॥ अश्वस्य । वाजिनः । त्वचि । सिमाः । शम्म्यन्तु । शम्म्यन्तीः ॥३५॥

कः । त्वा । आ । छ्यति । कः । त्वा । वि । शास्त्ति । कः । ते । गात्त्राणि । शम्म्यति ॥ कः । ऊँऽइत्यूँ । ते । शमिता । कविः ॥३६॥

ऋतवः । ते । ऋतुथेत्त्यृतु था । पर्व्व । शमितारः । वि । शासतु ॥ सँव्वत्सरस्य । तेजसा । शमीभिः । शम्म्यन्तु । त्वा ॥३७॥

अर्द्धमासाऽइत्त्यर्द्ध मासाः । परूंषि । ते । मासाः ।

युज्यन्ते । अश्वस्य । शम्यन्तु । शम्यन्तीः ॥३५॥

शास्ति । गात्राणि । शम्यति । ऊँऽइत्यूँ ॥३६॥

ऋतुथेत्यृतु था । सँव्वत्सरस्य । शम्यन्तु ॥३७॥

अर्द्धमासाऽइत्यर्द्ध मासाः । शम्यन्तः । अहोरात्राणि । विलिष्टमितिवि

[1]युजः । य्युज्यन्ते ॥३५॥

छ्यतु[2] ॥३६॥

ऋतुथेत्यृतु था ॥३७॥

१. ककोशशैल्यनुसारं 'य्युजः' इति शुद्धः पाठो ज्ञेयः ।

२. अपपाठोऽयं प्रतीयते । उत्तरत्रास्मिन्नेव मन्त्रे 'वि । शास्ति' पाठहेतोः । 'दैव्या०' (२९ ककोशे ४२) मन्त्रे उभयत्र 'छ्यन्तु' 'शासतु' समानपुरुषप्रयोगाच्च ।

आ । छ्यन्तु । शम्म्यन्तऽं ॥ अहोरात्राणि । मरुतंः ।
विलिष्टमितिवि लिष्टम् । सूदयन्तु । ते ॥३८॥

दैव्याः । अद्धुर्य्यवः । त्वा । आ । छ्यन्तु । वि ।
च । शासतु ॥ गात्राणि । पर्वशऽइतिपर्व शः । ते । सिमाः ।
कृण्वन्तु । शम्म्यन्तीः ॥३९॥

द्यौः । ते । पृथिवी । अन्तरिक्क्षम् । वायुः ।
छिद्रम् । पृणातु । ते ॥ सूर्य्यः । ते । नक्क्षत्रैः । सह ।
लोकम् । कृणोतु । साधुयेतिसाधु या ॥४०॥

शम् । ते । परेब्भ्यः । गात्रेब्भ्यः । शम् । अस्तु ।
अवरेब्भ्यः ॥ शम् । अस्त्थब्भ्यऽइत्त्यस्त्थ भ्यः । मज्जब्भ्य-
ऽइतिमज्ज भ्यः । शम् । ॐऽइत्त्यूँ । अस्तु । तन्वै ।
तव ॥४१॥

लिष्टम् ॥३८॥

दैव्याः । अध्वर्यवः । गात्राणि । कृण्वन्तु । शम्यन्तीः ॥३९॥

अन्तरिक्षम् । छिद्रम् । नक्षत्रैः ॥४०॥

परेभ्यः । गात्रेभ्यः । अस्तु । अवरेभ्यः । अस्थभ्यऽइत्यस्थ भ्यः ।
मज्जभ्यऽइतिमज्ज भ्यः । ॐऽइत्यूँ । अस्तु । तन्वै ॥४१॥

व्रिलिष्टमितिवि[1] लिष्टम् । सूदयन्तु ॥३८॥

अध्वर्य्यवः ॥३९॥

व्रायुः । सूर्य्यः । साधुयेतिसाधु [2]य्या ॥४०॥

---

१. ककोशशैल्यनुसारं 'व्रि' इत्येवं पाठेन भाव्यम् ।

२. ककोशशैल्यनुसारं 'य्या' इति पाठेन भाव्यम् ।

किम् । स्वित् । सूर्य्यसमामितिसूर्य्य समम् । ज्योतिः । किम् । समुद्रसममितिसमुद्र सम्म् । सरः ॥ किम् । स्वित् । पृथिव्यै । वर्षीयः । कस्य । मात्रा । न । विद्यते ॥४२॥

ब्रह्म । सूर्य्यसमामितिसूर्य्य समम् । ज्योतिः । द्यौः । समुद्रसममितिसमुद्र सम्म् । सरः ॥ इन्द्रः । पृथिव्यै । वर्षीयान् । गोः । तु । मात्रा । न । विद्यते ॥४३॥

पृच्छामि । त्वा । चितये । देवसखेतिदेव सख । यदि । त्वम् । अत्र । मनसा । जगन्थ ॥ येषु । विष्णुः । त्रिषु । पदेषु । एष्टऽइत्त्या इष्टम् । तेषु । विश्वम् । भुवनम् । आ । विवेशा३ ॥४४॥

अपि । तेषु । त्रिषु । पदेषु । अस्मि । येषु । विश्वम् । भुवनम् । आविवेशेत्या विवेश ॥ सद्यः । परि ।

समुद्रसममितिसमुद्र सम्म् । पृथिव्यै । मात्रा । विद्यते ॥४२॥
ब्रह्म । समुद्रसममितिसमुद्र सम्म् । पृथिव्यै । मात्रा । विद्यते ॥४३॥
पृच्छामि । अत्र । विष्णुः । एष्टऽइत्या इष्टम् । विश्वम् ॥४४॥
अस्मि । विश्वम् । आविवेशेत्या विवेश । सद्यः । पृष्ठम् ॥४५॥

---

[1]सूर्य्यसमामितिसूर्य्य समम् । वर्षीयः ॥४२॥
सूर्य्यसमामितिसूर्य्य समम् । वर्षीयान् ॥४३॥
चितये । यदि । येषु । [2]विवेशा ॥४४॥
येषु । आविवेशेत्या विवेश ॥४५॥

---

१. इतः पूर्वयोर्द्वयोः कण्डिकयोः पूर्वं गतत्वान्नेह तत्पदानि पठ्यन्ते । अत इत आरभ्य पञ्चानां कण्डिकासंख्यानां भेदो ज्ञेयः ।

२. अपपाठोऽयम्, 'विवेशा३' इत्येवं शुद्धः पाठो ज्ञेयः । अस्मिन् कोश इत उत्तरमुत्तरमन्त्रस्य 'अपि । तेषु' इति द्वे पदे पठ्यते, उत्तरमन्त्रेऽपि । तदन्ययोरिह पाठस्य प्रयोजनं चिन्त्यम् ।

एमि । पृथिवीम् । उत । द्याम् । एकेन । अङ्गेन । दिवः । अस्य । पृष्ठम् ॥४५॥

केषु । अन्तरिति पुरुषः । आ । विवेश । कानि । अन्तरिति । पुरुषे । अर्पितानि ॥ एतत् । ब्रह्मन् । उप । वल्हामसि । त्वा । किम् । स्वित् । नः । प्रति । वोचासि । अत्र ॥४६॥

पञ्चस्वितिपञ्च सु । अन्तरिति । पुरुषः । आ । विवेश । तानि । अन्तरिति । पुरुषे । अर्पितानि ॥ एतत् । त्वा । अत्र । प्रतिमन्वानऽइतिप्रति [1]मन्वानः । अस्मि । न । मायया । भवसि । उत्तरऽइत्युत् तरः । मत् ॥४७॥

का । ईम् । अरे । पिशङ्गिला । का । ईम् । कुरुपिशङ्गिलेतिकुरु [2]पिशङ्गिला ॥ कः । ईम् । आस्कन्दमित्या स्कन्दम् । अर्षति । कः । ईम् । पन्थाम् । वि । सर्पति ॥४८॥

अन्तरित्यन्तः । अन्तरित्यन्तः । ब्रह्मन् । वल्हामसि । अत्र ॥४६॥

अन्तरित्यन्तः । अन्तरित्यन्तः । अत्र । प्रतिमन्वानऽइतिप्रति मन्वानः । अस्मि । उत्तरऽइत्युत् तरः ॥४७॥

आस्कन्दमित्या स्कन्दम् ॥४८॥

मायया ॥४७॥ [3]का । ईम् ॥४८॥

१. 'मन्न्वानः' इति काशिकः पाठः ।

२. 'पिशङ्गिला' इति काशिकः पाठः ।

३. इतः पूर्वयोर्द्वयोः काण्डकयोः पूर्वं गतत्वादिह तत्पदानि न पठ्यन्ते । अत इत आरभ्य सप्तानां कण्डिकासंख्यानां भेदो ज्ञेयः ।

अजा । अरे । पिशङ्गिला । श्वावित् । श्वविदितिश्श्व वित् । कुरुपिशङ्गिलेतिकुरु [1]पिशङ्गिला ॥ शश॒ । आस्कन्द॒मित्त्या स्कन्दम् । अर्षति । अहिः । पन्थाम् । वि । सर्प्पति ॥४९॥

कति । अस्य । विष्ठा॒ । विस्त्थाऽइतिवि स्था॒ । कति । अक्क्षराणि । कति । होमासः । कतिधा । समिद्‌ध॒ऽइतिसम् इद्धः ॥ यज्ञस्य । त्वा । विदथा । पृच्छम् । अत्त्रे । कति । होतारः । ऋतुशऽइत्त्यृतु शः । यजन्ति ॥५०॥

षट् । अस्य । विष्ठा॒ । विस्त्थाऽइतिवि स्था॒ । शतम् । अक्क्षराणि । अशीतिः । होमाः । समिधऽइतिसम् इधः । ह । तिस्रः ॥ यज्ञस्य । ते । विदथा । प्र । ब्रवीमि । सप्त । होतारः । ऋतुशऽइत्त्यृतु शः । यजन्ति ॥५१॥

कः । अस्य । वेद । भुवनस्य । नाभिम् । कः । द्यावापृथिवीऽइतिद्यावापृथिवी । अन्तरिक्क्षम् ॥ कः ।

श्वविदितिश्श्व वित् । आस्कन्दमित्या स्कन्दम् ।।४९।।

विष्ठाः । विस्थाऽइतिवि स्थाः । अक्षराणि । समिद्धऽइतिसम् इद्धः । यज्ञस्य । पृछम् । अत्रे । ऋतुशऽइत्यृतु शः ।।५०।।

विष्ठाः । विस्थाऽइतिवि स्थाः । अक्षराणि । यज्ञस्य । सप्त । ऋतुश-ऽइत्यृतु शः ॥५१॥

द्यावापृथिवीऽइतिद्यावापृथिवी । अन्तरिक्षम् । जनित्रम् ॥५२॥

विस्थाऽइतिवि स्थाः । व्यज्ञस्य । ऋतुशऽइत्यृतु शः । य्यजन्ति ।।५०

विस्थाऽइतिवि स्थाः । य्यज्ञस्य । ऋतुशऽइत्यृतु शः । य्यजन्ति ।।५१

---

१. 'पिशङ्गिला' इति काशिकः पाठः ।

सूर्य्यस्य । वे॒द॒ । बृ॒ह॒तः । ज॒नित्र॑म् । कः । वे॒द॒ । च॒न्द्रम॑सम् । य॒तोजाऽइतियत॒ᳪ॑ जाः ॥५२॥

वेद॑ । अ॒हम् । अ॒स्य । भुव॑नस्य । नाभि॑म् । वेद॑ । द्यावा॑पृथि॒वीऽइति॒द्यावा॑पृथि॒वी । अ॒न्तरि॑क्षपम् ॥ वेद॑ । सूर्य्य॑स्य । बृ॒ह॒तः । ज॒नित्र॑म् । अथो॒ऽइत्यथो॑ । वे॒द॒ । च॒न्द्रम॑सम् । य॒तोजाऽइतियत॒ᳪ॑ जाः ॥५३॥

पृ॒च्छामि॑ । त्वा॒ । पर॑म् । अन्त॑म् । पृ॒थि॒व्याः । पृ॒च्छामि॑ । यत्र॑ । भुव॑नस्य । नाभि॑ः ॥ पृ॒च्छामि॑ । त्वा॒ । वृष्ण॑ः । अश्व॑स्य । रेत॑ः । पृ॒च्छामि॑ । वा॒चः । प॒र॒मम् । व्यो॒मेति॒वि ओम ॥५४॥

इ॒यम् । वेदि॑ः । पर॑ः । अन्त॑ः । पृ॒थि॒व्याः । अ॒यम् । य॒ज्ञः । भुव॑नस्य । नाभि॑ः ॥ अ॒यम् । सोम॑ः ।

द्यावा॒पृथि॑वीऽइति॒द्यावा॑पृथि॒वी । अ॒न्तरि॑क्षम् । ज॒नित्र॑म् । अथो॒ऽइत्यथो॑ ॥५३॥

पृ॒छामि॑ । पृ॒थि॒व्याः । पृ॒छामि॑ । यत्र॑ । पृ॒छामि॑ । वृष्ण॑ः । अश्व॑स्य । पृ॒छामि॑ ॥५४॥

पृ॒थि॒व्याः । य॒ज्ञः । वृष्ण॑ः । अश्व॑स्य । ब्र॒ह्मा ॥५५॥

सूर्य्य॑स्य । य्य॒तोजाऽइति॑य्य॒त॒ᳪ॑[1] जाः ॥५२॥

सूर्य्य॑स्य । य्य॒तोजाऽइति॑य्य॒त॒ᳪ॑[1] जाः ॥५३॥

य्यत्र॑ । व्व्यो॒मेति॒व्वि ओम ॥५४॥

इ॒य्यम् । [2]अ॒य्यम् । य्य॒ज्ञः । [2]अ॒य्यम् । [2]अ॒य्यम् । व्व्यो॒मेति॒व्वि[3]

---

१. कपाठशैल्यनुसारमिह 'य्यत॒ᳪ॑' इत्येवं लेखेन भाव्यम् ।

२. सर्वानुदात्तरूपोऽपपाठोऽयम् ।

३. ककोशशैल्यनुसारमिह 'व्वि' इत्येवं लेखेन भाव्यम् ।

वृष्ण्णं÷ । अश्श्वस्य । रेतं÷ । ब्रह्मा । अयम् । व्वाचः । परमम् । इत्योमेतिवि ओम ॥५५॥

सुभूरितिसु भूः । स्वयम्भूरितिस्वयम् भूः । प्रथमः । अन्तः । महति । अर्णवे ॥ दधे । ह । गर्ब्भम् । ऋत्त्वियम् । यतं÷ । जातः । प्रजापतिरितिप्रजा पतिः ॥५६॥

होता । यक्क्षत् । प्रजापतिमितिप्रजा पतिम् । सोमस्य । महिम्म्नः ॥ जुषताम् । पिबतु । सोमम् । होतं÷ । यजं ॥५७॥

॥ इति वाजसनेयिसंहितापदे त्रयोविंशोऽध्यायः ॥

गर्भम् । ऋत्वियम् । प्रजापतिरितिप्रजा पतिः ॥५६॥

यक्षत् । प्रजापतिमितिप्रजा पतिम् । महिम्नः ॥५७॥

ओम् ॥५५॥

स्वयम्भूरितिस्वयम् भूः । ऋत्वियम् । यतं÷ ॥५६॥

यक्षत् । पिबत[1] । यजं[2] ॥५७॥

॥ इति श्रीवाजसनेयिसंहितायां पदेन त्रयोविंशोऽध्यायः ॥

---

१. अपपाठोऽयम् । 'पिबतु' इति शुद्धः पाठो ज्ञेयः ।

२. इत उत्तरस्याः कण्डिकायाः पूर्वं गतत्वान्नेह तत्पदानि पठ्यन्ते । कक्कोशेऽस्याः कण्डिकायाः पदानि पठ्यन्ते, परन्तु तेषां पदच्छेदः स्वराङ्कनं च प्रायेणाशुद्ध उपलभ्यते ।

चतुर्विंशोऽध्यायः

अश्वः । तूपरः । गोमृगऽइतिगो मृगः । ते । प्राजापत्त्याऽइतिप्राजा पत्त्याः । कृष्णग्रीवऽइतिकृष्ण ग्रीवः । आग्नेयः । रराटे । पुरस्तात् । सारस्वती । मेषी । अधस्तात् । हन्वोः । आश्विनौ । अधोरामावित्यधः रामौ । बाह्वोः । सौमापौष्णः । श्यामः । नाभ्याम् । सौर्य्ययामौ । श्वेतः । च । कृष्णः । च । पार्श्वयोः । त्वाष्ट्रौ । लोमशसक्थाविति लोमश सक्थौ । सक्थ्योः । वायव्यः । श्वेतः । पुच्छे । इन्द्राय । स्वपस्यायेतिसु [1]अपस्याय । वैहत् । वैष्णवः । वामनः ॥१॥

रोहितः । धूम्ररोहितऽइतिधूम्र रोहितः । कर्कन्धुरोहितऽइतिकर्कन्धु रोहितः । ते । सौम्याः । बभ्रुः ।

अश्वः । प्राजापत्याऽइतिप्राजा पत्याः । कृष्णग्रीवऽइतिकृष्ण ग्रीवः । आग्नेयः । पुरस्तात् । अधस्तात् । हन्वोः । आश्विनौ । अधोरामावित्यधः रामौ । बाह्वोः । सौमापौष्णः । नाभ्याम् । कृष्णः । पार्श्वयोः । त्वाष्ट्रौ । लोमशसक्थाविति लोमश सक्थौ । सक्थ्योः । वायव्यः । पुच्छे । वैष्णवः ॥१॥

धूम्ररोहितऽइतिधूम्र रोहितः । सौम्याः । बभ्रुः । अरुणबभ्रुरित्यरुण

आग्नेयः । सौर्य्ययामौ । पार्श्वयोः । वायव्यः । इन्द्राय । स्वपस्यायेतिसु अपस्याय ॥१॥

---

१. 'अपस्याय' इति काशिकः पाठः ।

अरुणबभ्रुरित्त्यरुण बभ्रुः । शुक्कबभ्रुरितिशुक्क बभ्रुः । ते । वारुणाः । शितिरन्ध्रऽइतिशिति रन्ध्रः । अन्न्यतः शितिरन्ध्रऽइत्त्यन्न्यतः शितिरन्ध्रः । समन्तशितिरन्ध्रऽइतिसमन्त शितिरन्ध्रः । ते । सावित्त्राः । शितिबाहुरितिशिति बाहुः । अन्न्यतःशितिबाहुरित्त्यन्न्यतः शितिबाहुः । समन्तशितिबाहुरितिसमन्त शितिबाहुः । ते । बार्हस्प्पत्त्याः । पृषती । क्षुद्रपृषतीतिक्क्षुद्र पृषती । स्थूलपृषतीतिस्त्थूल पृषती । ताः । मैत्त्रावरुण्ण्यः ॥२॥

शुद्धवालऽइतिशुद्ध वालः । सर्व्वशुद्धवालऽइतिसर्व्व शुद्धवालः । मणिवालऽइतिमणि वालः । ते । आश्श्विनाः । श्येतः । श्येताक्क्षऽइतिश्श्येत अक्क्षः । अरुणः । ते । रुद्राय । पशुपतयऽइतिपशु पतये । कृण्णाः । यामाः । अवलिप्ताऽइत्त्यव लिप्ताः । रौद्राः । नभोरूपाऽइतिनभः रूपाः । पार्ज्जन्न्याः ॥३॥

पृश्निः । तिरश्श्चीनपृश्निरितितिरश्श्चीन पृश्निः ।

बभ्रुः । शुक्कबभ्रुरितिशुक्क बभ्रुः । अन्यतः शितिरन्ध्रऽइत्यन्यतः शितिरन्ध्रः । सावित्राः । अन्यतःशितिबाहुरित्यन्यतः शितिबाहुः । बार्हस्पत्याः । क्षुद्रपृषतीतिक्षुद्र पृषती । स्थूलपृषतीतिस्थूल पृषती । मैत्रावरुण्यः ॥२

शुद्धवालऽइतिशुद्ध वालः । सर्वशुद्धवालऽइतिसर्व शुद्धवालः । आश्विनाः । श्येताक्षऽइतिश्येत अक्षः । रुद्राय । अवलिप्ताऽइत्यव लिप्ताः । रौद्राः । पार्ज्जन्याः ॥३॥

पृश्निः । तिरश्चीनपृश्निरितितिरश्चीन पृश्निः । ऊर्ध्वपृश्निरित्यूर्ध्व

शुद्धवालऽइतिशुद्ध वालः । मणिवालऽइतिमणि वालः । रुद्राय । पशुपतयऽइतिपशु पतये । श्यामाः ॥३॥

ऊर्द्ध्वपृश्निरित्यूर्द्ध्व पृश्निः । ते । मारुताः । फल्गूः । लोहितोर्णीतिलोहित ऊर्णी । पलक्क्षी । ताः । सारस्वत्यः । प्लीहाकर्ण्णाः । प्लीहकर्ण्णऽइतिप्प्लीह कर्ण्णाः । शुण्ठाकर्ण्णाः । शुण्ठकर्ण्णऽइतिशुण्ठ कर्ण्णाः । अद्ध्यालोहकर्ण्णऽइत्त्यद्ध्यालोह कर्ण्णाः । ते । त्वाष्ट्राः । कृष्णग्ग्रीवऽइतिकृष्ण ग्रीवः । शितिकक्क्षऽइतिशिति कक्क्षाः । अञ्ज्जिसक्क्थऽइत्त्यञ्ज्जि सक्क्थः । ते । ऐन्द्राग्नाः । कृष्णाञ्ज्जिरितिकृष्ण अञ्ज्जिः । अल्प्पाञ्ज्जिरित्त्यल्प्प अञ्ज्जिः । महाञ्ज्जिरितिमहा अञ्ज्जिः । ते । उषस्याः ॥४॥

शिल्प्पाः । वैश्श्वदेव्यऽइतिवैश्श्व देव्यः । रोहिण्ण्यः । त्र्यव्वयऽइतित्रि अव्वयः । वाचे । अविज्ज्ञाताऽइत्त्यवि ज्ञाताः । अदित्त्यै । सरूपाऽइतिस रूपाः । धात्त्रे । वत्त्सतर्य्यः । देवानाम् । पत्त्नीभ्भ्यः ॥५॥

पृश्निः । फल्गूः । पलक्षी । सारस्वत्यः । प्लीहकर्णऽइतिप्लीह कर्णाः । शुण्ठाकर्णाः । शुण्ठकर्णऽइतिशुण्ठ कर्णाः । अध्यालोहकर्णऽइत्यध्यालोह कर्णाः । त्वाष्ट्राः । कृष्णग्रीवऽइतिकृष्ण ग्रीवः । शितिकक्षऽइतिशिति कक्षाः । अञ्जिसक्थऽइत्यञ्जि सक्थः । ऐन्द्राग्नाः । कृष्णाञ्जिरितिकृष्ण अञ्जिः । अल्पाञ्जिरित्यल्प अञ्जिः । महाञ्जिरितिमहा अञ्जिः ॥४॥

शिल्पाः । वैश्वदेव्यऽइतिवैश्व देव्यः । रोहिण्यः । त्र्यव्यऽइतित्रि अव्यः । अविज्ञाताऽइत्यवि ज्ञाताः । अदित्यै । धात्रे । वत्सतर्यः । पत्नीभ्यः ॥५॥

वैश्वदेव्यऽइतिवैश्व देव्यः । त्र्यव्यऽइतित्रि अव्यः । वत्सतर्यः ॥५॥

कृष्णग्ग्रीवाऽइतिकृष्ण्ण ग्ग्रीवाः । आग्नेयाः । शितिभ्रवऽइतिशिति भ्रवः । वसूनाम् । रोहिताः । रुद्राणाम् । श्वेताः । अवरोकिणऽइत्त्यव रोकिणः । आदित्त्यानाम् । नभोरूपाऽइतिनभः रूपाः । पार्ज्जन्याः ॥६॥

उन्नतऽइत्त्युत् नतः । ऋषभः । वामनः । ते । ऐन्द्रावैष्णवाः । उन्नतऽइत्त्युत् नतः । शितिबाहुरितिशिति बाहुः । शितिपृष्ठऽइतिशिति पृष्ठः । ते । ऐन्द्राबार्हस्पत्त्याः । शुकरूपाऽइतिशुक रूपाः । वाजिनाः । कल्माषाः । आग्निमारुताऽइत्त्याग्नि [1]मारुताः । श्यामाः । पौष्णाः ॥७॥

एताः । ऐन्द्राग्नाः । द्विरूपाऽइतिद्वि रूपाः । अग्नीषोमीयाः । वामनाः । अनड्वाहः । आग्नावैष्णवाः । वशाः । मैत्रावरुण्यः । अन्यतऽएन्यऽइत्त्यन्यतः एन्यः । मैत्त्र्यः ॥८॥

कृष्णग्रीवाऽइतिकृष्ण ग्रीवाः । आग्नेयाः । शितिभ्रवऽइतिशिति भ्रवः । रुद्राणाम् । अवरोकिणऽइत्यव रोकिणः । आदित्यानाम् । पार्ज्जन्याः ॥६॥

उन्नतऽइत्युत् नतः । ऐन्द्रावैष्णवाः । उन्नतऽइत्युत् नतः । शितिपृष्ठऽइतिशिति पृष्ठः । ऐन्द्राबार्हस्पत्याः । कल्माषाः । आग्निमारुताऽइत्याग्नि मारुताः । पौष्णाः ॥७॥

ऐन्द्राग्नाः । द्विरूपाऽइतिद्वि रूपाः । अग्नीषोमीयाः । आग्नावैष्णवाः । मैत्रावरुण्यः । अन्यतऽएन्यऽइत्यन्यतः एन्यः । मैत्र्यः ॥८॥

आग्नेय्याः ॥६॥ अग्नीषोमीय्याः ॥८॥

---

१. 'मारुताः' इति काशिकः पाठः ।

बभ्रवं÷ । सौम्म्याः । श्वेताः । वायव्याः ÷ ॥९॥

कृष्णाः । भौमाः । धूम्म्राः । आन्तरिक्क्षाः । बृहन्तं÷ । दिव्याः । शबलाः । वैद्युताः । सिद्ध्माः । तारकाः ॥१०॥

धूम्म्रान् । वसन्ताय । आ । लभते । श्वेतान् । ग्रीष्म्माय । कृष्णान् । वर्षाभ्यं÷ । अरुणान् । शरदे । पृषतः । हेमन्ताय । पिशङ्गान् । शिशिराय ॥११॥

त्र्यवंयऽइतित्रि अवंयः । गायत्र्यै । पञ्चावयऽइतिपञ्च अवयः । त्रिष्टुभे । त्रिस्तुभऽइतित्रि स्तुभे । दित्यवाह्ऽइतिदित्य वाहं÷ । जगत्यै । त्रिवत्साऽइतित्रि वत्साः । अनुष्टुभे । अनुस्तुभऽइत्यनु स्तुभे । तुर्य्यवाह्ऽइतितुर्य्य वाहं÷ । उष्णिहे ॥१२॥

बभ्रवं÷ । सौम्या? । वायव्या÷ ॥९॥

कृष्णा? । धूम्रा? । आन्तरिक्षा? । दिव्या? । वैद्युता? । सिध्मा? ॥१०

धूम्रान् । ग्रीष्माय । कृष्णान् । वर्षाभ्यं÷ ॥११॥

त्र्यवंयऽइतित्रि अवंयः । गायत्र्यै । त्रिष्टुभे । त्रिस्तुभऽइतित्रि स्तुभे । दित्यवाह्ऽइतिदित्य वाहं÷ । जगत्यै । त्रिवत्साऽइतित्रि वत्सा? । अनुष्टुभे । अनुस्तुभऽइत्यनु स्तुभे । उष्णिहे ॥१२॥

वायव्या÷ ॥९॥

वसन्ताय । ग्रीष्माय । हेमन्ताय । शिशिराय ॥११॥

त्र्यवंयऽइतित्रि अवंयः । गायत्र्यै । पञ्चावयऽइतिपञ्च अवयः । दित्यवाह्ऽइतिदित्य वाहं÷ । त्रिवत्साऽइतित्रि वत्सा? । तुर्य्यवाह्ऽइतितुर्य्य वाहं÷ ॥१२॥

पष्ठ्ठवाहुऽइतिपष्ठ्ठ वाहंः । विराजऽइतिवि राजे । उक्षाणंः । बृहत्यै । ऋषभाः । ककुभे । अनड्वाहंः । पङ्क्त्यै । धेनवंः । अतिच्छन्दसऽइत्त्यति छन्दसे ॥१३॥

उपध्वस्ताऽइत्त्युप ध्वस्ताः । सावित्राः । वत्सतर्य्यः । सारस्वत्यः । श्यामाः । पौष्णाः । पृश्नयः । मारुताः । बहुरूपाऽइतिबहु रूपाः । वैश्वदेवाऽइतिवैश्व देवाः । वशाः । द्यावापृथिवीयाः ॥१४॥

उक्ताः । सञ्चराऽइतिसम् चराः । एताः । ऐन्द्राग्नाः । कृष्णाः । वारुणाः । पृश्नयः । मारुताः । कायाः । तूपराः ॥१५॥

अग्नये । अनीकवतऽइत्त्यनीक वते । प्रथमजानितिप्रथम जान् । आ । लभते । मरुद्भ्यऽइतिमरुत् भ्यः । सान्त-

पष्ठवाहुऽइतिपष्ठ वाहंः । उक्षाणंः । बृहत्यै । अतिछन्दसऽइत्यति छन्दसे ॥१३॥

उपध्वस्ताऽइत्युप ध्वस्ताः । सावित्राः । वत्सतर्व्यः । सारस्वत्यः । पौष्णाः । पृश्नयः । वैश्वदेवाऽइतिवैश्व देवाः ॥१४॥

सविता । प्रथमे । अहन् । अग्निः । द्वितीये । वायुः । तृतीये । आदित्यः । चतुर्थे । चन्द्रमाः । पञ्चमे । ऋतुः । षष्ठे । मरुतः । सप्तमे । बृहस्पतिः । अष्टमे ॥ मित्रः । नवमे । वरुणः । दशमे । इन्द्रः । एकादशे । विश्वे । देवाः । द्वादशे ॥६॥

प्रजापतिरितिप्रजा पतिः । सम्राडितिसम् राट् । वैश्वदेवऽइतिवैश्व देवः । प्रवृक्तऽइतिप्र वृक्तः । उद्यतऽइत्युत् यतः । आश्विनः । आनीयमानऽइत्या नीयमाने । पौष्णः । विष्यन्दमाने । मैत्रः । वायव्यः । आग्नेयः ॥५॥

अग्निः । आदित्यः । षष्ठे । सप्तमे । बृहस्पतिः । अष्टमे । मित्रः । विश्वे ॥६॥

सम्भ्रियमाणऽइतिसम् भ्रियमाणः । [1]सम्राडितिसम् राट् । वैश्वदेवऽइतिवैश्व देवः । प्रवृक्तऽइतिप्र वृक्तः । उद्यतऽइत्युत् [2]य्यतः । पयसि । आनीयमानऽइत्या नीयमाने । विस्यन्दमानऽइतिवि स्यन्दमाने । सन्ताय्यमानऽइतिसम् ताय्यमाने । वायव्यः । ह्रियमाणः । आग्नेयः । हूयमानः ॥५॥

द्वितीये । वायुः । तृतीये ॥६॥

---

१. द्रष्टव्याऽत्र ३७ पृष्ठस्था टि० १ ।

२. ककोशशैल्यनुसारमिह 'य्यतः' इत्येवं पाठो युक्तो द्रष्टव्यः ।

उग्रः । च । भीमः । ध्वान्तऽइतिधु[1] आन्तः । धुनिः ॥ सासह्वान् । ससह्वानितिसससह्वान् । अभियुग्वेत्यभि युग्वा । च । विक्षिपऽइतिवि क्षिपः । स्वाहा ॥७॥

अग्निम् । हृदयेन । अशनिम् । हृदयाग्रेणेतिहृदय अग्रेण । पशुपतिमितिपशु पतिम् । कृत्स्नहृदयेनेतिकृत्स्न हृदयेन । भवम् । यक्ना ॥ शर्वम् । मतस्नाभ्याम् । ईशानम् । मन्युना । महादेवमितिमहा देवम् । अन्तःपर्शव्येनेत्यन्तः [2]पर्शव्येन । उग्रम् । देवम् । वनिष्ठुना । वसिष्ठहनुरितिवसिष्ठ हनुः । शिङ्गीनि । कोश्याभ्याम् ॥८

उग्रः । सासह्वान् । ससह्वानितिसससह्वान् । अभियुग्वेत्यभि युग्वा । विक्षिपऽइतिवि क्षिपः ॥७॥

अग्निम् । हृदयाग्रेणेतिहृदय अग्रेण । कृत्स्नहृदयेनेतिकृत्स्न हृदयेन । यक्ना । मतस्नाभ्याम् । मन्युना । अन्तःपर्शव्येनेत्यन्तः पर्शव्येन । उग्रम् । वनिष्ठुना । वसिष्ठहनुरितिवसिष्ठहनुः । कोश्याभ्याम् ॥८॥

अभियुग्वेत्यभि [3]युग्वा । विक्षिपऽइतिवि[4] क्षिपः ॥७॥

हृदयेन । हृदयाग्रेणेतिहृदय अग्रेण । कृत्स्नहृदयेनेतिकृत्स्न हृदयेन । यक्ना । वसिष्ठहनुरितिवसिष्ठ हनुः ॥८॥

---

१. बम्बईमुद्रिते 'ध्वू आन्तः' इत्येवं पठ्यते । उव्वटमहीधरस्वामिदयानन्दा न पदपाठानुसारं पदमिमं व्याचख्युः । मन्त्रोऽयं काण्वसंहितायां (३९।७।१) मैत्रा० संहितायां (४।१।१७) चोपलभ्यते । उभयत्र 'ध्वान्तः' पदमाद्युदात्तमुपलभ्यते । तै० आरण्यके (४।२४, ५) अप्यस्य मन्त्रस्य कश्चित् पाठ उपलभ्यते, तत्र 'ध्वान्तः' पदमन्तोदात्तं पठ्यते । अन्धकारवाची ध्वान्तपदं सर्वत्रैव प्रत्ययस्वरेणान्तोदात्त एव ।

२. 'पर्शव्येन' इति काशिकः पाठः ।

३. ककोशशैल्यनुसारमिह 'युग्वा' इत्येवं पाठेन भाव्यम् ।

४. ककोशशैल्यनुसारमिह 'वि' इत्येवं पाठेन भाव्यम् ।

उग्रम् । लोहितेन । मित्रम् । सौव्रत्येन । रुद्रम् । दौर्व्रत्येनेतिदौः व्रत्येन । इन्द्रम् । प्रक्रीडेनेतिप्र क्रीडेन । मरुतः । बलेन । साद्ध्यान् । प्रमुदेतिप्र मुदा ॥ भवस्य । कण्ठ्यम् । रुद्रस्य । अन्तःपार्श्व्यमित्यन्तः पार्श्व्यम् । महादेवस्येतिमहा देवस्य । यकृत् । शर्वस्य । वनिष्टुः । पशुपतेरितिपशु पतेः । पुरीतत् । पुरितदितिपुरि तत् ॥९॥

लोमभ्यइतिलोम भ्यः । त्वचे । लोहिताय । मेदोभ्यइतिमेदः भ्यः ॥ मांसेभ्यः । स्नावभ्यइतिस्नाव भ्यः । अस्थभ्यइत्यस्थ भ्यः । मज्जभ्यइतिमज्ज भ्यः ॥ रेतसे । पायवे ॥१०॥

आयासायेत्या यासाय । प्रायासाय । प्रयासायेतिप्र यासाय । संयासायेतिसम् यासाय । वियासायेतिवि यासाय ।

उग्रम् । मित्रम् । सौव्रत्येन । रुद्रम् । दौर्व्रत्येनेतिदौः व्रत्येन । प्रक्रीडेनेतिप्र क्रीडेन । साध्यान् । प्रमुदेतिप्र मुदा । रुद्रस्य । अन्तःपार्श्व्यमित्यन्तः पार्श्व्यम् । वनिष्ठुः ॥९॥

लोमभ्यइतिलोम भ्यः । मेदोभ्यइतिमेदः भ्यः । मांसेभ्यः । स्नावभ्यइतिस्नाव भ्यः । अस्थभ्यइत्यस्थ भ्यः । मज्जभ्यइतिमज्ज भ्यः ॥१०॥

आयासायेत्या यासाय । प्रयासायेतिप्र यासाय । उद्यासायेत्युत्

दौर्व्रत्येनेतिदौः व्रत्येन । यकृत् ॥९॥

लोहिताय । पायवे ॥१०॥

आयासायेत्या [१]यासाय । प्रायासाय । प्रयासायेतिप्र [१]यासाय । संयासायेतिसम् [१]यासाय । वियासायेतिवि [१]यासाय । उद्यासायेत्युत्

---

१. ककोशशैल्यनुसारमिह 'यासाय' इत्येवं शुद्धः पाठो ज्ञेयः ।

उद्ग्रासायेत्युत् ग्रासाय ॥ शुचे । शोचते । शोचमानाय । शोकाय ॥११॥

तपसे । तप्प्यते । तप्प्यमानाय । तप्प्ताय । घर्म्माय ॥ निष्क्कृत्यै । निश्क्कृत्याऽइतिनिः क्कृत्यै । प्रायश्श्चित्त्यै । भेषजाय ॥१२॥

यमाय । अन्तकाय । मृत्त्यवे ॥ ब्रह्मणे । ब्रह्महत्त्यायाऽइतिब्रह्म हत्त्यायै । विश्श्वेब्भ्यः । देवेब्भ्यः । द्यावापृथिवीब्भ्याम् ॥१३॥

॥ इति वाजसनेयिसंहितापदे एकोनचत्वारिंशत्तमोऽध्यायः ॥

ग्रासाय ॥११॥

तप्यते । तप्यमानाय । तप्ताय । निष्कृत्यै । निश्कृत्याऽइतिनिः कृत्यै । प्रायश्चित्यै ॥१२॥

मृत्यवे । ब्रह्मणे । ब्रह्महत्यायाऽइतिब्रह्म हत्यायै । विश्वेभ्यः । देवेभ्यः । द्यावापृथिवीभ्याम् ॥१३॥

॥ इति वाजसनेयसंहितापदे नवत्रिंशो[1]ऽध्यायः ॥

---

[2]ग्यासाय्यं । शोचमानाय्य । शोकाय्य ॥११॥

तप्यमानाय्य । तप्ताय्यं । घर्म्माय्यं । प्राय्यश्चित्यै । भेषजाय्यं ॥१२॥

य्यमाय्यं । अन्तकाय्य । ब्रह्महत्याय्याऽइतिब्रह्म हत्याय्यै ॥१३॥

इति श्रीवाजसनेयिसंहितायां शाकल्यकृते पदेन
[3]एकोन्नचत्वारिंशोऽध्यायः ॥

---

१. द्र० कपाठे 'नवविंशतिमोऽध्यायः' (पृष्ठ ५२७)।

२. ककोशशैल्यनुसारमिह 'ग्रासाय्यं' इत्येवं शुद्धः पाठो ज्ञेयः।

३. अपपाठोऽयम् 'एकोन' इत्येवं शुद्धः पाठः स्यात् 'एकान्न' इत्येवं वा।

चत्वारिंशोऽध्यायः

ईशा । वास्यम् । इदम् । सर्वम् । यत् । किम् । च । जगत्त्याम् । जगत् ॥ तेन । त्यक्क्तेन । भुञ्जीथाः । मा । गृधः । कस्य । स्वित् । धनम् ॥१॥

कुर्वन् । एव । इह । कर्म्माणि । जिजीविषेत् । शतम् । समाः ॥ एवम् । त्वयि । न । अन्यथा । इतः । अस्ति । न । कर्म्म । लिप्प्यते । नरे ॥२॥

[1]असुर्य्याः । नाम । ते । लोकाः । अन्धेन । तमसा । आवृताऽइत्त्या वृताः ॥ तान् । ते । प्रेत्त्येतिप्प्र इत्त्य । अपि । गच्छन्ति । ये । के । च । आत्त्महनऽइत्त्यात्त्म हनः । जनाः ॥३॥

जगत्याम् । त्यक्तेन ॥१॥

अन्यथा । अस्ति । लिप्यते ॥२॥

[1]असुर्य्याः । आवृताऽइत्या वृताः । प्रेत्येतिप्र इत्य । गच्छन्ति । आत्महनऽइत्यात्म हनः ॥३॥

य्यत् ॥१॥ त्वय्यि ॥२॥

[1]असुर्य्याः । आवृताऽइत्या वृताः । य्ये ॥३॥

१. इह स्वरितात् परस्य विसर्गस्य 'यवा विश्वा' आदिपदवत् द्विधा संकेतो द्रष्टव्यः । सर्वत्र कपाठः स्थूलाक्षरमुद्रितेन पाठेन सहान्वेति, बम्बई-मुद्रितं च विपर्येति । इह त्वनयोर्वैपरीत्यमुपलक्ष्यते ।

अनेजत् । एकम् । मनसः । जवीयः । न । एनत् । देवाः । आप्नुवन् । पूर्वम् । अर्शत् ॥ तत् । धावतः । अन्यान् । अति । एति । तिष्ठत् । तस्मिन् । अपः । मातरिश्वा । दधाति ॥४॥

तत् । एजति । न । एजति । दूरे । ऊँऽइत्यूँ । अन्तिके ॥ अन्तः । अस्य । सर्वस्य । ऊँऽइत्यूँ । सर्वस्य । अस्य । बाह्यतः ॥५॥

यः । तु । सर्वाणि । भूतानि । आत्मन् । एव । अनुपश्यतीत्यनु पश्यति ॥ सर्वभूतेष्विति सर्व भूतेषु । च । आत्मानम् । ततः । न । वि । चिकित्सति ॥६॥

यस्मिन् । सर्वाणि । भूतानि । आत्मा । एव । अभूत् । विजानतऽइतिवि [1]जानतः ॥ तत्र । कः । मोहः । कः । शोकः । एकत्वमित्येक त्वम् । अनुपश्यतऽइत्यनु पश्यतः ७

आप्नुवन् । अन्यान् । तिष्ठत् । तस्मिन् । मातरिश्वा ॥४॥
ऊँऽइत्यूँ । ऊँऽइत्यूँ ॥५॥
आत्मन् । अनुपश्यतीत्यनु पश्यति । सर्वभूतेष्विति सर्व भूतेषु । आत्मानम् । चिकित्सति ॥६॥
यस्मिन् । आत्मा । तत्र । एकत्वमित्येक त्वम् । अनुपश्यतऽइत्य[2] पश्यतः ॥७॥

जवीयः । [2]तिष्ठतः ॥४॥
बाह्यतः ॥५॥ ष्यः ॥६॥
ष्यस्मिन् । विजानतऽइतिवि[3] जानतः ॥७॥

१. 'जानतः' इति काशिकः पाठः ।
२. अपपाठः पाठान्तरं वेति विचारार्हम् ।
३. ककोशशैल्यनुसारमिह 'वि' इत्येवं शुद्धेन पाठेन भाव्यम् ।

सः । परि । अगात् । शुक्रम् । अकायम् । अव्रणम् । अस्नाविरम् । शुद्धम् । अपापविद्धमित्यपाप विद्धम् ॥ कविः । मनीषी । परिभूरितिपरि भूः । स्वयम्भूरितिस्वयम् भूः । याथातथ्यतऽइतियाथा [1]तत्थ्यतः । अर्थान् । वि । अदधात् । शाश्वतीभ्यः । समाभ्यः ॥८॥

अन्धम् । तमः । प्र । विशन्ति । ये । असम्भूतिमित्यसम् भूतिम् । उपासतऽइत्युप आसते ॥ ततः । भूयऽइवेतिभूयः इव । ते । तमः । ये । ऊँऽइत्यूँ । सम्भूत्यामितिसम् भूत्याम् । रताः ॥९॥

अन्यत् । एव । आहुः । सम्भवादितिसम् भवात् । अन्यत् । आहुः । असम्भवादित्यसम् भवात् ॥ इति ।

शुक्रम् । अव्रणम् । अस्नाविरम् । शुद्धम् । अपापविद्धमित्यपाप विद्धम् । याथातथ्यतऽइतियाथा तथ्यतः । शाश्वतीभ्यः । समाभ्यः ॥८॥

असम्भूतिमित्यसम् भूतिम् । उपासतऽइत्युप आसते । ऊँऽइत्यूँ । सम्भूत्यामितिसम् भूत्याम् ॥९॥

अन्यत् । अन्यत् । असम्भवादित्यसम् भवात् । शुश्रुम । विचचक्षिर-

---

अकायम् । [2]अव्रणम् । अपापविद्धमित्यपाप विद्धम् । स्वयम्भूरितिस्वयम् भूः । य्याथातथ्यतऽइतिय्याथा[3] तथ्यतः ॥८॥

ये । भूयऽइवेतिभूयः इव । ये ॥९॥

---

१. 'तत्थ्यतः' इति काशिकः पाठः ।

२. अपपाठोऽयम्, 'अव्रणम्' इत्येवं वकारवता पाठेन भाव्यम् ।

३. ककोशशैल्यनुसारमिह 'य्याथा' इत्येवं पाठेन भाव्यम् ।

शुश्रुम । धीराणाम् । ये । नः । तत् । विचचक्षिरऽइतिवि [1]चचक्षिरे ॥१०॥

सम्भूतिमितिसम् भूतिम् । च । विनाशमितिवि नाशम् । च । यः । तत् । वेद । उभयम् । सह ॥ विनाशेनेतिवि नाशेन । मृत्युम् । तीर्त्वा । सम्भूत्येतिसम् भूत्या । अमृतम् । अश्नुते ॥११॥

अविद्याम् । विद्यायाम् ॥ विद्यायां । अविद्यायां ॥ विद्याम् । अविद्याम् ॥ अविद्यया । विद्यया ॥१२॥

वायुः । अनिलम् । अमृतम् । अथ । इदम् । भस्मान्तमितिभस्म अन्तम् । शरीरम् ॥ ओम् । क्रतोऽइतिक्रतो । स्मर । क्लिबे । कृतम् ॥१३॥

ऽइतिवि चचक्षिरे ॥१०॥

मृत्युम् । सम्भूत्येतिसम् भूत्या । अश्नुते ॥११॥

अविद्याम् । विद्यायाम् । विद्यायां । अविद्यायां । विद्याम् । अविद्याम् । अविद्यया । विद्यया ॥१२॥

भस्मान्तमितिभस्म अन्तम् । क्रतोऽइतिक्रतो ॥१३॥

ये । विचचक्षिरऽइतिवि[2] चचक्षिरे ॥१०॥

विनाशमितिवि नाशम् । यः । उभयम् । विनाशेतिवि नाशेन ॥११॥

विद्यायाम् । विद्यायां । अविद्यायां । अविद्यया । विद्यया ॥१२॥

[3]वायुः ॥१३॥

---

१. 'चचक्षिरे' इति काशिकः पाठः ।

२. ककोगशैल्यनुसारमिह 'वि' इत्येवं पाठेन भाव्यम् ।

३. इतः पूर्वासां तिसृणां मन्त्र कण्डिकानां केषाचिदेवापुनरुक्तानां पदानां पदपाठस्य द्वादशकण्डिकायामेव पाठात् इह द्वयोः कण्डिकासंख्ययोर्भेदो द्रष्टव्यः ।

हिरण्मयेन । पात्रेण । सत्यस्य । अपिहितमित्यपिहितम् । मुखम् ॥ यः । असौ । आदित्ये । पुरुषः । सः । असौ । अहम् ॥१४॥

ओ३म् । खम् । ब्रह्म ॥

॥ इति वाजसनेयिसंहितापदे चत्वारिंशत्तमोऽध्यायः ॥

हिरण्मयेन । पात्रेण । सत्यस्य । अपिहितमित्यपि हितम् । आदित्ये ॥१४

ओ३म् । खम् । ब्रह्म ॥

॥ इति वाजसनेयसंहितापदे चत्वारिंशतिमोऽध्यायः ॥

---

[3]हिरण्मयेन । यः? ॥१४॥

ओं । खम्ब्रह्म[4] ॥

[5]इतिश्री वाजसनेयि संहितायां शाकल्यकृते पदेन चत्वारिंशोऽध्यायः ॥४०॥

---

१. मन्त्र-संहितायां पदानीमानि सप्तदशकण्डिकायामेव पठ्यन्ते, पदपाठे तु ततो बहिः । कारणमत्र मृग्यम् ।

२. द्रष्टव्या ५२७ पृष्ठस्था टिप्पणी १ ।

३. इतः पूर्वस्याः मन्त्रकण्डिकायाः पूर्वं गतत्वान्नेह तत्पदानि पठ्यन्ते । अत इह तिसृणां कण्डिकासंख्यानां भेदो द्रष्टव्यः ।

४. पदापार्थक्यम् अपस्वरसंकेतश्चात्र दृश्यते । 'खम् । ब्रह्म' इत्येवं शुद्धेन पाठेन भाव्यम् ।

५. इहैवास्यां पङ्क्तावपि स्वराङ्कनं दृश्यते । इदं च स्वराङ्कनं प्रायेणाशुद्धमेव ।

प्रथमं परिशिष्टम्

पाठ-भेद-निदर्शनम्

माध्यन्दिनसंहितायाः पदपाठे क्वचिद् विशिष्टाः पाठा उपलभ्यन्ते। तेषां विषये (एकं विहाय) यथास्थानं टिप्पण्यां विचारः कृतः[1]। तादृशां विशिष्टानां पाठानां झटिति परिज्ञानायेह क्रमशो निर्देश क्रियते—

पृष्ठम्	मन्त्रः	मुख्यपाठः[2]	विशिष्टः पाठः	स्थान-संकेतः
१०	३०	वेष्प?	वेष्य?[3]	क
१३	२	ऊर्णम्रदसमित्यूर्णं म्रदसम्	ऊर्णम्रदसमित्यूर्णम् म्रदसम्	क
२२	२५	प्रतिष्ठायां	प्रतिष्ठायै	दया०, उ०
२३	२५	प्रतिस्थायाऽइतिंप्रति स्थायां	प्रतिस्थायाऽइतिंप्रति स्थायै	,, ,,
२५	३०	अवृषायिषत	वृषायिषत	क
४७	७	द्यावांपृथिवीऽइति-द्यावांपृथिवी	द्यावांपृथिवीऽइति-द्यावांपृथिवी	क
४८	१०	आङ्गिरसी	आङ्गिरसि	दया०
६१	६	योऽइतियो	या। उ (द्वे पदे)	मही०

---

१. काशिकपाठे यस्मिन् यस्मिन् पदेऽवग्रहादुत्तरभागे नियतः स्वर-विशेषः स सर्वोऽपि यथास्थानमधस्तात् टिप्पण्यां निर्दिष्ट इति ते पुनर्नेह लिख्यन्ते। काशिकपाठभेदस्तत एव द्रष्टव्यः।

२. विविधपाठतुलनासौकर्याय मुख्यपाठस्याप्यत्र प्रायेण व्यञ्जनद्विर्वचनरहित एव पाठो निर्देक्ष्यते।

३. अस्माकं मते ककोशेऽपि च 'वेष्य?' इत्येव पाठः, तत्र पकारयकारयोर्बहुत्र समानरूपेणोल्लेखात्।

पृष्ठम्	मन्त्रः	मुख्यपाठः	विशिष्टः पाठः	स्थान-संकेतः
६७	२३	वलगहनमितिवलगहनम्	बलगहनमितिबलगहनम्[1]	दया०
६७	२३	वलगम्	बलगम्[2]	दया०
६८	२५	वलगहनऽइतिवलगहनः	बलगहनऽइतिबलगहनः[3]	,,
६८	२५	वलगहनावितिवलगहनौ	बलगहनावितिबलगहनौ[3]	,,
८९	३	उपरिप्रुतेत्युपरि प्रुता	उपरिप्लुतेत्युपरि प्लुता	ग० ट०
११२	१९	पन्थाम्	पथाम्	क० ज०
१३४	१८	पितरा । मातरा	पितरामातरा	नागेशः[4]
१४१	३६	दुस्तरऽइतिदुस्तरः	दुस्तरऽइतिदुः तरः	दया०
१४४	४	सहौजसऽइतिसहओजसः	सहौजसऽइतिसहओजसः	,,
१५०	१९	आपाम	अपाम	टि० द्र०
१५५	३	युक्त्वाय	युक्ताय	क० टि० द्र०
१७६	६८	दारूणि	दारुणि	दया०
१७८	७५	मस्मसा	भस्मसा	,,
१८१	४	वामदेव्यमितिवामदेव्यम्	वामदेव्युमितिवामदेव्यम्	क०
१९४	४३	प्रवणेभिरितिप्रवणेभिः	प्रवणेभिरितिप्रवणेभिः	क०[5]
२३७	८	विव्रलमितिवि व्रलम्	विव्रलमितिवि व्रलम्	क० दया०

१. अयं पदपाठे पाठः, भाष्ये तु गाहतेरुत्तरपदं निरुक्तम् ।

२. भाष्ये गच्छतेरुत्तरपदं निरुक्तम् ।

३. प्रथमपृष्ठस्था टिप्पणी ३ द्रष्टव्या ।

४. महाभाष्यप्रदीपोद्योते ६।३।३३ ।।

५. ऋगथर्वपदपाठयोरपि नावगृह्यते ।

पृष्ठम्	मन्त्रः	मुख्यपाठः	विशिष्टः पाठः	स्थान-संकेतः
२७८	३८	वीध्र्यायेतिवि ईध्र्याय	वीध्र्यायेतिवि ईध्र्याय	ट०
२८८	३	घृतश्चुतऽइतिघृत श्चुतं ÷	घृतश्च्युतऽइतिघृत श्च्युतं ÷ [1]	क० दया०
२८८	३	मधुश्चुतऽइतिमधु श्चुतं ÷	मधुश्च्युतऽइतिमधु श्च्युतं ÷ [1]	,, ,,
३१४	७८	स्वतंवानितिस्व तंवान्	स्वतंवानितिस्वतं वान्	क०
३५४	४७	ये	य?	क०
३५५	५०	प्र । चिकितुँ	प्रचिकितः	उ० मही० दया०
३६६	८२	सब्वम्	सब्वम् [2]	
३९२	७०	चम्वीवेतिचम्वी इव	चम्वीवेतिचम्वि [3] इव ज० ,,	,,
३९३	७२	वर्ति?	वर्ती?	क०
४०३	३०	ऊर्णम्म्रदाऽइत्यूर्ण म्रदाँ	ऊर्णम्म्रदाऽइत्यूर्णम् म्रदाँ [4]	क०
४०६	३९	मधुश्चुतऽइतिमधु श्चुतं ÷	मधुश्च्युतऽइतिमधु श्च्युतं ÷ [5]	क०
४१९	१६	सादयात्	सादयुत्	क०
४५६	१	बस्वैं ÷ । तेगाम्	बस्वैं ÷ । तेगान्	ट०
		बस्वैं ÷ । तेगान् (ट)	बस्वैः । स्तेगान्	तैत्ति०
		तेगाम्	ते । गाम्	दया०
४५८	२	निवेष्पमितिनि वेष्पम्	निवेष्यमितिनि वेस्यम् [6]	मुद्रितेषु
४६५	१९	युजत्राँ	यजंत्राँ	ज

१. बम्बईमुद्रिते उव्वटमहीधरभाष्ययुतेऽप्ययमेव पाठः ।

२. बम्बईमुद्रित उव्वटमहीधरभाष्ययुतेऽपि 'सब्वं' सर्वानुदात्तमुपलभ्यते

३. ऋक्पदपाठे १०।६१।१५ ।।

४. द्र० पृ० १३, मं० ४ पाठान्तरम् ।

५. द्र० पृ० २२८, मं० ३ पाठान्तरम् ।

६. पाठभेदविचार एतत्परिशिष्टान्ते द्रष्टव्यः ।

पृष्ठम्	मन्त्रः	मुख्यपाठः	विशिष्टः पाटः	स्थान-संकेतः
४८२	२	च । रिषत्	चरिषत्	क०
५००	१९	त्रिवन्धुरऽइतिंत्रि वन्धुर?	त्रिवन्धुरऽइतिंत्रि वन्धुरः	क०, अन्यत्रापि
५१५	३१	सुस्वयंन्ती-ऽइतिंसुस्वयंन्ती	सुस्त्रयंन्तीऽइतिं सु स्वयंन्ती	क० दया० अन्यत्रापि
५१९	४२	चिश्चा	चिश्च्या[1]	क०
५२९	३	पुँश्चल्लम्	पूँश्चलम्	क० दया०
५७८	८३	पदा । नि	पदानि '	क० अ० उ०
५८३	११	सोऽइतिसो	सा । ऊँऽइत्यूँ[2]	म० दया०
५९४	४८	दैव्यां÷	दैव्यांꣳ	ट०
५९६	५२	घृतस्नूरितिंघृत स्नूंꣳ	घृतस्नूरितिंघृत स्नू?[3]	अ०
६२१	७	ध्वान्तऽइतिधु आन्तꣳ	ध्वान्तऽइतिधू आन्तꣳ	ट०
६२३	३	असुर्य्या÷	असुर्य्याꣳ	ट०

वेष्पः—निवेष्पम्—निवेष्पाय—पदानां साधुत्वासाधुत्वविवेचनम्

मा० सं० १।३० मन्त्रे वेष्पः स्थाने वेष्यः पदम्; मा० सं० २५।२ मन्त्रे निवेष्पम् स्थाने निवेष्यम् पदम्; मा० सं० १६।४४ मन्त्रे च निवेष्प्याय स्थाने निवेष्य्याय पदं क्वचिन्मुद्रितेषु ग्रन्थेषूपलभ्यते (काण्वपाठेऽपि क्रमशः १।१०।२; २७।२।१; १७।७।३ मन्त्रेष्वितथमेव मुद्रणं क्वचिद् दृश्यते)। अत्र सर्वत्रापि पकारस्थाने यकारवर्णापत्तिरुपलभ्यते। तत्र मा० सं० १।३० मन्त्रे निस्सन्दिग्धो वेष्पः पकारवान् पाठ इत्यस्माकीनैराचार्यैः पदवाक्यप्रमाणज्ञैः पण्डितब्रह्मदत्तजिज्ञासुभिः स्वकीये यजुर्वेदभाष्यविवरणे १८७ संख्याकान् संहिताया हस्तलेखान्, ४१ मितान् पदपाठस्य हस्तलेखान् दृष्ट्वा ४१ संख्या-मितानां वेदपाठिनां प्रत्यक्षं पाठमनुनिशम्य स्थिरीकृतः (द्र० भाग १ पृष्ठ

१. द्र० २८८ पृष्ठस्था टि० १।

२. द्र० ६१ पृष्ठस्था टि० १।

३. 'घृतस्नू' शब्द ऋग्वेदे (१।१६।२; ३।६।६) अप्यन्तोदात्त एवोपलभ्यते। द्रष्टव्यात्र ५९६ पृष्ठस्था टिप्पणी।

१३४—१४७ द्वि० सं०) । अत्र वेष्यः पाठस्य या भ्रान्तिः सा वैबरसम्पादित-संहिता-ब्राह्मण-श्रौतसूत्रेषु वेष्यः इति पाठमुद्रणमूलेत्यपि तत्रैव व्यक्तीकृतम् ।

इत्थमेव मा० सं० १६।४४ मन्त्रे निवेष्प्याय इत्येवं पकारवान् पाठः संहिताग्रन्थेषु उवटमहीधरयोश्च भाष्ययोरुपलभ्यते (दयानन्दसरस्वतीकृते भाष्ये निवेष्याय पाठो मुद्रणप्रमादजः) । पण्डितविश्वबन्धुशास्त्रिणा स्वकीये वैदिकपदानुक्रमकोशे (पृष्ठ १८३२) अस्य पदस्य **निवेष्याय** इत्येवं पाठः स्वीकृतः, काण्वसंहितायां (१७।७।३) तैत्तिरीयसंहितायां चाप्ययमेव पाठ उररीकृतः, परन्तु काण्वतैत्तिरीयसंहितयोरपि निवेष्प्याय इत्येवासंदिग्धः पाठ उपलभ्यते । मा० सं० २५।२ मन्त्रेऽपि निवेष्पम् इत्येव वैदिकानां पाठः (का० सं० २७।२।१ मन्त्रेऽपि निवेष्पम् इत्येव पाठः) । यत्तु मुम्बईमुद्रित उवटमहीधरभाष्ये मन्त्रे व्याख्याने च **निवेष्यम्** इत्येवं पाठ उपलभ्यते, स वैबरसम्पादितग्रन्थानुकरणमूलकः (अत्रापि स्वा० द० भाष्ये निवेष्यम् पाठो मुद्रणप्रमादज एव) । पण्डितविश्वबन्धुशास्त्रिणाऽपि मा० सं० २५।२; का० सं० २७।२।१ मन्त्रे यत् 'निवेष्यम्' पदं स्वीकृतं, तदपि वैबरसम्पादितग्रन्थानुकरणमूलकमेव । यत्तु मुम्बईमुद्रिते सभाष्ये शतपथे (१।३।१।१७) **विष्णोर्वेष्योऽसि** मुद्रितः पाठो दृश्यते, सोऽपि वैबरसम्पादितशतपथानुकरणमूलक एव (अत्र भाग १, पृष्ठ ९५ टिप्पण्यवलोकनीया, अत्र वैदिकानां **वेष्पः** इति पकारवान् एव पाठो निर्दिष्टः) । एवमेव मुम्बईमुद्रिते शतपथे ५।३।४।११ कण्डिकायां **अथ निवेष्यं गृह्णाति** इति पाठो दृश्यते, सोऽपि वैबरसम्पादितशतपथानुकरणरूप एव । अत्र हि **निवेष्य**-पदेन 'आवर्तोदकम्' गृह्यत इति तदीयेन सायणभाष्येण कात्यायनश्रौतसूत्रव्याख्यानेन च प्रतीयते । मा० सं० १६।४४ मन्त्रपठितस्य निवेष्प्याय पदस्य व्याख्याने पकारवत् निवेष्पपदमावर्तकस्य भ्रमस्य (भंवर) वाचकमिति स्पष्टमाहतुरुवटमहीधरौ । तेनात्रापि शतपथे **निवेष्प्यं** इत्येव शुद्धः पाठो ज्ञेयः । यत्तु विद्याधरमिश्रः स्वीये कात्यायनश्रौतव्याख्याने **विष्णोर्वेष्पः** (२।७।२) इति निर्देशे वैबरमुद्रितमपपाठं परिमृज्य शुद्धं पाठं निर्दिशन्नपि उत्तरत्र (का० श्रौ० १५।४।३२ सूत्रे) **निवेष्याः** इत्येवं पठितवान्, तच्चिन्त्यम् । काश्यां चौखम्बामुद्रिते कर्कभाष्ये (का० श्रौ० १५।४।३० सूत्रे) **निवेष्येन** इत्येवं पठ्यते, स प्रत्यक्षं वैबरमुद्रितग्रन्थानुकरणमूलकोऽपपाठः, नह्यत्र तृतीयान्तपदस्य कश्चिदर्थः सम्भवति । प्रकरणानुसारं **निवेष्प्याः** **निवेष्याः** इत्येवं वा द्वितीयान्तं पदमेव साधु । अपि च 'निवेष्येन' पाठे णत्वमपि प्राप्नोति, तस्य वारणमपि दुःशकमेव । यत्तु मैत्रायणीयानामाम्नाये (३।१५।२) **निवेष्येण** इति श्रूयते, सोऽपि स्वरानुरोधादपपाठ एव प्रतीयते ।

अथ स्वर-मीमांसा—'वेष्प' इति पकारवान् शब्दः प्रत्ययस्वरेण, 'निवेष्प' इति च कृदुत्तरपदप्रकृतिस्वरे प्रत्ययस्वरेणान्तोदात्तः सम्पद्यते। **वेष्य** इत्येवं यकारवति पाठे यत्-प्रत्यये **यतोऽनावः**(अ० ६।१।२१३)इति नियमेन 'वेष्य' शब्द आद्युदात्तः स्यात्, यद्वा **तित्स्वरितम्** (अ० ६।१।१८५) इत्युत्सर्ग-नियमेन अन्तस्वरितः स्यात् ('मेध्य' शब्दे संहिताभेदेन उभौ स्वरौ दृश्येते), निवेष्यशब्देऽपि कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वमन्तस्वरित्वं वा स्यात्, अन्तोदात्तौ तु **वेष्यनिवेष्य** शब्दौ न कथंचिदपि संभवतः। यत्तु शौनकसंहितायां (६।१२।४=६।७।४ अजमेर सं०) नि॒वे॒ष्यः इतिपदस्यान्तोदात्तस्वरः पण्डित-विश्वबन्धुशास्त्रिणा पदानुक्रमकोशे (पृ० १८३२) प्रदर्शितः, सोऽपि राथ-ह्विटनीसंस्करणमूलक एव। वस्तुतस्त्वथर्वकोशेषु नि॒वे॒ष्यः॑ इत्येवमन्तस्वरित-त्वस्य बाहुल्येनोपलम्भाद् अन्तस्वरितपाठ एव तत्र युक्तः। अत एवास्माभिः अजमेरमुद्रिताया अथर्वसंहितायाः षष्ठावृत्तौ नि॒वे॒ष्यः॑ इत्येव पाठो विहितः।

माध्यन्दिनपाठस्य निश्चयेऽन्तःसाक्ष्यम्—माध्यन्दिनसंहितायाः पद-पाठस्य यस्मिन् पाठे संयुक्तानां वर्णानां द्वित्वं भवति, तस्मिन् पाठे षकारपकार-योगे षकारात्परः पकारो द्विलिख्यते, षकारयकारयोगे च यकारात् पूर्वः षकारो द्विलिख्यते। सत्येवं ष्प-ष्ययोर्द्विर्वचनप्रक्रियाभेदे पकारयकारभ्रान्तिस्तूदेत्येव न। एवं च द्विर्वचनयुक्तेषु कोशेषु सर्वत्र पकारस्यैव द्विर्लेखदर्शनात् त्रिष्वपि स्थलेष्वसन्दिग्धः पकारवानेव पाठः।

एतेन काण्वमाध्यन्दिनसंहितयोः तद्ब्राह्मणे श्रौतसूत्रे च **वेष्पः निवेष्पं निवेष्प्याय** इत्येव वैदिकानामविगीताः पाठा इत्युपपादितम् (अस्माभि-रुपलब्धेष्वपि हस्तलेखेषु प्रायेण पकारवानेव पाठः, यत्तु क्वचित् यकारवान् पाठो दृश्यते स पकार-यकारयोर्लिपिसादृश्यमूलक एव)। ये तु खलु बैबरमुद्रा-पितान् ग्रन्थान् चक्षुर्निमील्यानुसरन्ति त एवात्र अवैदिकान् भ्रष्टान् पाठान् पठन्त्युदाहरन्ति च।

एतेन ये भारतीया विपश्चितः पाश्चात्यविद्वद्भिः सम्पादितान् ग्रन्थान् सर्वथा दोषविरहितान् मत्वा तेषां परं प्रामाण्यमाश्रयन्ति ते पदे पदे स्खलन्ति। ऋग्वेदस्य मैक्समूलरसम्पादितसंस्करणमाश्रित्य तन्मन्त्रगणनाय प्रवृत्ताः सर्वेऽपि विद्वांसो भ्रान्ताः, इत्यस्माभिर् **ऋग्वेदस्य मन्त्रसंख्या** नाम्नि निबन्धे बहोः कालात् पूर्वं व्यक्तीकृतम्।

वस्तुतस्तु वैदिकपाठविचारे संप्रदायविदो वैदिका एव प्रमाणम्, इत्यल-मतिपल्लवितेन।

द्वितीयं परिशिष्टम्

यमानां स्वरूपम्, संख्याः, लेखन-प्रकारश्च

वैदिकेषु पलक्क्नी चक्ख्नतुः जग्ग्मः, जघ्घ्नुः इत्यादिषु अनुनासिके पञ्चमे वर्णे परतः सवर्गीयादुत्तरस्य मध्यस्थस्य नासिक्यत्वेनोच्चारितस्य वर्णस्य यमत्वं प्रसिद्धम्। तथा चोक्तं कौशिकशिक्षायाम्—

पलक्क्नी चक्ख्नतुर्जग्ग्मर्जघ्घ्नुरित्यत्र यद् वपुः।
नासिक्येनोक्तं कादीनां त इमे यमाः।
तेषामुकारः संस्थानवर्गीयत्वलक्षकः॥[1] इति।

औदव्रजिराचार्योऽप्याह—अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः इति (ऋक्तन्त्रव्याकरण प्रपा० १)।

नारदीयशिक्षायां (२।२।८) यमलक्षणम्—

अनन्त्यश्च भवेत् पूर्वोऽन्त्यश्च परतो यदि।
तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः॥ इति।

एवमेवान्यासु शिक्षासु यमस्वरूपत्वमुपलभ्यते। ऋक्प्रातिशाख्ये (६।२९)ऽप्युक्तम्—

स्पर्शा यमाननुनासिकाः स्वान् परेषु स्पर्शेष्वनुनासिकेषु॥ इति।

व्याख्यातं चोवटेन—अननुनासिकाः स्पर्शाः स्वान् यमानापद्यन्तेऽनुनासिकेषु स्पर्शेषु परेषु इति।

तैत्तिरीयप्रातिशाख्ये (२१।१२)ऽपि—स्पर्शादनुत्तमादुत्तमपरादानुपूर्व्यान् नासिक्याः॥ इति।

---

१. उद्धृतं वर्णोच्चारणशिक्षायाम् अजमेरमुद्रितायां सप्तमप्रकरणे। तत्र 'चक्ख्नतुः जघ्घ्नुः' इत्यपपाठौ। एवमेव 'त इमेऽयमाः' इत्येवम् 'अयमाः' छेदोऽपि वैदिकमतविरुद्धो ज्ञेयः।

शुक्लयजु प्रातिशाख्येऽपि—कुँ खुँ गुँ घुँ इति यमाः (८।२४) इत्येवं यमा निर्दिष्टाः ।

यमसंज्ञका वर्णा अनुनासिका इत्यापिशलिः पाणिनिश्चापि स्वकीय-लोकत्रेदसाधारण्योः शिक्षयोः प्रतिजानते । तथाहि—अनुस्वारयमा नासिक्याः[1] ।। इति ।

तत्र कति यमा इत्यत्र विवदन्ते व्याख्यातारः । चत्वारो यमा इत्येके संगिरन्ते, विंशतिर्यमा इत्यपरे । तथाहि—चत्वारो यमाः कुँ खुँ गुँ घुँ इति याज्ञवल्क्यशिक्षायाम् (२१२, काशीमुद्रिते शिक्षासंग्रहे) उच्यते ।

उवटस्तु शुक्लयजुःप्रातिशाख्यस्य कुँ खुँ गुँ घुँ इति यमाः सूत्रस्य व्याख्याने सूत्रोक्तान् कुँ खुँ गुँ घुँ इत्येतानुपलक्षणं मन्यमानः यमसंज्ञका वर्णा विंशतिसंख्याका भवन्ति इत्येवं विंशतिसंख्याकान् यमान् आह ।

याज्ञवल्क्यशिक्षायां चतुष्ट्वमुल्लिख्यापि यथोत्तरश्लोके तन्निदर्शनान्युक्तानि तथा विंशतिरेव यमास्तन्मतेऽपीति ज्ञायते । तथाहि तन्निदर्शकः श्लोकः—

रुक्क्मेति प्रथमो ज्ञेयः सक्त्थ्ना इत्यपरो भवेत् ।
विद्द्मा ते तु तृतीयश्च जम्भे दद्ध्मश्चतुर्थकः ।।[2] इति ।

अस्मिन् श्लोके स्पष्टमेव सक्त्थ्ना पदे चतुर्थवर्गस्य द्वितीयो वर्ण-स्थकारः, विद्द्मा पदे चतुर्थवर्गस्य तृतीयो वर्णः, दद्ध्मः पदे तस्यैव वर्गस्य चतुर्थो वर्णो यमत्वेनोदाहृतः । एतेन ज्ञायते यत् पूर्वत्रोक्ते चत्वारो यमाः पाठे चतुष्ट्वसंख्या प्रथमवर्गस्थानामेव चतुर्णां वर्णानां द्योतिका नास्ति, अपितु प्रतिवर्गं प्रथमद्वितीयतृतीयचतुर्थवर्णानां सस्थानत्वेन पिण्डीकृत्योक्ताः । तेन वर्गभेदेन विंशतिः सन्तोऽपि यमाः सस्थानत्वेन पिण्डीकृत्य चतुर्धा एव ।

अत एव याज्ञवल्क्यशिक्षाया व्याख्यात्राऽमरनाथशास्त्रिणाऽप्युक्तम्—चत्वार इति । उकारः सादृश्यार्थः इति ।

---

१. आपिशलशिक्षा १।१४ ।। पाणिनीयशिक्षा १।१६ ।। द्र० अस्मत्सम्पादितानि शिक्षासूत्राणि (द्वि० संस्क०) ।

२. मुद्रितपाठे पूर्वयोरुदाहरणयोर्मुद्रणे द्वित्वाभावरूपा या अशुद्धिः तां परिमृज्यात्र पाठो निर्दिष्टः ।

अयमेवार्थः पूर्वोद्धृतकौशिकशिक्षासूत्रेषु तेषामुकारः सस्थानवर्गीय-लक्षकः इत्येवं स्पष्टमुक्तः ।

एतेन चत्वार एव यमा इति मतं प्रत्युक्तं वेदितव्यम् ।

अथेदानीं विचार्यते द्वितीयतृतीयचतुर्थपञ्चमवर्गस्थानां यमानां निर्देशः लिप्यां कथं कर्तव्य इति । कुतः संदेह इति चेत् ? माध्यन्दिनसंहिताया आधुनिकेषु मुद्रितग्रन्थेषु क्वचिल्लिखितग्रन्थेषु च 'पत्नी' इत्येवमादिषु केषुचित् पदेषु 'पत्क्नी' इत्येवं पाठदर्शनात् । आश्चर्यकरं त्वेतद् यत्तेष्वेव ग्रन्थेषु आत्मा विद्द्मः दद्ध्मः गृभ्णामि इत्यादिषु न प्रथमवर्गीयाः क ग घ वर्णा निर्दिश्यन्ते । एतेन ज्ञायते पत्न्यावहोरात्रे (३१।२२) मन्त्रे पत्क्नावहोरात्रे लेखनमाहोपुरुषिकामात्रम् । अमरनाथशास्त्रिणा याज्ञवल्क्यशिक्षाव्याख्यायाष्टिप्पण्यां (पृष्ठ १५५ टि० ३) 'ननु तकारस्य द्विर्भावे द्वितीयतकारस्यैव (शु० य० प्रा० १।१६१) यमत्वे ककारलेखनमसंगतमिति चेत् इत्येवमाशङ्क्य न, नासामूलेन करणेन यमोच्चारणे प्रवृत्तो यत्नः जिह्वामूलीयसदृशीं श्रुतिमुत्पादयेत् इति तथैव संभवाभिप्रायेण लिखनात् इत्येवं ककारलेखनस्य समुत्पत्तिर्दर्शिता, सा गतानुगतिको लोको न लोकः पारमार्थिकः इत्याभणकमनुसरति । अपि च वर्गीयप्रथमस्य यमस्य जिह्वामूलीयसदृशी ध्वनिरभिप्रेता, तर्हि वर्गीयतृतीयचतुर्थयोर्यमयोः कीदृशी ध्वनिरुत्पादनीयेति न तेन महानुभावेन स्पष्टीकृतम् । एतेन 'पत्क्नी' इत्येवं ककारलेखनं तादृशोच्चारणं च शास्त्रविरुद्धमिति स्पष्टम् ।

तृतीयं परिशिष्टम्

९ ॶ चिह्नयोः स्वरूपं तदुच्चारणञ्च

वैदिकासु कासुचित् संहितासु ९ इत्येवं ॶ इत्येवं वैकप्रकारकं चिह्न-मुपलभ्यते। माध्यन्दिनसंहितायां तु ९ ॷ इत्युभौ चिह्नौ स्थितिभेदेन व्यव-स्थितावुपलभ्येते। ९ ॷ इत्येतौ कस्य वर्णस्य द्विविधव्यवस्थितोच्चारणस्य चिह्नाविति विचार्यते।

इमौ चिह्नौ सदा तत्रैवोपलभ्येते यत्र रशषसहेषु परतोऽनुस्वारस्य परसवर्णं न भवति। माध्यन्दिनसंहितायाम् अनुस्वारस्य रशषसहवर्णान् विहाय सर्वत्रैव नित्यं परसवर्णत्वं भवति। रशषसहानां सवर्णी सानुस्वारं वर्णान्तरं नास्ति इति वैयाकरणा वैदिकाश्च मन्वते। तेन रशषसहेषु परतोऽनुस्वारस्य परसवर्णत्वं न भवति, अनुस्वारः स्वेनैव रूपेणावतिष्ठते। माध्यन्दिना यथा यवयोर्गुरुलघुलघुतरभेदेन त्रिविधं विशिष्टमुच्चारणं विदधते, तथैवानुस्वार-स्यापि ह्रस्वदीर्घभेदेन द्विविधं विशिष्टमुच्चारणं कुर्वते।

पुरा कालेऽनुस्वारस्य यवयोरिव त्रिविधमुच्चारणमभूदिति प्रातिशाख्य-परिशिष्टभूतात् प्रतिज्ञापरिशिष्टाज्ज्ञायते। तथाहि तत्सूत्रम्—

तस्य त्रैविध्यमाख्यातं ह्रस्वदीर्घगुरुभेदैः।
दीर्घात् परो ह्रस्वो ह्रस्वात् परो दीर्घो गुरौ परे गुरुः॥ ३।२॥

एषु प्राचीनाचार्यैरुक्तस्तृतीयो भेद इदानीं लुप्तः। तथा चोक्तमस्य सूत्रस्य व्याख्यानेऽनन्तभट्टेन—

वस्तुतस्तु गुरुदीर्घयोर्भेदो नास्ति तथाप्युपाधिभेदाद् भेदो मन्तव्यः। अस्ति चात्रोपाधिः—संज्ञाभेदो लिपिभेदश्च। तृतीयस्त्विव-दानीं प्रायशः परिभ्रष्टः, तथापि प्राचीनसंप्रदायानुरोधाज्ज्ञायते।

नायं वर्णविशेषः—यथा चास्माभिः पूर्वमुपपादितं तथा ९ ॶ इत्येताभ्यां चिह्नाभ्यां निर्दिष्टं नानुस्वाराद् वर्णान्तरं किञ्चित्। अत एव

प्रातिशाख्ये वर्णप्रकरणेऽस्य निर्देशो नोपलभ्यते । यदि चास्य वर्णान्तरत्वं स्वीक्रियेत तर्हि प्रातिशाख्येन विरोध उत्पद्यते । प्रातिशाख्ये ग्रं इत्युस्नारः (८।२१) सूत्रेण ग्रनुस्वारस्य सद्भावः सूचितः। माध्यन्दिनसंहितायाम् ग्रनुस्वारस्य नित्यं परसवर्णत्वं भवतीत्युक्तं पुरस्तात्, ग्रत एव क्वचिदपि वैदिकपाठे[1]ऽनुस्वारो नोपलभ्यते। सति चानुस्वाराभावे यथा प्रातिशाख्यप्रवक्त्रा माध्यन्दिनपाठेऽदृश्यमाणानां वर्णान्तराणां तस्मिन् ळह्ळजिह्वामूलीयोपध्मानीयनासिक्या[2] न सन्ति माध्यन्दिनानाम्, लृकारो दीर्घः, प्लुतश्चोक्तवर्जम् (८।३५) इति सूत्रेण प्रतिषेध उक्तस्तथाऽनुस्वारस्यापि प्रतिषेधो व्यधास्यत् । न च तेनानुस्वारस्य प्रतिषेधो विहितः। तेन ज्ञायते ऽस्त्यनुस्वारस्य माध्यन्दिनसंहितायां सद्भावः । स च रशषसहपर एव सम्भवति यत्रानुस्वारस्य परसवर्णत्वं न प्राप्नोति। एतेन ज्ञायते यन्माध्यन्दिनसंहितायां ९ ७ इत्येवं भूतौ यौ द्वौ लिपिचिह्नावुपलभ्येते तावनुस्वारस्यैव द्विविधोच्चारणाय कल्पितौ, न वर्णान्तरस्य कस्यचिद् द्विविधस्य। एतेनान्यसंहितास्वपि यत्र ९ ७ इत्येवं वैकविधमेव चिह्नमुपलभ्यते तदप्यनुस्वारस्यैव ज्ञेयः ।

यत्तु प्रतिज्ञासूत्रे—ग्रथानुस्वारस्य ७ इत्यादेशः शषसहरेफेषु इत्यत्रादेशरूपेण निर्देशः, कृतः सोऽपि लिपिचिह्नरूपादेशपर एव व्याख्यातव्यः, न तु वर्णान्तरादेशरूपः। ग्रन्यथा पूर्वमुक्तः प्रातिशाख्यविरोध ग्रापद्येत ।

ग्रनुस्वारस्य लिपिचिह्नभेदे कारणम्—यदि ९ ७ चिह्नाभ्यां निर्दिष्टोऽनुस्वार एव तर्हि वर्णान्तरवल्लिपिभेदः कुत इति चेद्, उच्यते—माध्यन्दिनसंहितायाम् ग्रनुस्वारस्य द्विविधोच्चारणस्य (प्राचीनमते त्रिविधस्य) विहितत्वात् द्विविधोच्चारणभेदनिदर्शनाय लिप्यां द्विविधं चिह्नमावश्यकम्, तच्च द्विविधं चिह्नं यथानुस्वारचिह्नं वर्णोपरि निर्दिश्यते तथोपरि सुकरतया न संभवति, ग्रतस्तस्य द्विविधं चिह्नं वर्णानन्तरं ९ ७ रूपेण निर्दिश्यते ।

९ ७ निर्दिष्टयोरुच्चारणप्रकारः—साम्प्रतिका वैदिका ग्राभ्यां चिह्नाभ्यां निर्दिष्टस्यानुस्वारस्य ग्वङ् गुङ् इत्येवमुच्चारणं विदधति । एतादृश-

---

१. माध्यन्दिनसंहिताया येषु मुद्रितग्रन्थेषु ग्रनुस्वार उपलभ्यते ते सर्वे वैबरमुद्रितग्रन्थानुसारमेव मुद्रिताः सन्ति। न तादृशो वैदिकानां पाठः, ग्रतस्तान् दृष्ट्वा न भ्रमितव्यम् ।

२. नासिक्यः=ग्रनुनासिकस्वरः। सत्यपि नासिक्यस्य निषेधे 'संस्कृत' इत्येवामादिषु क्वचिद् नासिक्यः स्वरः कथं दृश्यते इति विचारार्हम् ।

मुच्चारणं प्रत्यक्षमेव दोषग्रस्तम्, नह्यर्धमात्रिकस्य वर्णस्य सार्धद्विमात्रिकं ग्वङ्, द्विमात्रिकं गुङ् इत्येवं वोच्चारणरणं साधु शक्यते वक्तुम् ।

याज्ञवल्क्यशिक्षाव्याख्यात्राऽमरनाथशास्त्रिणा ग्वङ् इत्येवमुच्चारणस्य स्पष्टमशास्त्रीयत्वमुक्तम्—ये च 'गणपतिग्वङ्हवामहे' इत्येवमुच्चारयन्ति ते ऽनधीतविद्या प्रातिशाख्याद्यनभिज्ञाश्च । पृष्ठ १०६ ।

ह्रस्वदीर्घसंज्ञयोरभिप्रायः—न च दीर्घात् परस्य ह्रस्वसंज्ञायाः ह्रस्वात् परस्य च दीर्घसंज्ञाया विधानात् मात्रिकद्विमात्रिकालिकेन भवितव्यम् । नह्यत्र ह्रस्वदीर्घशब्दौ अचां ह्रस्वदीर्घसंज्ञावत् द्विमात्रैकमात्राकालविधायकौ, अपितु द्विविधस्यानुस्वास्योच्चारणे प्रयत्नस्य गुरुलघुभावस्यैव द्योतकौ ।[1]'

एतेन ॐ ँ चिह्नाभ्यां संकेतितस्य द्विविधस्यानुस्वारस्य गुरुलघुप्रयत्नाभ्यामेवोच्चारणं कर्तव्यम्, न तु ग्वङ् गुङ् इत्येवं रूपेण इति सम्यक् व्यवस्थापितम् ।

---

१. अमरनाथशास्त्रिणाऽपि पूर्वोद्धृतप्रतिज्ञापरिशिष्टसूत्रस्य आदेश शब्द एवं व्याख्यातः—तत्रादेशश्च द्विमात्रिकाद्युपलक्षितवर्णविशेषोच्चारणस्वरूप एव ।

तुरीयं परिशिष्टम्

यकारषकारयोर्जकारखकारोच्चारणयोर्विवेचनम्

साम्प्रतिका माध्यन्दिना यथालक्षणं गुरुसंज्ञकस्य[1] यकारस्य जकारोच्चारणं षकारस्य टवर्गसंयोगं ककारादिसंयोगं च विहाय खकारोच्चारणं कुर्वन्ति । तद्विषये विचार्यते—किमनयोर्जकारखकारोच्चारण शास्त्रसम्मतमुताशास्त्रीयम् । तत्र तावत् यथाक्रममनयोर्जकारखकारोच्चारणविधायकानि वचनानि प्रस्तूयन्ते संक्षेपेण—

जकारोच्चारणविधायकानि वचनानि—याज्ञवल्क्यशिक्षायामेवं विधीयन्ते—

पादादौ च पदादौ च संयोगावग्रहेषु च ।
जशब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः ॥१५०॥

प्रातिशाखीय-प्रतिज्ञा-परिशिष्टेऽपि—

'अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य, संयुक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणं जकारोच्चारणम्' । २।१ ॥

एवमेव माध्यन्दिनशिक्षाया लघुमाध्यन्दिन शिक्षायां च विहितम् ।

तत्र जकारोच्चारणं किम्मूलकमिति तावद् प्रस्तूयते—माध्यन्दिनाः यकारवकारयोस्त्रैविध्यं प्रतिजानते गुरुलघुलघुतरभेदेन । तदुक्तं याज्ञवल्क्य-— शिक्षायाम्—

वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः ।
आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः ॥
यवर्णस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः ।
.................................॥ १५५-१६१ ॥

---

१. क्व यकारो गुरुसंज्ञो भवतीत्यस्य निदर्शनं याज्ञवल्क्यशिक्षायां विस्तरेणोक्तम् । तदनुसृत्यास्माभिः सोदाहरणनिर्देशो 'यकारवकारयोर्विशिष्टा लेखनपद्धतिः' इत्यस्मिन् प्रकरणे पूर्वत्र (पृष्ठ ३५-३६) यथाशास्त्रं विहितस्तत्र द्रष्टव्यः ।

अत्र स्मृतयोर्गुरुसंज्ञकयोरुच्चारणं केन प्रयत्नेन भवतीति तावद् विवेचनीयम् । अन्तस्थानां वर्णानां शिक्षाकारैः ईषत्स्पृष्टः प्रयत्न ऐकमत्येन प्रतिपाद्यते । तेन यदा ईषत्स्पृष्टप्रयत्नजौ यकारवकारौ ईषत्स्पृष्टप्रयत्नात् किंचिदधिकेन प्रयत्नेनोच्चार्येते तदेमौ गुरू भवतः । एतच्च पदान्तयोर्यकार-वकारयो विधायके व्योर्लघुप्रयत्नतरः शाकटायनस्य (अ० ८।३।१८) इति पाणिनीये सूत्रे प्रयत्नशब्दनिर्देशेन विज्ञातुं शक्यते । अयमेवार्थः सुस्पृष्टं त विजानीयात् (१६१) इति याज्ञवल्क्यशिक्षावचनेनोच्यते । अत्र सुस्पृष्ट-मित्यस्य न स्पृष्टप्रयत्नेनोच्चारणे विवक्षा । तेन यथा पदान्तीयौ यकारवकारा-वीषत्प्रयत्नौ सन्तावपि लघुप्रयत्नेनोच्चार्येते, तथैव गुरुसंज्ञकौ यकारवकारावपि ईषत्प्रयत्नावेव गुरुप्रयत्नेनोच्चारणीयौ इत्याचार्याणामभिप्रायो ज्ञेयः । यथा पदान्तीयौ लघुतरौ यकारवकारौ लघुप्रयत्नेनाविस्पष्टरूपेणोच्चार्येते, तथैव गुरू यकारवकारौ गुरुप्रयत्नेन सुस्पष्टमुच्चारणीयौ । तेन गुरू यकारवकारौ सुस्पष्टौ, लघू यकारवकारौ स्पष्टौ लघुतरौ यकारवकारावीषत्स्पष्टावुच्चारणीयाविति भावो विस्पष्ट एव ।

एतेन विवेचनेनेदं सुव्यक्तं भवति यथा लघुतरौ यकारवकारौ ईष-त्स्पृष्टलघुतरप्रयत्नेनोच्चार्यमाणौ न वर्णान्तररूपेण विक्रियेते, तथैव ईषत्स्पृष्ट-गुरुप्रयत्नजावपि नोच्चारणे वर्णान्तरं भेजेते इति । अत एव गुरुवकारो सर्व-कोशेषु व्व इत्येवं लिख्यते, वकाररूपेणैव चोच्चार्यतेऽद्ययावत् । तथैव गुरु-यकारस्यापि प्राचीनकाले य्य इत्येव प्रचार आसीत् (द्र० अस्मदीयो १४७१ वैक्रमाब्दे लिखितः 'क' कोशः) । इयमेव च यकारद्वित्वलेखनपद्धतिरुत्तरकाले य इत्येवं लेखने मध्येबिन्दुनिर्देशने च परिवर्तिता ।

उत्तरकाले यदा शास्त्रतात्पर्यानभिज्ञैरीषत्स्पृष्टप्रयत्नजस्य यकारस्य स्पृष्टप्रयत्नेनोच्चारणमारब्धं, तदाऽयं यकारः समानस्थानीये स्पृष्टप्रयत्नजे जकारे परिवर्तितः । यद्वाऽयं दोषो देशविशेषजेन करणदोषेण वैदिकपाठेऽप्युत्पन्नः । यथा वाङ्गा स्वकरणदोषेणान्तस्थं वकारं बहोः कालात् बकाररूपेणैवोच्चरन्ति । तेषां बवयोः समोच्चारणदोषेण लेखनेऽपि दोषोऽयमुपलभ्यते । वाङ्गा महान्तो वैयाकरणा अप्यनेन दोषेण ग्रस्ता अन्तस्थवकारवता धातुना व्युत्पद्यमानान् शब्दान् बकारवता धातुना निष्पादयन्ति[१] । वाङ्गेषु यकारस्य जकारोच्चारणे-ऽप्ययमेव हेतुः ।

---

१. अत एव पुरुषोत्तमदेवो भाषावृत्तेरादौ **जबगडदश्** सूत्रे 'वश्' प्रत्याहारं निदर्श्य **'पुनर्बश्'** इत्युक्तवान् । पुनः पदप्रयोगोऽत्र अन्तस्थपवर्गीययोः समानोच्चारणनिमित्तज एव ।

वाजसनेयिसंहितायाः प्रवक्तुरपि मिथिलादेशे स्थितिरितिहासग्रन्थैर्विज्ञायते । मैथिलेष्वपि बाङ्गानामिव बकारवकारयोर्जकारयकारयोः समानोच्चारणदोष उपलभ्यते ।

ईषत्स्पृष्टस्य स्पृष्टप्रयत्नेनोच्चारणं शिक्षाशास्त्रे परिगणितेषूच्चारणदोषेषु पीडनं ध्मातः निर्हतम् इत्यादिनामभिरभिधीयते । अनेनैव दोषेण यदाऽन्तस्थो यकारो दुष्टः सन् स्पृष्टप्रयत्नेनोच्चार्यते, तदा सस्थानीये स्पृष्टप्रयत्नजे जकारे विपरिणमते । यदा च स्पृष्टप्रयत्नजो जकारो लेशेन (शिथिलेन) अर्धकेन वा दोषेण ग्रस्तो भवति, तदा स समानस्थानीये ईषत्स्पृष्टप्रयत्नजे यकारे विपरिणमते । अत एवापभ्रंशासु पालिप्राकृतादिभाषासु यमुनाया जमुनारूपे, जानाति इत्यस्य याणादि इत्येवं यकारजकारयोः परस्परं व्यापत्तिरुपलभ्यते ।

यद्येवं तर्हि जकारोच्चारणनिदर्शकवचनानां कोऽभिप्राय इति चेत् ? उच्यते—न तेषां चवर्गीयजकारोच्चारणे तात्पर्यम्, अपितु तत्सदृशसुस्पष्टोच्चारण एव तात्पर्यं व्याख्येयम् । अत एव प्रतिज्ञा-परिशिष्टव्याख्यात्रा स्पष्टमुक्तम्—'अत एव सम्प्रदायविद एवंविधे यकारे स्पृष्टप्रयत्नज्ञापनाय मध्ये बिन्दुं प्रक्षिपन्ति । स्पृष्टप्रयत्न स्थानैक्याच्चवर्गतृतीयसदृशं यकारं पठन्ति' । २।२ ॥

अत्र सदृशशब्दप्रयोगात् सुस्पष्टं भवति, यत्स जकारपाठं न शास्त्रानुमतं मन्यते । अन्यथा स चवर्गतृतीयं जकारं पठन्ति इत्येवावक्ष्यत् सुस्पष्टतायै । एतेन याज्ञवल्कीयशिक्षाया 'जशब्दः' इत्यस्यापि 'जसदृशः' शब्द इत्येवाभिप्रायो व्याख्येयः । अयमेवाभिप्राय उत्तरे १६१ तमे श्लोके सुस्पृष्टशब्दस्यापि ज्ञेयः । व्याख्यातं चामरनाथशास्त्रिणा—सुस्पृष्टम्=कालविलम्बेन गुरुभूतम् । (पृष्ठ १११)

इदं चात्रावधेयम्—अनन्तव्याख्याने 'स्पृष्टप्रयत्नज्ञापनाय' इति यदुक्तं तन्न साधु । यतो हि लघुयकारो यथा लघुतरप्रयत्नेनोच्चार्यमाणो न स्वमीषत्स्पृष्टप्रयत्नं विजहाति, तथा गुरुयकारोऽपि न गुरुप्रयत्नेनोच्चार्यमाणः स्वमीषत्स्पृष्टप्रयत्नं विहाय स्पृष्टप्रयत्नं भजितुं समर्थः । एतेन याज्ञवल्क्यशिक्षायां सुस्पृष्टं तं विजानीयात् इत्यत्र सुस्पष्टस्थाने सुस्पृष्टपाठः प्रामादिक इति विज्ञायते । स्पृष्टप्रयत्नविवक्षायां—स्पृष्टं च तं विजानीयात् इत्येव वचनं साधीयान् स्यात् । तदा सुस्पृष्टस्य सुस्पष्टमित्येवाभिप्रायो मन्तव्यः । अमरनाथशास्त्रिव्याख्याने कालविलम्बेन गुरुभूतम् इत्यत्र कालविलम्बेनेति वचनं

प्रामादिकम् । नह्यत्र यकारवकारोच्चारणयोर्गुरुलघुलघुतरशब्दैः कालभेदो विवक्षितोऽपि तु प्रयत्नभेदः, एतच्च व्योर्लघुप्रयत्नतरः शाकटायनस्य (अ० ८।३।१८) इति पाणिनीये सूत्रे प्रयत्नपदनिक्षेपेण ज्ञायते, इत्युपपादितमस्माभिः प्राक् ।

षकारस्य खकारोच्चारणम् —याज्ञवल्क्यशिक्षायां षकास्य खकारोच्चारणविधायकं वचनं नोपलभ्यते । तथापि प्रतिज्ञापरिशिष्टे माध्यन्दिन-लघुमाध्यन्दिनशिक्षयोः खकारोच्चारणविधिः श्रूयते । तथाहि—

अथो मूर्धन्योष्मणोऽसंयुक्तस्य टुमृते संयुक्तस्य च खकारोच्चारणम् । २।७ ।।[1]

अत्र लघुमाध्यन्दिनशिक्षायामयं विशेष उपलभ्यते—षकारस्य खकारः स्याट्टुकयोगे तु नो भवेत् ।

अत्र कयोगे खकारोच्चारणनिषेधस्य ककारस्यादौ संयोगे तात्पर्यम्, न कान्तसंयोगे । तेन 'क्ष' इत्येवं संयोगे षकार एवोच्चार्यते, शुष्क्याय इत्यत्र च खकारः ।

अत्रापि न षकारस्य खकारोच्चारणे तात्पर्यमपि तु खकारसदृशकण्ठमूर्धान्तरालस्थानेन (मूर्ध्न उपरितनभागेन) खकारवत् सुस्पष्टरूपेणोच्चारणे तात्पर्यम् । अत एवानन्तभट्टोऽप्यस्य सूत्रस्य व्याख्यान आह—'षटौ मूर्धनीति सूत्रात् षकारो मूधन्यः स्थानकरणपरित्यागेनार्धस्पृष्टषकारस्थाने कवर्गीय प्रतिरूपकं खकारोच्चारणं कर्तव्यम् ।

अत्र प्रतिरूपकशब्दः स्पष्टमेव द्योतयति यन्न षकारस्य खकारोच्चारणे तात्पर्यम्, अन्यथा कवर्गीयखकारोच्चारणं कर्तव्यम् इत्येवावक्ष्यत् । अनन्तस्य षकारस्यार्धस्पृष्टप्रयत्नलेखनं शिक्षान्तरानुरोधेन स्यात् ।

वकारस्य बकारोच्चारणम्—केचन वैदिका गुरुवकारस्य बकारोच्चारणं विदधति । तादृशोच्चारणस्य क्वचिदप्यविधानाद् बकारोच्चारणं दोष एव ज्ञेयः ।

एतेन शास्त्रतात्पर्यपर्यालोचनेन स्पष्टं प्रतीयते—यद् यकारस्य जकारोच्चारणं षकारस्य खकारोच्चारणं च न केवलं शिक्षाशास्त्रविरुद्धमपि तु माध्यन्दिनसम्मतयोर्याज्ञवल्क्यशिक्षाप्रतिज्ञापरिशिष्टयोरपि तत्तात्पर्याग्राज्ञानमूलकमेव ।

●

---

१. मुद्रिते ग्रन्थे सूत्रसंख्या १२ निर्दिश्यते, स मुद्रणप्रमादो ज्ञेयः, पूर्वत्र ६ संख्या दर्शनात् ।

पञ्चमं परिशिष्टम्

संशोधनं परिवर्तनं परिवर्धनं च

'वैदिकपदपाठानां तुलनात्मकमध्ययनम्' इत्यत्र प्राग्भागे—पृष्ठ २४ पं० ५ इत्यतोऽग्रे परिवर्धनीयम्—

यद्यपि माध्यन्दिन-यजुःपदपाठे द्वन्द्वसमासेऽवग्रहो न दृश्यते, तथापि क्वचिदवग्रह उपलभ्यते। यथा—

ऋक्सामाभ्यामित्यृक् सामाभ्याम्। ४।१॥

एवमेव ऋक्सामयोरित्यृक् सामयोः (४।९); ऋक्सामानीत्यृक् सामानि (१८।४१) इत्यत्रापि च।

बृहद्रथन्तरेऽइतिबृहत् रथन्तरे। १२।४; १८।२३॥

इत्थं यत्र क्वचिद् द्वन्द्वेऽपि समासेऽवग्रहो दृश्यते, तत्कारणं मृग्यम्।

पृष्ठ ४३ पं० १६ '······प्रायेण वर्तते' इत्यत्र इयं टिप्पणी परिवर्धनीया—

एतादृशः स्वरसंचारः प्रायेण आदिमेषु दशस्वेवाध्यायेषु दृश्यते। यतस्तावान् ग्रन्थः (सं० १) मुम्बईनगरस्थे निर्णयसागरयन्त्रालये मुद्रितोऽभूत्। उत्तरभागः काश्यां प्रयागे च मुद्रितोऽतस्तत्र काशीपाठानुसारमेव स्वरसंचारो दृश्यते।

पृष्ठ ४५ पं० २ इत्यतोऽग्रे परिवर्धनीयम्—

ऋकारपरो यकारोऽप्यस्मिन् पाठे सर्वत्र 'यृ' इत्येवं लघुरेवोपलभ्यते।

पृष्ठ ४८ पं० २४ इत्यतोऽग्रे परिवर्धनीयम्—

२६।४२ पदपाठे तस्य संहितापाठे चोपलभ्यमानं 'चिश्चा' पदमपि ककोशे 'चिश्च्या' इत्येवं सयकारो दृश्यते।

विशेषः—अस्मिन् शोधनपत्रे पदादौ क्वचित् मुद्रितयोः **व य** इत्येतयोः **ब स** इत्येवं शोधनं न प्रदर्शितम्, सर्वजनानां विदितत्वात्।

पृष्ठ	पं०	अशुद्धम्	शुद्धम्
२५	५	अथभाग०	अथाभाग०
२८	४	दुदे	दुघ्रे
२८	५	असंदत	असंदत्
३१	८	तन्वा ÷	तन्वा ÷
३३	४	सश्हितेति०	सश्हितेति०
३५	९	ब्रह्मण ÷	ब्रह्मणः
३७	१०	संम्राडितिसम् राट्	सम्राडितिसम् राट्
३७	१२	गार्हपत्य०	गार्हपत्य०
३८	६	मेधाः	मेधा?
३९	६	जोषसः	जोषसः
३९	११	अव्या	अव्या
४०	४	चेरुः	चेरु?
४०	७	रिषः	रिष?
४०	११	ददामि	ददामि
४३	२	उर्वारुकमि०	उर्वारुकमि०
४७	२	व्रातात्	व्रातात
४८	५	इत्यूर्णं	इत्यूर्णं
४८	६	मयि	मयि
४८	७	असि?	असि
४८	८	सुसस्या	सुसस्या
४९		मृडीकाम्	मृडीकाम्
४९	४	मनोयुजा	मनोयुज
४९	७	श्वात्रा?	श्वात्रा?
५०	३	मन्दिषीमहि	मन्दिषीमहि
५१	८	युज्जिया । उ०	सुज्जियां । अदितिः । उ०
५२	२	सगर्भेभ्य्	सगर्भ्य्
५२	७	त्वा	त्वा
५३	११	ग्रहरुर्व ÷	ग्रहरुर्व ÷
५४	१	रत्नधामितिरत्न धाम	रत्नधामितिरत्न धाम
५४	५	प्रजा	प्रजा
५४	६	प्राणन्तु	प्राणन्तु

पृष्ठ	पं०	अशुद्धम्	शुद्धम्
५४	९	सुग्मे॑	सुग्मे
५४	१२	पुषेयम्	पुषेयम्
५५	१०	ग्राम्	गाम्
५६	२	ब्रुरुणस्य	ब्रुरुणस्य
६५	५	दुरुर्धेऽइति॑	दुरुर्धेऽइति॑
६५	१२	त्वा	त्वा
६८	८	ब्राम्	ब्राम्
६८	११	स्थ	स्थ
६९	५	मारुत६	मारुत६
७०	२	बृद्द्धय६	बृद्द्धय६
७१	२	प्रतक्वेति॑०	प्रतक्वेति॑
७२	२	०सम इत	सम् इव
७२	२	सोम॑	सोम
७२	८	ब्रिद्वान्	ब्रिद्द्वान्
७२	९	ते	ते
७४	१	अन्न्यान् । उर्प	अन्न्यान् । न । अन्न्यान् । उर्प
७५	३	एतस्य॑	एतस्य॑
७५	४	त्वा	त्वा
७६	६	दिव्रीवेति॑०	दिव्रीवेति॑०
७७	११	ते	ते
७८	३	पशून्	पशून्
७८	७	धा६	धा६
८०	१३	गच्छताम्	गच्छताम्
८१	२	ऊष्मर्ण ÷	ऊष्मर्ण ÷
८२	५	अहोरात्रे०	अहोरात्रे०
८२	१२	राजन्	राजन्
८३	९	अमू६	अमू६
८४	११	हविष्य ÷	हविष्य ÷
८९	१	त्वा	त्वा
८९	७	इतिद्द्यावा॑ पृथिवी	इतिद्यावापृथिवी
९१	७	देवा६	देवा६

पृष्ठ	पं०	अशुद्धम्	शुद्धम्
९२	६	मृष्ट्टट्ं	मृष्टट्ं
९२	११	आसन्	आसन्
१०६	३	व्विवस्वन्	व्विवस्वन्
११०	२	मघवन्निति०	मघवन्निति०
११८	२	नऽ	नट्ं
११८	४	आ	आ
११९	६	हविषा	हविषा
१२५	३	अगन्	अगन्
१२९	१	नाम व्वचसा	नाम । व्वचसा
१२९	६	ध्यऽ	सऽ
१२९	१४	सुज्ज्यमानट्ं	सुज्ज्यमानट्ं
१३०	२१	रूहेयम्	रुहेयम्
१३०	२२	पृष्ठ ४४	पृष्ठ ४५
१३२	४	पुर्ण्णम्	पुर्ण्णम्
१३३	२	व्वाजिनट्ं	व्वाजिन ÷
१३४	१	गन्ताम्	गन्ताम्
१३६	६	वभूव	वभूव
१४५	४	तपोजा	तपोजा
१५९	११	अद्ध्वानम्	अद्ध्वानम्
१६९	११	द्विषट्ं	द्विषऽ
१७४	३	देवट्ं	देवऽ
१७५	७	कृता	कृता
१८०	९	देवाऽ	देवाऽ
१८०	१२	चतु ÷ पदऽइति	चतु ÷ पदऽइति
१८१	१	०प्र स्थानम्	०प्र स्थानम्
१८१	६	नाम	नाम
१८२	२	आ	आ
१८४	९,१७	अग्ग्रे (अग्रे)	अग्ग्रे (अग्रे)
१८५	४	उषायाट्ं	उखायाट्ं
१८५	८	सर्वाट्ं	सर्वा ÷
१९२	९	नट्ं	नापेक्षते

पृष्ठ	पं०	अशुद्धम्	शुद्धम्
१९३	१	ज्ञानम्	ज्ञानम्
१९३	८	न	न
२०२	११	पुण्ण	पुण्णे
२०५	९	या	या?
२०७	५	या	या?
२०९	१३	युञ्ञ्जयम्	युञ्ञ्जयम्
२१२	११	सोम	सोम
२१४	टि० २	०पि मुडागमः	०पि डटो मडागमः
२१५	९	च	च
२१६	८	०मिति यातु	०मितियातु
२१६	१०	अमी०	अमी०
२१८	३	न?	नꣳ
२२०	९	या?	या
२२४	७	स्तुभा	स्तुभा
२२५	१३	ज्यातिषा	ज्योतिषा
२२७	६	रजसꣳ	रजसꣳ
२२८	१	मा	मा
२४४	९	वसव?	वसवꣳ
२५३	६	ब्रुधꣳ	ब्रुध?
२५४	५	सुरुँत्	सुरुँवत्
२५९	५	सुसहँऽइति	सुसहुऽइति
२५९	१८	श्येन	श्येन
२६२	६	सत्प्पति०	सत्पति०
२६२	११	अप्प्रयुच्छ०	अप्प्रयुच्छ०
२६२	१४	मध्यम्	मध्यम्
२६४	७	शोचिꣳ	शोचि?
२६६	६	काशिनी	काशिनी
२६६	८	गिरिशन्तेति०	गिरिशन्तेति०
२६८	६	इषवे ÷	इषवꣳ
२६८	१०	इषव ÷	इषवꣳ
२७२	३	विकृतानामिति०	विकृतानामिति०

पृष्ठ	पं०	अशुद्धम्	शुद्धम्
२७६	५	अपगल्भायेत्यप गल्भाय	अपगल्भायेत्यप गल्भाय
२८०	५	निवेष्प्युायेति०	निवेष्प्युायेति०
२९५	७	ब्रद	ब्रद
३०१	६	देवा?	देवा८
३०४	८	०रिस्या भजन्ती	रिस्या भजन्ती
३०६	३	इतित्प्र	इतिप्र
३०६	८	क्रेतुम्	केतुम्
३०८	११	ज्योति ÷	ज्योति ÷
३०८	१३	रोदसीऽइति	रोदसीऽइति
३२४	७, १४, १९	अधिसवनऽइति	अधिसवनेऽइति
३२५	५, १३	बृहद्द्रथन्तर०	बृहद्द्रथन्तरे०
३२९	१०	न८	न८
३३१	९	अवस्यू ?	अवस्यू ?
३३६	११	अधि	आधि
३३७	५	इन्द्रम	इन्द्र
३५५	६	सिष्ठा८	आसिष्ठा८
३६३	१९	२२८	३२८
३७०	६	०दितींद्रिय	०दितीन्द्रिय
३७२	१	पृष्टी?	पृष्ठी?
३७२	१३	पृष्टी?	पृष्ठी?
३८२	१	इन्द्रम्	इन्द्रम्
३८७	१३	यिम्	रयिम्
३९६	२	बृत्रहेति०	बुत्रहेति०
४००	६	इतियहृश्री	इतियहृश्री

रामलाल कपूर ट्रस्ट द्वारा
प्रकाशित और प्रसारित प्रामाणिक ग्रन्थ

१. वर्णोच्चारण-शिक्षा-ऋषि दयानन्द ६.००
२. शिक्षासूत्राणि-आपिशल-पाणिनीय-चान्द्र १५.००
३. पाणिनीय-शिक्षा-पं० उदयनाचार्य ३०.००
४. शिक्षा-शास्त्रम् (शिक्षातत्त्वालोकभाष्योपेतम्) पं० उदयनाचार्य २५०.००
५. निघण्टु-निर्वचनम्-देवराजयज्वाकृत २००.००
६. निरुक्त-श्लोकवार्त्तिकम्-नीलकण्ठ ३५०.००
७. निरुक्त-समुच्चय-वररुचिकृत ३०.००
८. अष्टाध्यायीसूत्रपाठः २०.००
९. अष्टाध्यायीसूत्रपाठः (गुटका-आकार) २०.००
१०. अष्टाध्यायीसूत्रपाठः (यतिबोधयुक्तः) ५०.००
११. अष्टाध्यायीभाष्य- (संस्कृत-हिन्दी) प्रथमभाग- २५०.००, द्वितीयभाग-१८०.००, तृतीयभाग-२४०.००
१२. माधवीया-धातुवृत्ति-आचार्य सायण रचित धातुपाठ की प्रामाणिक व्याख्या-सं०- डॉ० विजयपाल विद्यावारिधि ६५०.००
१३. पारिभाषिकः-व्याख्याकार-आचार्य प्रद्युम्न (व्याकरण की परिभाषाओं की प्रामाणिक व्याख्या) १००.००
१४. काशिका-वामनजयादित्य-सं०- डॉ० विजयपाल विद्यावारिधि ७००.००
१५. भागवृत्तिसंकलनम्-अष्टाध्यायीवृत्ति ३०.००
१६. महाभाष्य-यु०मी०कृत हिन्दीव्याख्यासहित- प्रथमभाग (१) २००.००, (२) २००.००, द्वितीयभाग २००.००, तृतीयभाग ३००.००
डॉ० सुद्युम्न आचार्य कृत हिन्दीव्याख्यासहित- चतुर्थभाग २००.००, पञ्चमभाग २००.००, षष्ठभाग २००.००
१७. कात्यायन गृहसूत्र- यु० मी० ५०.००
१८. धातुपाठः (धातुसूचीसहित) ३०.००
१९. क्षीरतरङ्गिणी (धातुपाठ-व्याख्या) १७०.००
२०. धातुप्रदीप-धातुपाठवृत्ति-मैत्रेयरक्षित अप्राप्य
२१. संस्कृत-धातु-कोष-यु० मी० ७०.००
२२. संस्कृत-वाक्य प्रबोध-ऋषि दयानन्द ३०.००

२३. संस्कृत-पठन-पाठन की अनुभूत सरलतमविधि
प्रथमभाग ९०.००, द्वितीयभाग ११०.००
प्रथमभाग का अंग्रेजी अनुवाद २००.००
२४. उणादिकोष-ऋषि दयानन्द १००.००
२५. गणरत्नावली-भट्टयज्ञेश्वरकृत पाणिनीय गणपाठ की व्याख्या- सं०-चन्द्रदत्त शर्मा अप्राप्य
२६. वामनीयं लिङ्गानुशासनम् अप्राप्य
२७. दैवं पुरुषकार-वार्त्तिकोपेतम् ५०.००
२८. अष्टाध्यायीशुक्लयजुः प्रातिशाख्ययोर्मतविमर्शः- डॉ० विजयपाल विद्यावारिधि १००.००
२९. शब्दरूपावली-विना रटे स्मरण करने योग्य ३०.००
३०. पिङ्गलनागछन्दोविचितिभाष्यम्-यादव प्रकाश विरचित ६०.००
३१. बौधायन-श्रौतसूत्रम्- (दर्शपूर्णमास) १२०.००
३२. बौधायन-श्रौतसूत्रम् (संस्कृत) आधान प्रकरण की व्याख्या एवं पद्धति सहित ८०.००
३३. दर्शपूर्णमास-पद्धति- पं० भीमसेन ५०.००
३४. श्रौतपदार्थनिर्वचनम् (संस्कृत) १५०.००
३५. श्रौतयज्ञ-मीमांसा-(संस्कृत-हिन्दी) १००.००
३६. अग्निहोत्र से लेकर अश्वमेधपर्यन्त श्रौतयज्ञों का संक्षिप्त परिचय- १२०.००
३७. यजुर्वेद का स्वाध्याय तथा पशुयज्ञ समीक्षा- ४०.००
३८. शतपथ ब्राह्मणस्थ अग्निचयनसमीक्षा- पं० विश्वनाथ वेदालंकार १००.००
३९. संस्कार-विधि- ऋषि दयानन्द कृत ४०.००
४०. संस्कार-भास्कर- स्वामी विद्यानन्द सरस्वती कृत संस्कार-विधि की व्याख्या २००.००
४१. संस्कार-विधि-मण्डनम्-पं० रामगोपाल ३०.००
४२. वेदोक्त-संस्कारप्रकाश-पं० बाला जी विट्ठल गावस्कर कृत मराठी का हिन्दी अनुवाद ७०.००
४३. वैदिक-नित्यकर्मविधि- (पञ्चमहायज्ञविधि के मन्त्रों की पदार्थ व भावार्थ सहित व्याख्या) ४०.००
४४. वैदिक-नित्यकर्मविधि- ऋ० द० कृत १८.००

—०—



सम्पादक का जीवन-परिचय

नाम– म॰ म॰ पण्डित युधिष्ठिर मीमांसक।

जन्म– २२ सितम्बर, सन् १९०९ ई॰।

जन्मस्थान– विरकच्यावास (विरञ्च्यावास), अजमेर (राजस्थान)।

शिक्षा– प्रारम्भिक शिक्षा पाँचवीं तक जन्मस्थान पर, तत्पश्चात् 'विरजानन्द आश्रम' हरदुआ गंज, अलीगढ़ आदि स्थानों पर पण्डित ब्रह्मदत्त जी जिज्ञासु आदि विद्वानों के सान्निध्य से सम्पूर्ण वैदिक वाङ्मय का गम्भीर अध्ययन।

अध्यापन– विरजानन्द आश्रम (लाहौर, वाराणसी, बहालगढ़), महर्षि दयानन्द स्मारक महाविद्यालय (टंकारा), पाणिनीय संस्कृत सान्ध्य-महाविद्यालय (भुवनेश्वर, उड़ीसा) तथा अन्य अनेक स्थलों पर भी स्वतन्त्र रूप से अध्यापन कार्य एवं रामलाल कपूर ट्रस्ट के प्रधान पद पर रहते हुए आजीवन कुशल सञ्चालन किया।

लिखित ग्रन्थ– संस्कृत व्याकरण शास्त्र का इतिहास (दो भाग), वैदिक-स्वरमीमांसा, वैदिक-छन्दोमीमांसा, वैदिक-सिद्धान्तमीमांसा, श्रौत-यज्ञ-मीमांसा आदि अनेक महत्त्वपूर्ण ग्रन्थों का लेखन।

सम्पादित ग्रन्थ– निरुक्त-समुच्चयः, भागवृत्ति-संकलनम्, दशपाद्यु-णादिवृत्तिः (दो भाग), शिक्षा-सूत्राणि, क्षीरतरंगिणी, दैवम् (पुरुषकार-वार्त्तिकोपेतम्), काशकृत्स्न-धातुव्याख्यानम्, माध्यन्दिन-पदपाठः, महाभाष्यम् (हिन्दी-व्याख्या दो अध्याय पर्यन्त), ऋषि दयानन्द के पत्र और विज्ञापन (चार भाग) आदि अनेक महत्त्वपूर्ण ग्रन्थों का सम्पादन।

विशिष्ट सम्मान एवं पुरस्कार– सन् १९७७ ई॰ में भारत के राष्ट्रपति द्वारा 'राष्ट्रिय पण्डित', आर्यसमाज सान्ताक्रुज (मुम्बई) द्वारा सन् १९८५ ई॰ में ७५ सहस्र रुपये से सम्मानित, सन् १९९४ ई॰ में उत्तर प्रदेश संस्कृत अकादमी द्वारा एक लाख का 'विश्वभारती' पुरस्कार, स॰ सं॰ विश्वविद्यालय वाराणसी द्वारा 'महामहोपाध्याय' की उपाधि दी गई।

निधन– २८ जून सन् १९९४ ई॰।

आवरण : श्रीमहालक्ष्मी; ९८९९६५१५०३, E-Mail : smcolour@gmail.com